BANA'S

# KADAMBARI

## KATHAMUKHAPRAKARANA

(Prescribed for the B. A. Examination)

EDITED WITH

**Exhaustive Notes, Explanations, etc., etc.**

BY

S. SUBRAHMANYA SASTRY, B. A., LL. B.



**Allahabad**

RAM NARAIN LAL

PUBLISHER AND BOOKSELLER

1919

C. K. Ghadge.

B. A.

61

Ram Narain Nandwani

5-5-55

0-4-0

Nagpur.

BANA'S

# KADAMBARI

## KATHAMUKHAPRAKARANA

(Prescribed for the B. A. Examination)



EDITED WITH

**Exhaustive Notes, Explanations, etc., etc.**

BY

S. SUBRAHMANYA SASTRY, B. A., LL. B.



Allahabad
RAM NARAIN LAL
PUBLISHER AND BOOKSELLER

1919

*Rs. 2.*

# ERRATA

| In | page | line | for | read |
|---|---|---|---|---|
| ,, | 1. | 8. | पांशवः | पांसवः |
| ,, | 2 | 9. | विशत्वधो | विशत्यधो |
| ,, | 11. | 8. | दिष्टायां | विष्टायां |
| ,, | 17. | 22. | क्थेव | कथेव |
| ,, | 21. | 15. | गगगतल | गगनतल |
| ,, | 22. | 8. | पाद्वन्तः | पाद्यन्तः |
| ,, | 22. | 12. | शुकशुक | शुकशकु |
| ,, | 22. | 14. | रसान्क्रममञ्जरी | रसान्कलममञ्जरी |
| ,, | 24. | 13. | तस्मिन्हावने | तस्मिन्महावने |
| ,, | 29. | 26. | संवतिका | संवर्तिका |
| ,, | 30. | 6. | हरप्रतीकार | हरमप्रतीकार |
| ,, | 30. | 21. | नाशीर्यन्तयाव | नाशीर्यन्त । याव |
| ,, | 33. | 4. | अभिनतबिस | अभिनवबिस |
| ,, | 36. | 22. | नुरागे | नुरागो |
| ,, | 38. | 3. | चलदङ्गलि | चलदङ्गुलि |
| ,, | 42. | 1. | न | नः |
| ,, | 42. | 14. | उद्यत्सर्षि | उद्यत्सप्तर्षि |
| ,, | 42. | 24. | वलिसिक्कामाश्रम | वलिसिक्थमाश्रम |
| ,, | 43. | 22. | ततिस्त्रति | ततिस्तुति |

---

# कादम्बरी ।



रजोजुषे जन्मनि सत्त्ववृत्तये
स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ॥ १ ॥

जयन्ति बाणासुरमौलिलालिता
दशास्यचूडामणिचक्रचुम्बिनः ।
सुरासुराधीशशिखान्तशायिनो
भवच्छिदस्त्र्यम्बकपादपांशवः ॥ २ ॥

जयत्युपेन्द्रः स चकार दूरतो
बिभित्सया यः क्षणलब्धलक्ष्यया ।
दृशैव कोपारुणया रिपोरुरः
स्वयं भयाद्भिन्नमिवास्रपाटलम् ॥ ३ ॥

नमामि भर्वोश्चरणाम्बुजद्वयं
सशेखरैर्मौखरिभिः कृतार्चनम् ।
समस्तसामन्तकिरीटवेदिका-
विटङ्कपीठोल्लुठितारुणाङ्गुलि ॥ ४॥

अकारणाविष्कृतवैरदारुणा-
दसज्जनात्कस्य भयं न जायते ।
विषं महाहेरिव यस्य दुर्वचः
सुदुःसहं संनिहितं सदा मुखे ॥ ५ ॥

कटु क्वणन्तो मलदायकाः खला-
स्तुदन्त्यलं बन्धनशृङ्खला इव ।
मनस्तु साधुध्वनिभिः पदे पदे
हरन्ति सन्तो मणिनूपुरा इव ॥ ६ ॥

सुभाषितं हारि विशत्यधो गला-
न्न दुर्जनस्यार्करिपोरिवामृतम् ।
तदेव धत्ते हृदयेन सज्जनो
हरिर्महारत्नमिवातिनिर्मलम् ॥ ७ ॥

स्फुरत्कलालापविलासकोमला
करोति रागं हृदि कौतुकाधिकम् ।
रसेन शय्यां स्वयमभ्युपागता
कथा जनस्याभिनवा वधूरिव ॥ ८ ॥

हरन्ति कं नोज्ज्वलदीपकोपमै-
र्नवैः पदार्थैरुपपादिताः कथाः ॥
निरन्तरश्लेषघनाः सुजातयो
महास्रजश्चम्पककुड्मलैरिव ॥ ९ ॥

बभूव वात्स्यायनवंशसंभवो
द्विजो जगद्गीतगुणोऽग्रणीः सताम् ।
अनेकगुप्तार्चितपादपङ्कजः
कुबेरनामांश इव स्वयंभुवः ॥ १० ॥

उवास यस्य श्रुतिशान्तकल्मषे
सदा पुरोडाशपवित्रिताधरे ।
सरस्वती सोमकषायितोदरे
समस्तशास्त्रस्मृतिबन्धुरे मुखे ॥ ११ ॥

जगुर्गृहेभ्यस्तसमस्तवाङ्मयैः
ससारिकैः पञ्जरवर्तिभिः शुकैः ।
निगृह्यमाणा बटवः पदे पदे
यजूंषि समानि च यस्य शङ्किताः ॥ १२ ॥

हिरण्यगर्भो भुवनाण्डकादिव
क्षपाकरः क्षीरमहार्णवादिव ।
अभूत्सुपर्णो विनतोदरादिव
द्विजन्मनामर्थपतिः पतिस्ततः ॥ १३ ॥

विवृण्वतो यस्य विसारि वाङ्मयं
दिने दिने शिष्यगणा नवा नवाः ।
उषस्सु लग्नाः श्रवणेऽधिकां श्रियं
प्रचक्रिरे चन्दनपल्लवा इव ॥ १४ ॥

विश्रानसंपादितदानशोभितैः
स्फुरन्महावीरसनाथमूर्तिभिः ।
मखैरसंख्यैरजयत्सुरालयं
सुखेन यो यूपकरैर्गजैरिव ॥ १५ ॥

स चित्रभानुं तनयं महात्मनां
सुतोत्तमानां श्रुतिशास्त्रशालिनाम् ।
अवाप मध्ये स्फटिकोपलोपमं
क्रमेण कैलासमिव क्षमाभृताम् ॥ १६ ॥

महात्मनो यस्य सुदूरनिर्गताः
कलङ्कमुक्तेन्दुकलामलत्विषः ।
द्विषन्मनः प्राविविशुः कृतान्तरा
गुणा नृसिंहस्य नखाङ्कुरा इव ॥ १७ ॥

दिशामलीकालकभङ्गतां गत-
स्त्रयीवधूकर्णतमालपल्लवः ।
चकार यस्याध्वरधूमसंचयो
मलीमसः शुक्लतरं निजं यशः ॥ १८ ॥

सरस्वतीपाणिसरोजसंपुट-
प्रमृष्टहोमश्रमसीकराम्भसः ।
यशोंशुशुक्लीकृतसप्तविष्टपा-
त्ततः सुतो बाण इति व्यजायत ॥ १९ ॥

द्विजेन तेनाक्षतकण्ठकौण्ठ्यया
महामनोमोहमलीमसान्धया।
अलब्धवैदग्ध्यविलासमुग्धया
धिया निबद्धेयमतिद्वयी कथा ॥ २० ॥

आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः पाकशासन इवापरः 5
चतुरुदधिमालामेखलाया भुवो भर्ता प्रतापानुरागावनतसमस्त-
सामन्तचक्रश्चक्रवर्तिलक्षणोपेतश्चक्रधर इव करकमलोपलक्ष्यमाण-
शङ्खचक्रलाञ्छनो हर इव जितमन्मथो गुह इवाप्रतिहतशक्तिः
कमलयोनिरिव विमानीकृतराजहंसमण्डलो जलधिरिव लक्ष्मी-
प्रसूतिर्गङ्गाप्रवाह इव भगीरथपथप्रवृत्तो रविरिव प्रतिदिवसो- 10
पजायमानोदयो मेरुरिव सकलभुवनोपजीव्यमानपादच्छायो दिग्गज
इवानवरतप्रवृत्तदानार्द्रीकृतकरः, कर्ता महाश्चर्याणामाहर्ता क्रतूना-
मादर्शः सर्वशास्त्राणामुत्पत्तिः कलानां कुलभवनं गुणानामागमः
काव्यामृतरसानामुदयशैलो मित्रमण्डलस्योत्पातकेतुरहितजनस्य प्र-
वर्तयिता गोष्ठीबन्धानामाश्रयो रसिकानां प्रत्यादेशो धनुष्मतां 15
धौरेयः साहसिकानामग्रणीर्विदग्धानां वैनतेय इव विनतानन्द-
जननो वैन्य इव चापकोटिसमुत्सारितसकलारातिकुलाचलो राजा
शूद्रको नाम।

नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनारसिंहरूपाडम्बर-
मेकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितं च जहासेव 20
वासुदेवम्। अतिचिरकाललग्नमतिक्रान्तकुनृपतिसहस्रसंपर्ककलङ्क-
मिव क्षालयन्ती यस्य विमले कृपाणधाराजले चिरमुवास राज-
लक्ष्मीः। यश्च मनसि धर्मेण कोपे यमेन प्रसादे धनदेन प्रतापे
वन्हिना भुजे भुवा दृशि श्रिया वाचि सरस्वत्या मुखे शशिना बले
मरुता प्रज्ञायां सुरगुरुणा रूपे मनसिजेन तेजसि सवित्रा च वसता 25
सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

यस्य च मदकलकरिकुम्भपीठपाटनमाचरतो लग्नस्थूलमुक्ताफलेन दृढमुष्टिनिपीडनान्निष्ठ्यूतधाराजलबिन्दुदन्तुरेणेव कृपाणेनाकृष्यमाणा सुभटोरःकपाटविघटितकवचसहस्रान्धकारमध्यवर्तिनी करिकरटतटग-लितमदजलासारदुर्दिनास्वभिसारिकेव समरनिशासु समीपमसकृदा-
5 जगाम राजलक्ष्मीः। यस्य च हृदयस्थितानपि पतीन्दिधक्षुरिव प्रतापानलो वियोगिनीनामपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल। यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसंकरा रतेषु केशग्रहाः काव्येषु दृढबन्धाः शास्त्रेषु चिन्ता स्वप्नेषु विप्रलम्भाश्छत्त्रेषु कनकदण्डा ध्वजेषु प्रकम्पा गीतेषु रागविलसितानि
10 करिषु मदविकाराश्चापेषु गुणच्छेदा गवाक्षेषु जालमार्गाः शशिकृपाण-कवचेषु कलङ्का रतिकलहेषु दूतसंप्रेषणानि शार्यक्षेषु शून्यगृहाः प्रजानामासन्। यस्य च परलोकाद्भयमन्तःपुरिकालकेषु भङ्गो नूपुरेषु मुखरता विवाहेषु करग्रहणमनवरतमखाग्निधूमेनाश्रुपातस्तुरंगेषु कशा-भिघातो मकरध्वजे चापध्वनिरभूत्।

15 तस्य च राज्ञः कलिकालभयपुञ्जीभूतकृतयुगानुकारिणी त्रिभु-वनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालवविलासिनीकुचतटास्फालन-जर्जरितोर्मिमालया जलावगाहनायातजयकुञ्जरकुम्भसिन्दूरसंध्यायमा-नसलिलयोन्मदकलहंसकुलकोलाहलमुखरितकूलया वेत्रवत्या सरिता परिगता विदिशाभिधाना नगरी राजधान्यासीत्।

20 स तस्यामवजिताशेषभुवनमण्डलतया विगतराज्यचिन्ताभार-निर्वृतो द्वीपान्तरागतानेकभूमिपालमौलिमालालालितचरणयुगलो वल-यमिव लीलया भुजेन भुवनभारमुद्वहन्नमरगुरुमपि प्रज्ञयोपहसद्भिरने-ककुलक्रमागतैरसकृदालोचितनीतिशास्त्रनिर्मलमनोभिरलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः समानवयोविद्यालंकारैरनेकमूर्धाभिषिक्तपा-
25 र्थिवकुलोद्गतैरखिलकलाकलापालोचनकठोरमतिभिरतिप्रगल्भैः काल-विद्भिः प्रभावानुरक्तहृदयैर्ग्राम्यपरिहासकुशलैरिङ्गिताकारवेदिभिः का-

व्यनाटकाख्यानकाख्यायिकालेख्यव्याख्यानादिक्रियानिपुणैरतिकठिनपीवरस्कन्धोरुबाहुभिरसकृदवदलितसमदरिपुगजघटापीठबन्धैः केसरिकिशोरकैरिव विक्रमैकरसैरपि विनयव्यवहारिभिरात्मनः प्रतिबिम्बैरिव राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास। तस्य चातिविजिगीषुतया महासत्त्वतया च तृणमिव लघुवृत्ति स्त्रैणमाकलयतः प्रथमे वयसि वर्तमानस्यापि रूपवतोपि संतानार्थिभिरमात्यैरपेक्षितस्यापि सुरतसुखस्योपरि द्वेष इवासीत्। सत्यपि रूपविलासोपहसितरतिविभ्रमे लावण्यवति विनयवत्यन्वयवति हृदयहारिणि चावरोधजने स कदाचिदनवरतदोलायमानरत्नवलयो घर्घरिकास्फालनप्रकम्पझणझणायमानमणिकर्णपूरः स्वयमारब्धमृदङ्गवाद्यः संगीतकप्रसङ्गेन कदाचिदविरलविमुक्तशरासारशून्यीकृतकाननो मृगयाव्यापारेण कदाचिदाबद्धविदग्धमण्डलः काव्यप्रबन्धरचनेन कदाचिच्छास्त्रालापेन कदाचिदाख्यानकाख्यायिकेतिहासपुराणाकर्णनेन कदाचिदालेख्यविनोदेन कदाचिद्वीणया कदाचिद्दर्शनागतमुनिजनचरणशुश्रूषया कदाचिदक्षरच्युतकमात्राच्युतकबिन्दुमतीगूढचतुर्थपादप्रहेलिकाप्रदानादिभिर्वनितासंभोगसुखपराङ्मुखः सुहृत्परिवृतो दिवसमनयत्। यथैव च दिवसमेवमारब्धविविधक्रीडापरिहासचतुरैः सुहृद्भिरुपेतो निशामनैषीत्।

एकदा तु नातिदूरोदिते नवनलिनदलसंपुटभिदि किंचिदुन्मुक्तपाटलिम्नि भगवति सहस्रमरीचिमालिनि राजानमास्थानमण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वावलम्बिना कौक्षेयकेण संनिहितविषधरेव चन्दनलता भीषणरमणीयाकृतिरविरलचन्दनानुलेपनधवलितस्तनतटोन्मज्जदैरावतकुम्भमण्डलेव मन्दाकिनी चूडामणिप्रतिबिम्बच्छलेन राजाज्ञेव मूर्तिमती राजभिः शिरोभिरुह्यमाना शरदिव कलहंसधवलाम्बरा जामदग्न्यपरशुधारेव वशीकृतसकलराजमण्डला विन्ध्यवनभूमिरिव वेत्रलतावती राज्याधिदेवतेव विग्रहिणी प्रतीहारी समुपसृत्य क्षितितलनिहितजानुकरकमला सविनयमब्रवीत्। देव

द्वारस्थिता सुरलोकमारोहतस्त्रिशङ्कोरिव कुपितशतमखहुंकारनिपातिता राजलक्ष्मीर्दक्षिणापथादागता चाण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति । सकलभुवनतलसर्वरत्नानामुदधिरिवैकभाजनं देवो विहंगमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमादायागताहमिच्छामि देवदर्शनसुखमनुभवितुमिति । एतदाकर्ण्य देवः प्रमाणम् । इत्युक्त्वा विरराम । उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामालोक्य मुखानि को दोषः प्रवेश्यतामित्यादिदेश ।

अथ प्रतीहारी नरपतिवचनानन्तरमुत्थाय तां मातङ्गकुमारीं प्रावेशयत् । प्रविश्य च सा नरपतिसहस्रमध्यवर्तिनमशनिभयपुञ्जितकुलशैलमध्यगतमिव कनकशिखरिणमनेकरत्नाभरणकिरणजालकान्तरितावयवमिन्द्रायुधसहस्रसंछादिताष्टदिग्भागमिव जलधरसमयदिवसमवलम्बितस्थूलमुक्ताकलापस्य कनकशृङ्खलानियमितमणिदण्डिकाचतुष्टयस्य गगनसिन्धुफेनपटलपाण्डुरस्य नातिमहतो दुकूलवितानस्याधस्तादिन्दुकान्तमणिपर्यङ्किकानिषण्णमुद्धूयमानकनकदण्डचामरकलापमुन्मयूखमुखकान्तिविजयपराभवप्रणते शशिनीव स्फटिकपादपीठे विन्यस्तवामपादमिन्द्रनीलमणिकुट्टिमप्रभासंपर्कश्यामायमानैः प्रणतरिपुनिश्वासमलिनीकृतैरिव चरणनखमयूखजालैरुपशोभमानमासनोल्लसितपद्मरागकिरणपाटलीकृतेनाचिरमृदितमधुकैटभरुधिरारुणेन हरिमिवोरुयुगलेन विराजमानममृतफेनधवले गोरोचनालिखितहंसमिथुनसनाथपर्यन्ते चारुचामरपवनप्रनर्तितदशे दुकूले वसानमतिसुरभिचन्दनानुलेपनधवलितोरःस्थलमुपरिविन्यस्तकुङ्कुमस्थासकमन्तरान्तरानिपतितबालातपच्छेदमिव कैलासशिखरिणमपरशशिशङ्कया नक्षत्रमालयेव हारलतया कृतमुखपरिवेषमतिचपलराजलक्ष्मीबन्धनिगडकटकशङ्कामुपजनयतेन्द्रनीलकेयूरयुगलेन मलयजरसगन्धलुब्धेन भुजंगद्वयेनेव वेष्टितबाहुशिखरमीषदालम्बिकर्णोत्पलमुन्नतघोणमुत्फुल्लपुण्डरीकलोचनममलकलधौतपट्टायतमष्टमीचन्द्रशकला-

कारमशेषभुवनराज्याभिषेकसलिलपूतमूर्णासनाथं ललाटदेशमुद्वहन्त-
मामोदिमालतीकुसुमशेखरमुषसि शिखरपर्यस्ततारकापुञ्जमिव पश्चि-
माचलमाभरणप्रभापिशङ्गिताङ्गतया लग्नहरहुताशमिव मकरध्वजमा-
सन्नवर्तिनीभिः सर्वतः सेवार्थमागताभिरिव दिग्वधूभिर्वारविला-
सिनीभिः परिवृतममलमणिकुट्टिमसंक्रान्तसकलदेहप्रतिबिम्बतया प- 5
तिभक्त्या वसुंधरया हृदयेनेवोह्यमानमशेषजनभोग्यतामुपनीतयाप्यसा-
धारणया राजलक्ष्म्या समालिङ्गितदेहमपरिमितपरिवारजनमप्यद्विती-
यमनन्तगजतुरगसाधनमपि खड्गमात्रसहायमेकदेशस्थितमपि व्याप्त-
भुवनमण्डलमासनगतमपि धनुषि निषण्णमुत्सादिताशेषद्विषदिन्धन-
मपि ज्वलत्प्रतापानलमायतलोचनमपि सूक्ष्मदर्शनं महादोषमपि सक- 10
लगुणाधिष्ठानं कुपतिमपि कलत्रवल्लभमविरतप्रवृत्तदानमप्यमदमति-
शुद्धस्वभावमपि कृष्णचरितमकरमपि हस्तस्थितसकलभुवनतलं रा-
जानमद्राक्षीत् ।

आलोक्य च सा दूरस्थितैव प्रचलितरत्नवलयेन रक्तकुवलयद-
लकोमलेन पाणिना जर्जरितमुखभागां वेणुलतामादाय नरपतिप्रबोध- 15
नार्थमसकृत्सभाकुट्टिममाजघान । येन सकलमेव तद्राजकमेकपदे वन-
करियूथमिव तालशब्देन तेन वेणुलताध्वनिना युगपदावलितवदनम-
वनिपालमुखादाकृष्य चक्षुस्तदभिमुखमासीत् ।

अवनिपतिस्तु दूरादालोकयेत्यभिधाय प्रतीहार्या निर्दिश्यमानां
तां वयःपरिणामपाण्डुरशिरसा रक्तराजीवेक्षणापाङ्गेनानवरतकृत- 20
व्यायामतया यौवनापगमेप्यशिथिलशरीरसंधिना सत्यपि मातङ्गत्वे-
नातिनृशंसाकृतिनानुगृहीतार्यवेषेण धवलवाससा पुरुषेणाधिष्ठितपुरो-
भागामाकुलाकुलकाकपक्षधारिणा कनकशलाकानिर्मितमप्यन्तर्गतशु-
कप्रभाश्यामायमानं मरकतमयमिव पञ्जरमुद्वहता चाण्डालदा-
रकेणानुगम्यमानामसुरगृहीतामृतापहरणकृतकपटपटुविलासिनीवेषस्य 25
श्यामतया भगवतो हरेरिवानुकुर्वतीं संचारिणीमिवेन्द्रनीलमणिपुत्रि-

२

कामागुल्फावलम्बिना नीलकञ्चुकेनावच्छन्नशरीरामुपरि रक्तांशुकरचितावगुण्ठनां नीलोत्पलस्थलीमिव निपतितसंध्यातपामेककर्णावसक्तदन्तपत्त्रप्रभाधवलितकपोलमण्डलामुद्यदिन्दुकिरणच्छुरितमुखीमिव विभावरीमाकपिलगोरोचनारचिततिलकतृतीयलोचनामीशानरचितानुरचितकिरातवेषामिव भवानीमुरःस्थलनिवाससंक्रान्तनारायणदेहप्रभाश्यामलितामिव श्रियं कुपितहरहुताशनदह्यमानमदनधूममलिनीकृतामिव रतिमुन्मदहलिहलापकर्षणभयप्रपलायितामिव यमुनामतिबहलपिण्डालक्तकरसरागपल्लवितपादपङ्कजामचिरमृदितमहिषासुररुधिररक्तचरणामिव कात्यायनीमालोहिताङ्गुलिप्रभापाटलितनखमयूखामतिकठिनमणिकुट्टिमस्पर्शमसहमानां क्षितितले पल्लवभङ्गानिव निधाय संचरन्तीमापिञ्जरेणोत्सर्पिणा नूपुरमणीनां प्रभाजालेन रञ्जितशरीरतया पावकेनेव भगवता रूप एव पक्षपातिना प्रजापतिमप्रमाणीकुर्वता जातिसंशोधनार्थमालिङ्गितदेहामनङ्गवारणशिरोनक्षत्रमालायमानेन रोमराजिलतालवालकेन मेखलादाम्ना परिगतजघनस्थलामतिस्थूलमुक्ताफलघटितेन शुचिना हारेण गङ्गास्रोतसेव कालिन्दीशङ्कया कृतकण्ठग्रहां शरदमिव विकसितपुण्डरीकलोचनां प्रावृषमिव घनकेशजालां मलयमेखलामिव चन्दनपल्लवावतंसां नक्षत्रमालामिव चित्रश्रवणाभरणभूषितां श्रियमिव हस्तस्थितकमलशोभां मूर्छामिव मनोहारिणीमरण्यभूमिमिवाक्षतरूपसंपन्नां दिव्ययोषितमिवाकुलीनां निद्रामिव लोचनग्राहिणीमरण्यकमलिनीमिव मातङ्गकुलदूषिताममूर्तामिव स्पर्शवर्जितामालेख्यगतामिव दर्शनमात्रफलां मधुमासकुसुमसमृद्धिमिव विजातिमनङ्गकुसुमचापलेखामिव मुष्टिग्राह्यमध्यां यक्षाधिपलक्ष्मीमिवालकोद्भासिनीमचिरोपरूढयौवनामतिशयरूपाकृतिमनिमेषलोचनो ददर्श।

समुपजातविस्मयस्य चाभून्मनसि महीपतेः। अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः। तथा हि। यदि नामेयमात्मरूपोपहसिताशेषरूप-

संपदुत्पादिता किमर्थमपगतस्पर्शसंभोगसुखे कृतं कुले जन्म । मन्ये च मातङ्गजातिस्पर्शदोषभयादस्पृशतेयमुत्पादिता प्रजापतिना । अन्यथा कथमियमक्लिष्टता लावण्यस्य । न हि करतलस्पर्शक्लेशितानामवयवानामीदृशी भवति कान्तिः । सर्वथा धिग्विधातारमसदृशसंयोगकारिणमतिमनोहराकृतिरपि क्रूरजातितया येनेयमसुरश्रीरिव सतत- 5 निन्दितसुरता रमणीयाप्युद्वेजयति । इत्येवमादि चिन्तयन्तमेव राजानमीषदवगलितकर्णपल्लवावतंसा प्रगल्भवनितेव कन्यका प्रणनाम । कृतप्रणामायां च तस्यां मणिकुट्टिमोपविष्टायां स पुरुषस्तं विहंगमादाय पञ्जरगतमेव किंचिदुपसृत्य राज्ञे न्यवेदयदब्रवीच्च । देव विदितसकलशास्त्रार्थो राजनीतिप्रयोगकुशलः पुराणेतिहासकथालाप- 10 निपुणो वेदिता गीतश्रुतीनां काव्यनाटकाख्यायिकाख्यानकप्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयं च कर्ता परिहासालापपेशलो वीणावेणुमुरजप्रभृतीनां वाद्यविशेषाणामसमः श्रोता नृत्तप्रयोगदर्शननिपुणश्चित्रकर्मणि प्रवीणो द्यूतव्यापारे प्रगल्भः प्रणयकलहकुपितकामिनीप्रसादनोपायचतुरो गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः 15 सकलभूतलरत्नभूतोयं वैशम्पायनो नाम शुकः सर्वरत्नानां चोदधिरिव देवो भाजनमिति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता । तदयमात्मीयः क्रियताम् । इत्युक्त्वा नरपतेः पुरो निधाय पञ्जरमसावपससार ।

अपसृते च तस्मिन्स विहंगराजो राजाभिमुखो भूत्वा समुन्नमय्य 20 दक्षिणं चरणमतिस्पष्टवर्णस्वरसंस्कारया गिरा कृतजयशब्दो राजानमुद्दिश्यार्यामिमां पपाठ ।

स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥

राजा तु तां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनमतिमहार्ह- 25 हेमासनोपविष्टममरगुरुमिवाशेषनीतिशास्त्रपारगमतिवयसमग्रजन्मानम-

खिलमन्त्रिमण्डले प्रधानममात्यं कुमारपालितनामानमब्रवीत् । श्रुता भवद्भिरस्य विहंगमस्य स्पष्टता वर्णोच्चारणे स्वरे च मधुरता । प्रथमं तावदिदमेव महदाश्चर्यमसंकीर्णवर्णप्रविभागामभिव्यक्तमात्रानुस्वार-संस्कारयोगां विशेषसंयुक्तां यदयमतिपरिस्फुटाक्षरां गिरमुदीरयति । 5 तत्र पुनरपरमभिमतविषये तिरश्चोपि मनुजस्येव संस्कारवतो बुद्धि-पूर्वा प्रवृत्तिः । तथा हि । अनेन समुत्क्षिप्तदक्षिणचरणेनोच्चार्य जय-शब्दमियमार्या मामुद्दिश्यातिस्फुटाक्षरं गीता । प्रायेण हि पक्षिणः पशवश्च भयाहारमैथुननिद्रासंज्ञामात्रवेदिनो भवन्ति । इदं तु महच्चि-त्रम् । इत्युक्तवति भूभुजि कुमारपालितः किंचित्स्मितवदनो नृप-10 मवादीत् । देव किमत्र चित्रम् । एते हि शुकसारिकाप्रभृतयो विहंगम-विशेषा यथाश्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन । तत्राप्यन्यज-न्मोपात्तसंस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उप-जायत इति नातिचित्रम् । अन्यदेतेषामपि पुरा पुरुषाणामिवातिपरि-स्फुटाभिधाना वागासीत् । अग्निशापात्त्वपरिस्फुटालापता शुका-15 नामुपजाता करिणां च जिह्वापरिवृत्तिः । इत्येवमुच्चारयत्येव तस्मिन्नशिशिरकिरणमम्बरतलस्य मध्यमारूढमावेदयन्नाडिकाच्छेद-प्रहतपटुपटहनादानुसारी मध्याह्नशङ्खध्वनिरुदतिष्ठत् । तमाकर्ण्य च समासन्नस्नानसमयो विसर्जितराजलोकः क्षितिपतिरास्थानमण्डपादु-त्तस्थौ ।

20 अथ चलति महीपतावन्योन्यमतिरभसंसंचलनचालिताङ्गदपत्त्रभ-ङ्गमकरकोटिपाटितांशुकपटानामाक्षेपदोलायमानकण्ठदाम्नामंसस्थलोल्ल-सितकुङ्कुमपटवासधूलिपिञ्जरितदिशामालोलमालतीकुसुमशेखरोत्पतद-लिकदम्बकानामर्धावलम्बिभिः कर्णोत्पलैश्चुम्ब्यमानगण्डस्थलानां गम-नप्रणामलालसानामहमहमिकया वक्षःस्थलप्रेङ्खोलितहारलतानामुत्तिष्ठ-25 तामासीदतिमहान्संभ्रमो महीपतीनाम् । इतश्चेतश्च निष्पतन्तीनां स्कन्धदेशावसक्तचामराणां चामरग्राहिणीनां कमलमधुपानमत्तजर-

रुकलहंसनादजर्जरेण पदे पदे प्रणितमणीनां मणिनूपुराणां निनादेन वारविलासिनीजनस्य संचरतो जघनस्थलास्फालनरसितरत्नमालिकानां मेखलानां मनोहारिणा झंकारेण नूपुररवाकृष्टानां च धवलितास्थानमण्डपसोपानफलकानां भवनदीर्घिकाकलहंसकानां कोलाहलेन रसनारसितोत्सुकितानां च तारतरविराविणामुल्लिख्यमानकांस्यक्रेंकार- 5
दीर्घेण गृहसारसानां कूजितेन सरभसप्रचलितसामन्तशतचरणतलाभिहतस्य चास्थानमण्डपस्य निर्घातनिर्घोषगम्भीरेण कम्पयतेव वसुमतीं ध्वनिना प्रतीहारिणां च पुरः ससंभ्रमं समुत्सारितजनानां दण्डिनां समारब्धहेलमुच्चैरुच्चारयतामालोकयतालोकयतेति तारतरदीर्घेण भवनप्रासादकुक्षिषूच्चरितप्रतिशब्दतया दीर्घतामुपगतेनालो- 10
कशब्देन राज्ञां च ससंभ्रमावर्जितमौलिलोलचूडामणीनां प्रणमताममलमणिशलाकादन्तुराभिः किरीटकोटिभिरुल्लिख्यमानस्य मणिकुट्टिमस्य स्वनेन प्रणामपर्यस्तानामतिकठिनमणिकुट्टिमनिपतितरणरणायितानां च मणिकर्णपूराणां निनादेन मङ्गलपाठकानां च पुरोयायिनां जय जीवेति मधुरवचनानुयातेन पठतां दिगन्तव्यापिना 15
कलकलेन प्रचलितजनचरणशतसंक्षोभभयादपहाय कुसुमप्रकरमुत्पततां च मधुलिहां हुंकृतेन संक्षोभादतित्वरितपदप्रवृत्तैरवनिपतिभिः केयूरकोटिताडितानां क्वणितमुखररत्नदाम्नां च मणिस्तम्भानां रणितेन सर्वतः क्षुभितमिव तदास्थानभवनमभवत्।

अथ विसर्जितराजलोको विश्रम्यतामिति स्वयमेवाभिधाय तां 20
चाण्डालकन्यकां वैशम्पायनः प्रवेश्यतामभ्यन्तरमिति ताम्बूलकरङ्कवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यन्तरं प्राविशत्। अपनीताशेषभूषणश्च दिवसकर इव विगलितकिरणजालश्चन्द्रतारकासमूहशून्य इव गगनाभोगः समुपाहृतसमुचितव्यायामोपकरणां व्यायामभूमिमयासीत्। स तस्यां च समानवयोभिः 25
सह राजपुत्रैः कृतमधुरव्यायामः श्रमवशादुन्मिषन्तीभिः कपो-

लयोरीषदवदलितसिन्धुवारकुसुममञ्जरीविभ्रमाभिरुरसि निर्दयश्रम-
च्छिन्नहारविगलितमुक्ताफलप्रकरानुकारिणीभिर्ललाटपट्टकेऽष्टमीचन्द्रश-
कलतलोल्लसदमृतबिन्दुविडम्बिनीभिः स्वेदजलकणिकासंततिभिरलं-
क्रियमाणमूर्तिरितस्ततः स्नानोपकरणसंपादनसत्वरेण पुरः प्रधावता
5 परिजनेन तत्कालं विरलजनेपि राजकुले समुत्सारणाधिकारमुचित-
माचरद्भिर्दण्डिभिरुपदिश्यमानमार्गो विततसितवितानामनेकचारण-
गणाबध्यमानमण्डलां गन्धोदकपूर्णकनकमयजलद्रोणीसनाथमध्या-
मुपस्थापितस्फाटिकस्नानपीठामेकान्तनिहितैरतिसुरभिगन्धसलिलपूर्णैः
परिमलावकृष्टमधुकरकुलान्धकारितमुखैरातपभयान्नीलकर्पटावगुण्ठित-
10 मुखैरिव स्नानकलशैरुपशोभितां स्नानभूमिमगच्छत्। अवतीर्णस्य
जलद्रोणीं वारविलासिनीकरमृदितसुगन्धामलकोपलिप्तशिरसो राज्ञः
समन्तात्समुपतस्थुरंशुकनिबिडनिबद्धस्तनपरिकरा दूरसमुत्सारितव-
लयबाहुलताः समुत्क्षिप्तकर्णाभरणाः कर्णोत्सङ्गोत्सारितालका
गृहीतजलकलशाः स्नानार्थमभिषेकदेवता इव वारयोषितः। ताभिश्च
15 समुन्नतकुचकुम्भमण्डलाभिर्वारिमध्यप्रविष्टः करिणीभिरिव वनकरी
परीवृतस्तत्क्षणं राजा रराज। जलद्रोणीसलिलादुत्थाय च स्नान-
पीठममलस्फटिकधवलं वरुण इव राजहंसमारुरोह। ततस्ताः
काश्चिन्मरकतकलशप्रभाश्यामायमाना नलिन्य इव मूर्तिमत्यः
पत्रपुटैः, काश्चिद्रजतकलशहस्ता रजन्य इव पूर्णचन्द्रमण्डलविनि-
20 र्गतेन ज्योत्स्नाप्रवाहेण, काश्चित्कलशोत्क्षेपश्रमस्वेदार्द्रशरीरा जल-
देवता इव स्फाटिकैः कलशैस्तीर्थजलेन, काश्चिन्मलयसरित इव
चन्दनरसमिश्रेण सलिलेन, काश्चिदुत्क्षिप्तकलशपार्श्वविन्यस्तहस्त-
पल्लवाः प्रकीर्यमाणनखमयूखजालकाः प्रत्यङ्गुलिविवरविनिर्गतजल-
धाराः सलिलयन्त्रदेवता इव, काश्चिज्जाड्यमपनेतुमाक्षिप्तबालात-
25 पेनेव दिवसश्रिय इव कनककलशहस्ताः कुङ्कुमजलेन। वाराङ्गनाः
क्रमेण राजानमभिषिषिचुः। अनन्तरमुदपादि च स्फोटयन्निव श्रुति-

प्रथमनेकप्रहतपटुपटहझल्लरीमृदङ्गवेणुवीणागीतनिनादानुगम्यमानो ब-न्दिवृन्दकोलाहलाकुलो भुवनविवरव्यापी स्नानशङ्खानामापूर्यमाणा-नामतिमुखरो ध्वनिः।

एवं च क्रमेण निर्वर्तिताभिषेको विषधरनिर्मोकपरिलघुनी धवले परिधाय धौतवाससी शरदम्बरैकदेश इव जलक्षालनविमलतनुर- 5 तिधवलजलधरच्छेदशुचिना दुकूलपटपल्लवेन तुहिनगिरिरिव गगन-सरित्स्रोतसा कृतशिरोवेष्टनः संपादितपितृजलक्रियो मन्त्रपूतेन तो-याञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत्। उपरचितपशुपति-पूजनश्च निष्क्रम्य देवगृहान्निर्वर्तिताग्निकार्यो विलेपनभूमौ झंकारि-भिरलिकदम्बकैरनुबध्यमानपरिमलेन मृगमदकर्पूरकुङ्कुमवाससुरभिणा 10 चन्दनेनानुलिप्तसर्वाङ्गो विरचितामोदिमालतीकुसुमशेखरः कृताम्बरप-रिवर्तो रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सह भूपतिभिराहारम-भिमतरसास्वादजातप्रीतिरवनिपो निर्वर्तयामास।

परिपीतधूपधूमवर्तिरुपस्पृश्य च गृहीतताम्बूलस्तस्मात्प्रमृष्टमणि-कुट्टिमात्प्रदेशादुत्थाय नातिदूरवर्तिन्या ससंभ्रमप्रधावितया प्रती- 15 हार्या प्रसारितबाहुमवलम्ब्यानवरतवेत्रलताग्रहणप्रसङ्गातिजरठकिस-लयानुकारिकरतलकरेणाभ्यन्तरसंचारसमुचितेन परिजनेनानुगम्यमा-नो धवलांशुकजवनिकापरिगतपर्यन्ततया स्फटिकमणिमयभित्तिबद्धमि-वोपलक्ष्यमाणमतिसुरभिणा मृगनाभिपरिगतेनामोदिना चन्दनवारिणा सिक्तशिशिरमणिभूमिमविरलविप्रकीर्णेन विमलमणिकुट्टिमगगनतल- 20 तारागणेनेव कुसुमोपहारेण निरन्तरनिचितमुत्कीर्णशालभञ्जिकानि-वहेन संनिहितगृहदेवतेनेव गन्धसलिलक्षालितेन कलधौतमयेन स्त-म्भसंचयेन विराजमानमतिबहलागुरुधूपपरिमलमखिलविगलितजल-निवहधवलजलधरशकलानुकारिणा कुसुमामोदवासितप्रच्छदपटेन पट्टोपधानाध्यासितशिरोभाग्ना मणिमयप्रतिपादुकाप्रतिष्ठितपादेन 25 पार्श्वस्थरत्नपादपीठेन तुहिनगिरिशिलातलसदृशशयनेन सनाथीकृत-

वेदिकं भुक्त्वास्थानमण्डपमयासीत्। तत्र च शयनतलनिषण्णः क्षिति-
तलोपविष्टया शनैः शनैरुत्सङ्गनिहितासिलतया खड्गवाहिन्या नवन-
लिनदलकोमलेन करसंपुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरव-
निपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन्मुहूर्तमिवासांचक्रे।
5 ततो नातिदूरवर्तिनीमन्तःपुराद्वैशम्पायनमादायागच्छेति समुपजात-
तद्वृत्तान्तप्रश्नकुतूहलो राजा प्रतीहारीमादिदेश। सा क्षितितल-
निहितजानुकरतला यथाज्ञापयति देव इति शिरसि कृत्वाज्ञां
यथादिष्टमकरोत्।

अथ मुहूर्तादिव वैशम्पायनः प्रतीहार्या गृहीतपञ्जरः कनकवेत्र-
10 लतावलम्बिना किंचिदवनतपूर्वकायेन सितकञ्चुकावच्छन्नवपुषा ज-
राधवलितमौलिना गद्गदस्वरेण मन्दमन्दसंचारिणा विहंगजातिप्रीत्या
जरत्कलहंसेनेव कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम।
क्षितितलनिहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत्। देव देव्यो
विज्ञापयन्ति। देवादेशादेव वैशम्पायनः स्नातः कृताहारश्च देव-
15 पादमूलं प्रतीहार्यानीतः। इत्यभिधाय गते च तस्मिन्राजा वैशम्पा-
यनमपृच्छत्। कच्चिदभिमतमास्वादितमभ्यन्तरे भवता किंचिदशन-
जातमिति। स प्रत्युवाच। देव किं वा नास्वादितम्। आमत्तकोकि-
ललोचनच्छविर्नीलपाटलः कषायमधुरः प्रकाममापीतो जम्बूफलरसः।
हरिनखरभिन्नमत्तमातङ्गकुम्भमुक्तरक्तार्द्रमुक्ताफलत्विषि खण्डितानि
20 दाडिमबीजानि। नलिनीदलहरिन्ति द्राक्षाफलस्वादूनि च दलितानि
स्वेच्छया प्राचीनामलकीफलानि। किं वा प्रलपितेन बहुना। सर्व-
मेव देवीभिः स्वयं करतलोपनीयमानममृतायते। इत्येवंवादिनो वचन-
माक्षिप्य नरपतिरब्रवीत्। आस्तां तावत्सर्वमेवेदम्। अपनयतु नः
कुतूहलम्। आवेदयतु भवानादितः प्रभृति कार्त्स्न्येनात्मनो जन्म
25 कस्मिन्देशे। भवान्कथं जातः। केन वा नाम कृतम्। का माता।
कस्ते पिता। कथं वेदानामागमः। कथं शास्त्राणां परिचयः। कुतः

कलाः समासादिताः। किं जन्मान्तरानुस्मरणमुत वरप्रदानम्। अथवा विहंगवेषधारी कश्चिच्छन्नं निवससि। क्व वा पूर्वमुषितम्। कियद्वा वयः। कथं पञ्जरबन्धः। कथं चाण्डालहस्तगमनम्। इह वा कथमागमनमिति। वैशम्पायनस्तु स्वयमुपजातकुतूहलेन, सबहुमानमवनिपतिना पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत्। देव महतीयं 5 कथा। यदि कौतुकमाकर्ण्यताम्।

अस्ति पूर्वापरजलनिधिवेलावनलग्ना मध्यदेशालंकारभूता मेखलेव भुवो वनकरिकुलमदजलसेकसंवर्धितैरतिविकचधवलकुसुमनिकरमत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभिता मदकलकुररकुलदृश्यमानमरिचपल्लवा करिकलभकरमृदित- 10 तमालकिसलयामोदिनी मधुमदोपरक्तकेरलीकपोलकोमलच्छविना संचरद्वनदेवताचरणालक्तकरसरञ्जितेनेव पल्लवप्रचयेन संछादिता शुककुलदलितदाडिमीफलद्रवार्द्रीकृततलैरतिचपलकपिकम्पितकक्कोलच्युतपल्लवफलशबलैरनवरतनिपतितकुसुमरेणुपांसुलैः पथिकजनरचितलवङ्गपल्लवस्रस्तरैरतिकठोरनालिकेरकेतकीकरीरकेसरपरिगतप्रान्तैस्ताम्बू- 15 लीलतावनद्धपूगखण्डमण्डितैर्वनलक्ष्मीवासभवनैरिव विराजिता लतामण्डपैरुन्मदमातङ्गकपोलस्थलगलितमदसलिलसिक्तेनेव निरन्तरमेलालतावनेन मदगन्धिनान्धकारिता नखमुखलग्नेभकुम्भमुक्ताफललुब्धैः शबरसेनापतिभिरभिहन्यमानकेसरिशता प्रेताधिपनगरीव सदासंनिहितमृत्युभीषणा महिषाधिष्ठिता च समरोद्यतपताकिनीव बाणास- 20 नारोपितशिलीमुखा विमुक्तसिंहनादा च कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालंकृता च कर्णीसुतकथेव संनिहितविपुलाचला शशोपगता च कल्पान्तप्रदोषसंध्येव प्रनृत्तनीलकण्ठा पल्लवारुणा चामृतमथनवेलेव श्रीद्रुमोपशोभिता वारुणीपरिगता च प्रावृडिव घनश्यामलानेकशतह्रदालंकृता च चन्द्रमूर्तिरिव सततमृक्षसार्थानु- 25 गता हरिणाध्यासिता च राज्यस्थितिरिव चमरमृगवालव्यजनोप-

शोभिता समदगजघटापरिपालिता च गिरितनयेव स्थाणुसंगता मृगपतिसेविता च जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता च कामिनीव चन्दनमृगमदपरिमलवाहिनी रुचिरागुरुतिलकभूषिता च सोत्कण्ठेव विविधपल्लवानिलवीजिता समदना च बालग्रीवेव
5 व्याघ्रनखपङ्क्तिमण्डिता गण्डकाभरणा च पानभूमिरिव प्रकटितमधुकोशकशता प्रकीर्णविविधकुसुमा च क्वचित्प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणिमण्डला क्वचिद्दशमुखनगरीव चटुलवानरवृन्दभज्यमानतुङ्गशालाकुला क्वचिदचिरनिर्वृत्तविवाहभूमिरिव हरितकुशसमित्कुसुमशमीपलाशशोभिता क्वचिदुद्वृत्तमृगपतिनादभीतेव कण्ट-
10 किता क्वचिन्मत्तेव कोकिलकुलप्रलापिनी क्वचिदुन्मत्तेव वायुवेगकृततालशब्दा क्वचिद्विधवेवोन्मुक्ततालपत्त्रा क्वचित्समरभूमिरिव शरशतनिचिता क्वचिदमरपतितनुरिव नेत्रसहस्रसंकुला क्वचिन्नारायणमूर्तिरिव तमालनीला क्वचित्पार्थरथपताकेव वानराक्रान्ता क्वचिदवनिपतिद्वारभूमिरिव वेत्रलताशतदुष्प्रवेशा क्वचिद्विराटनगरीव
15 कीचकशतावृता क्वचिदम्बरश्रीरिव व्याधानुगम्यमानतरलतारकमृगा क्वचिद्गृहीतव्रतेव दर्भचीरजटावल्कलधारिण्यपरिमितबहुलपत्त्रसंचयापि सप्तपर्णभूषिता क्रूरसत्त्वापि मुनिजनसेविता पुष्पवत्यपि पवित्रा विन्ध्याटवी नाम ।

तस्यां च दण्डकारण्यान्तःपाति सकलभुवनतलख्यातमुत्पत्तिक्षेत्र-
20 मिव भगवतो धर्मस्य सुरपतिप्रार्थनापीतसकलसागरसलिलस्य मेरुमत्सराद्गगनतलप्रसारितविकटशिरःसहस्रेण दिवसकररथगमनपथमपनेतुमभ्युद्यतेनावगणितसकलसुरसमूहवचसा विन्ध्यगिरिणाप्यनुल्लङ्घिताज्ञस्य जठरानलजीर्णवातापिदानवस्य सुरासुरमुकुटमकरपत्त्रकोटीचुम्बितचरणरजसो दक्षिणाशामुखविशेषकस्य सुरलोकादेकहुंकार-
25 निपातितनहुषप्रकटप्रभावस्य भगवतो महामुनेरगस्त्यस्य भार्यया लोपामुद्रया स्वयमुपरचितालवालकैः करपुटसलिलसेकसंवर्धितैः सुत-

निर्विशेषैरुपशोभितं पादपैस्तत्पुत्रेण च गृहीतव्रतेनाषाढिना पवित्र-
भस्मविरचितत्रिपुण्ड्रकाभरणेन कुशचीरवाससा मुञ्जमेखलाकलित-
मध्येन गृहीतहरितपर्णपुटेन प्रत्युटजमटता भिक्षां दृढदस्युनाम्ना पवि-
त्रीकृतमतिप्रभूतेध्माहरणाच्च यस्येध्मवाह इति पिता द्वितीयं नाम
चकार दिशि दिशि शुकहरितैश्च कदलीवनैः श्यामलीकृतपरिसरं 5
सरिता च कलशयोनिपरिपीतसागरमार्गानुगतयेव वद्धवेणिकया
गोदावर्या परिगतमाश्रमपदमासीत्।

यत्र च दशरथवचनमनुपालयन्नुत्सृष्टराज्यो दशवदनलक्ष्मीवि-
भ्रमविरामो रामो महामुनिमगस्त्यमनुचरन्सह सीतया लक्ष्मणोपर-
चितरुचिरपर्णशालाः पञ्चवट्यां कंचित्कालं सुखमुवास। चिरशून्ये- 10
ष्वापि यत्र शाखानिलीननिभृतपाण्डुकपोतपङ्क्तयो लग्नतापसाग्नि-
होत्रधूमराजय इव लक्ष्यन्ते तरवः। बलिकर्मकुसुमान्युद्धरन्त्याः सी-
तायाः करतलादिव संक्रान्तो यत्र रागः स्फुरति लताकिसलयेषु।
यत्र च पीतोद्गीर्णं जलनिधिजलमिव मुनिना निखिलमाश्रमोपान्त-
वर्तिषु विभक्तं महाह्रदेषु। यत्र दशरथसुतनिशितशरनिकरनिपात- 15
निहतरजनिचरबलबहुलरुधिरसिक्तमूलमद्यापि तद्रागाविद्धनिर्गतप-
लाशमिवाभाति नवकिसलयमरण्यम्। अधुनापि यत्र जलधरस-
मये गम्भीरमभिनवजलधरनिवहनिनादमाकर्ण्य भगवतो रामस्य
त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरन्तो न गृह्णन्ति शष्पकवलमज-
स्रमश्रुजललुलितदीनदृष्टयो वीक्ष्य शून्या दश दिशो जराजर्जरित- 20
विषाणकोटयो जानकीसंवर्धिता जीर्णमृगाः। यस्मिन्ननवरतमृगया-
निहतशेषवनहरिणप्रोत्साहित इव कृतसीताविप्रलम्भः कनकमृगो
राघवमतिदूरं जहार। यत्र च मैथिलीवियोगदुःखदुःखितौ दशवद-
नविनाशपिशुनौ चन्द्रसूर्याविव कवन्धग्रस्तौ समं रामलक्ष्मणौ त्रि-
भुवनभयं महच्चक्रतुः। अत्यायतश्च यस्मिन्दशरथसुतशरनिपाति- 25
तो योजनबाहोर्बाहुरगस्त्यप्रसादनागतनहुषाजगरकायशङ्कामकरोदृषि-

जनस्य। जनकतनया च भर्त्रा विरहविनोदनार्थमुटजाभ्यन्तरलिखिता यत्र रामनिवासदर्शनोत्सुका पुनरिव धरणितलादुल्लसन्ती वनचरैर-द्याप्यालोक्यते।

तस्य चैवंविधस्य संप्रत्यपि प्रकटोपलक्ष्यमाणपूर्ववृत्तान्तस्याग-
5 स्त्याश्रमस्य नातिदूरे जलनिधिपानप्रकुपितवरुणोत्साहितेनागस्त्यम-त्सरात्तदाश्रमसमीपवर्त्यपर इव वेधसा महाजलनिधिरुत्पादितः प्रलयकालविघटिताष्टदिग्भागसंधिबन्धं गगनतलमिव भुवि नि-पतितमादिवराहसमुद्धृतधरामण्डलस्थानमिव सलिलपूरितमनवरत-मज्जदुन्मदशबरकामिनीकुचकलशलुलितजलमुत्फुल्लकुमुदकुवलयकह्लार-
10 मुन्निद्रारविन्दमधुबिन्दुनिस्यन्दबद्धचन्द्रकमलिकुलपटलान्धकारितसौग-न्धिकमारसितसमदसारसमम्बुरुहमधुपानमत्तकलहंसकामिनीकृतको-लाहलमनेकजलचरपतंगशतसंचलनचञ्चलितवाचालवीचिमालमनिलो-ल्लासितकल्लोलशिखरसीकरारब्धदुर्दिनमशङ्कितावतीर्णाभिरम्भःक्रीडा-रागिणीभिः स्नानसमये वनदेवताभिः केशपाशकुसुमैः सुरभीकृत-
15 मेकदेशावतीर्णमुनिजनापूर्यमाणकमण्डलुकलजलध्वनिमनोहरमुन्मिषदु-त्पलवनमध्यचारिभिः सवर्णतया रसितानुमेयैः कादम्बकदम्ब-कैरासेवितमभिषेकावतीर्णपुलिन्दराजसुन्दरीकुचचन्दनधूलिधवलितत-रंगमुपान्तजातकेतकीरजःपटलबद्धकूलपुलिनमासन्नाश्रमागततापसक्षा-लितार्द्रवल्कलकषायपाटलतटजलमुपतटविटपिपल्लवानिलवीजितमवि-
20 रलतमालवीथिकान्धकारिताभिर्वालिनिर्वासितेन संचरता प्रतिदिन-मृष्यमूकवासिना सुग्रीवेणावलुप्तफलपरिलघुलताभिरुद्वासितापसा-नां देवतार्चनोपयुक्तकुसुमाभिरुत्पतज्जलचरपतंगपक्षपुटविगलितजल-बिन्दुसेकसुकुमारकिसलयाभिर्लतामण्डपतलस्थितशिखण्डिमण्डलारब्ध-ताण्डवाभिरनेककुसुमपरिमलवाहिनीभिर्वनदेवताभिः श्वासवासिता-
25 भिरिव वनराजिभिरुपरुद्धतीरमपरसागराशङ्किभिः सलिलमादातुमव-तीर्णैर्जलधरैरिव बहलपङ्कमलिनैर्वनकरिभिरनवरतमापीयमानसलिल-

मगाधमनन्तमप्रतिममपां निधानं पम्पाभिधानं पद्मसरः। यत्र च चिक्कचकुवलयप्रभाश्यामायमानपत्त्रपुटान्यद्यापि मूर्तिमद्रामशापग्रस्तानीव मध्यचारिणालोक्यन्ते चक्रनाम्नां मिथुनानि।

तस्यैवंविधस्य पद्मसरसः पश्चिमे तीरे राघवशरप्रहारजर्जरितजीर्णतालतरुखण्डस्य च समीपे दिग्गजकरदण्डानुकारिणा जरदजगरेण सततमावेष्टितमूलतया बद्धमहालवाल इव तुङ्गस्कन्धावलम्बिभिरनिलवेल्लितैरहिनिर्मोकैर्धृतोत्तरीय इव दिक्चक्रवालपरिमाणमिव गृह्णता भुवनान्तरालविप्रकीर्णेन शाखासंचयेन प्रलयकालताण्डवप्रसारितभुजसहस्रमुडुपतिशकलशेखरमिव विडम्बयितुमुद्यतः पुराणतया पतनभयादिव गगनस्कन्धलग्नो निखिलशरीरव्यापिभिरतिदूरोन्नताभिर्जीर्णतया शिराभिरिव परिगतो व्रततिभिर्जरातिलकबिन्दुभिरिव कण्टकैराचिततनुरितस्ततः परिपीतसागरसलिलैर्गगनागतैः पत्त्ररथैरिव शाखान्तरेषु निलीयमानैः क्षणमम्बुभारालसैरार्द्रीकृतपल्लवैर्जलधरपटलैरप्यदृष्टशिखरदेशस्तुङ्गतया नन्दनवनश्रियमिवावलोकयितुमभ्युद्यतः समीपवर्तिनामुपरि संचरतां गगनतलगमनखेदायासितानां रविरथतुरङ्गमाणां सृक्वपरिस्रुतैः फेनपटलैः संदेहिततूलराशिभिर्धवलीकृतशिखरशाखो वनगजकपोलकण्डूयनलग्नमदनिलीनमत्तमधुकरमालेन लोहशृङ्खलाबन्धनिश्चलेनेव कल्पस्थायिना मूलेन समुपेतः कोटराभ्यन्तरनिविष्टैः स्फुरद्भिः सजीव इव मधुकरपटलैर्दुर्योधन इवोपलक्षितशकुनिपक्षपातो नलिननाभ इव वनमालोपगूढो नवजलधरव्यूह इव नभसि दर्शितोन्नतिरखिलभुवनतलावलोकनप्रासाद इव वनदेवतानामधिपतिरिव दण्डकारण्यस्य नायक इव सर्ववनस्पतीनां सखेव विन्ध्यस्य शाखाबाहुभिरुपगूह्येव विन्ध्याटवीमवस्थितो महाञ्जीर्णः शाल्मलीवृक्षः।

तत्र च शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसंधिषु जीर्णवल्कलविवरेषु महावकाशतया विश्रब्धविरचितकुलायसहस्राणि द्रु-

रारोहतया विगलितविनाशभयानि नानादेशसमागतानि शुकशकुनिकुलानि प्रतिवसन्ति स्म। यैः परिणामविरलदलसंहतिरपि स वनस्पतिरविरलदलनिचयश्यामल इवोपलक्ष्यते दिवानिशं निलीनैः। ते च तस्मिन्वनस्पतावतिवाह्यातिवाह्य रजनीमात्मनीडेषु प्रतिदिनमुत्था-
5 योत्थायाहारान्वेषणाय नभसि विरचितपङ्क्तयो मदकलहलधरहलमुखोत्क्षेपविकीर्णबहुस्रोतसमम्बरतले कलिन्दकन्यामिव दर्शयन्तः सुरगजोन्मूलितविगलदाकाशगङ्गाकमलिनीशङ्कामुपजनयन्तो दिवसकररथतुरगप्रभानुलिप्तमिव गगनतलमुपपादयन्तः संचारिणीमिव मरकतस्थलीं विडम्बयन्तः शैवलपल्लवावलिमिवाम्बरसरसि प्रसारय-
10 न्तो गगनविततैः पत्तपुटैः कदलीदलैरिव दिनकरखरकरनिकरपरिखेदिताशामुखानि वीजयन्तो वियति विसारिणीं शष्पवीथीमिवारचयन्तः सेन्द्रायुधमिवान्तरिक्षमादधाना विचरन्ति स्म शुकशुकनयः कृताहाराश्च पुनः प्रतिनिवृत्यात्मकुलायावस्थितेभ्यः शावकेभ्यो विविधान्फलरसान्कममञ्जरीविकारांश्च प्रहतहरिणरुधिरानुर-
15 क्तशार्दूलनखकोटिपाटलेन चञ्चुपुटेन दत्त्वा दत्त्वाधरीकृतसर्वस्नेहेनासाधारणेन गुरुणापत्यप्रेम्णा तस्मिन्नेव क्रोडान्तर्निहिततनयाः क्षपाः क्षपयन्ति स्म।

एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्तमानस्य कथमपि पितुरहमेवैको विधिवशात्सूनुरभवम्। अति-
20 प्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत्। अभिमतजायाविनाशशोकदुःखितोपि खलु तातः सुतस्नेहादन्तर्निगृह्य पटुप्रसरमपि शोकमेकाकी मत्संवर्धनपर एवाभवत्। अतिपरिणतवयाश्च कुशचीरानुकारिणीमल्पावशिष्टजीर्णपिच्छजालजर्जरामवस्रस्तांसदेशशिथिलामपगतोत्पतनसंस्कारां पक्षसंततिमुद्व-
25 हन्नुपारूढकम्पतया च संतापकारिणीमङ्गलग्नां जरामिव विधुन्वन्नकठोरशेफालिकाकुसुमनालपिञ्जरेण कलममञ्जरीदलनमदृणितक्षो-

णोपान्तलेखेन स्फुटिताग्रकोटिना चञ्चुपुटेन परनीडनिपतिताभ्यः शालिवल्लरीभ्यस्तण्डुलकणानादायादाय तरुमूलनिपतितानि शुककुलावदलितानि फलशकलानि समाहृत्य परिभ्रमितुमशक्तो मह्यमदात्। प्रतिदिवसमात्मना च मदुपभुक्तशेषमकरोदशनम्।

एकदा तु प्रभातसंध्यारागलोहिते गगनतलकमलिनीमधुरक्तपक्षसंपुटे वृद्धहंस इव मन्दाकिनीपुलिनादपरजलनिधितटमवतरति चन्द्रमसि परिणतरङ्कुरोमपाण्डुनि व्रजति विशालतामाशाचक्रवाले गजरुधिररक्तहरिसटालोमलोहिनीभिरातप्तलाक्षिकतन्तुपाटलाभिरायामिनीभिरशिशिरकिरणदीधितिभिः पद्मरागरत्नशलाकासंमार्जनीभिरिव समुत्सार्यमाणे गगनकुट्टिमकुसुमप्रकरे तारागणे संध्यामुपासितुमुत्तराशावलम्बिनि मानससरस्तीरमिवावतरति सप्तर्षिमण्डले तटगतविघटितशुक्तिसंपुटविप्रकीर्णमरुणकरप्रेरणाधोगलितमुडुगणमिव मुक्ताफलनिकरमुद्वहति धवलितपुलिनतटमुदन्वति पूर्वेतरे तुषारबिन्दुवर्षिणि विबुद्धशिखिकुले विजृम्भमाणकेसरिणि करिणीकदम्बकप्रबोध्यमानसमदकरिणि त्तपाजलजडकेसरं कुसुमनिकरमुदयगिरिशिखरस्थितं सवितारमिवोद्दिश्य पल्लवाञ्जलिभिः समुत्सृजति कानने रासभरोमधूसरासु वनदेवताप्रासादानां तरूणां शिखरेषु पारावतमालायमानासु धर्मपताकास्विव समुन्मिषन्तीषु तपोवनाग्निहोत्रधूमलेखास्ववश्यायसीकरिणि लुलितकमलवने रतिखिन्नशबरसीमन्तिनीस्वेदजलकणिकापहारिणि वनमहिषरोमन्थफेनबिन्दुवाहिनि चलितपल्लवलतालास्योपदेशव्यसनिनि विघटमानकमलखण्डमधुसीकरासारवर्षिणि कुसुमामोदतर्पितालिजाले निशावसानजातजडिम्नि मन्दमन्दसंचारिणि प्रवाति प्राभातिके मातरिश्वनि कमलवनप्रबोधमङ्गलपाठकानामिभगण्डडिण्डिमानां मधुलिहां कुमुदोदरेषु घनघटमानदलपुटनिबद्धपक्षसंहतीनामुच्चरत्सु हुंकारेषु प्रभातशिशिरमारुताहतमुत्तप्तजतुरसाश्लिष्टपक्ष्ममालमिव सशेषनिद्राजिह्मतारं चक्षुरु-

न्मीलतत्सु शनैः शनैरूषरशय्याधूसरक्रोडरोमराजिषु वनमृगेष्वितस्ततः संचरत्सु वनचरेषु विजृम्भमाणे श्रोत्रहारिणि पम्पासरःकलहंसकोलाहले समुल्लसति नर्तितशिखण्डिमण्डले मनोहरे वनगजकर्णतालशब्दे क्रमेण च गगनतलमार्गमवतरतो दिवसकरवारण-
5 स्यावचूलचामरकलाप इवोपलक्ष्यमाणे मञ्जिष्ठारागलोहिते किरणजाले शनैः शनैरुदिते भगवति सवितरि पम्पासरःपर्यन्ततरुशिखरसंचारिण्यध्यासितगिरिशिखरे दिवसकरजन्मनि हततारे पुनरिव कपीश्वरे वनमभिपतति बालातपे स्पष्टे जाते प्रत्यूषसि नचिरादिव दिवसाष्टमभागभाजि स्पष्टभासि भास्वति भूते प्रयातेषु यथाभिमतानि
10 दिगन्तराणि शुककुलेषु कुलायनिलीननिभृतशावकसनाथेपि निःशब्दतया शून्य इव तस्मिन्वनस्पतौ स्वनीडावस्थित एव ताते मयि च शैशवादसंजातबलसमुद्भिद्यमानपक्षपुटे तातस्य समीपवर्तिनि कोटरगते सहसैव तस्मिन्महावने संत्रासितसकलवनचरः सरभसमुत्पतत्पतत्रिपक्षपुटशब्दसंततो भीतकरिपोतचीत्कारपीवरः प्रचलितलताकुलि-
15 तमत्तालिकुलक्वणितमांसलः परिभ्रमदुद्घोणवनवराहरवघर्घरो गिरिगुहासुप्तप्रबुद्धसिंहनादोपबृंहितः कम्पयन्निव तरून्भगीरथावतार्यमाणगङ्गाप्रवाहकलकलबहलो भीतवनदेवताकर्णितो मृगयाकोलाहलध्वनिरुदचरत्। आकर्ण्य च तमहमश्रुतपूर्वमुपजातवेपथुरर्भकतया जर्जरितकर्णविवरो भयविह्वलः समीपवर्तिनः पितुः प्रतीकारबुद्ध्या ज-
20 राशिथिलपक्षपुटान्तरमविशम्।

अनन्तरं च सरभसमितो गजयूथपतिलुलितकमलिनीपरिमल इतः क्रोडकुलदश्यमानभद्रमुस्तारसामोद इतः करिकलभभज्यमानसल्लकीकषायगन्ध इतो निपतितशुष्कपत्रमर्मरध्वनिरितो वनमहिषविषाणकोटिकुलिशभिद्यमानवल्मीकधूलिरितो मृगकदम्बकमितो
25 वनगजकुलमितो वनवराहयूथमितो वनमहिषवृन्दमितः शिखण्डिमण्डलविरुतमितः कपिञ्जलकुलकलकूजितमितः कुररकुलक्वणि-

त्मितो मृगपतिनखभिद्यमानकुम्भकुञ्जररसितमियमार्द्रपङ्कमलिना व-
राहपद्धतिरियमभिनवशष्पकवलरसश्यामला हरिणरोमन्थफेनसंह-
तिरियमुन्मदगन्धगजगण्डकण्डूयनपरिमलालीनमुखरमधुकरविरुतिरेषा
निपतितरुधिरबिन्दुसिक्तशुष्कपत्त्रपाटला रुरुपदव्येतद्द्विरदचरणमृदि-
तविटपपल्लवपटलमेतत्खड्गिकुलक्रीडितमेष नखकोटिविलिखितविकट- 5
पत्त्रलेखो रुधिरपाटलः करिमौक्तिकदलदन्तुरो मृगपतिमार्ग एषा प्र-
त्यग्रप्रसूतवनमृगीगर्भरुधिरलोहिनी भूमिरियमटवीवेणिकानुकारिणी
पत्त्रचरस्य यूथपतेर्मदजलमलिना संचारवीथी चमरीपङ्क्तिरियमनुग-
म्यतामुच्छुष्कमृगकरीषपांसुला त्वरिततरमध्यास्यतामियं वनस्थली
तरुशिखरमारुह्यतामालोक्यतां दिगियमाकर्ण्यतामयं शब्दो गृह्यतां 10
धनुरवहितैः स्थीयतां विमुच्यन्तां श्वान इत्यन्योन्यमभिवदतो मृग-
यासक्तस्य महतो जनसमूहस्य तरुगहनान्तरितविग्रहस्य क्षोभितका-
ननं कोलाहलमशृणवम्।

अथ नातिचिरादिवानुलेपनार्द्रमृदङ्गध्वनिधीरेण गिरिविवरविजृ-
म्भितप्रतिनादगम्भीरेण शबरशरताडितानां केसरिणां निनादेन संत्र- 15
स्तयूथमुक्तानामेकाकिनां च संचरतामनवरतकरास्फोटमिश्रेण जल-
धररसितानुकारिणा गजयूथपतीनां कण्ठगर्जितेन सरभससारमेय-
विलुप्यमानावयवानामालोलकातरतरलतारकाणामेणकानां च करुण-
कूजितेन निहतयूथपतीनां वियोगिनीनामनुगतकलभानां च स्थित्वा
स्थित्वा समाकर्ण्य कलकलमुत्कर्णपल्लवानामितस्ततः परिभ्रमन्तीनां 20
प्रत्यग्रपतिविनाशशोकदीर्घेण करिणीनां चीत्कृतेन कतिपयदिवस-
प्रसूतानां च खड्गिधेनुकानां त्रासपरिभ्रष्टपोतान्वेषिणीनामुन्मुक्तकण्ठ-
मतिकरुणमारसन्तीनामाक्रन्दितेन तरुशिखरसमुत्पतितानामाकुला-
कुलचारिणां च पत्त्ररथानां कोलाहलेन रूपानुसारप्रधावितानां च
मृगयूनां युगपदतिरभसपादपाताभिहताया भुवः कम्पमिव जनयता 25
चरणशब्देन कर्णान्ताकृष्टज्यानां च मदकलकुररकामिनीकण्ठकूजित-

कलेन शरनिकरवर्षिणां धनुषां निनादेन पवनाहतिक्कणितधा-
राणामसीनां च कठिनमहिषस्कन्धपीठपातिनां रणितेन शुनां च सरभ-
सविमुक्तघर्घरध्वनीनां वनान्तरव्यापिना ध्वानेन सर्वतः प्रचलितमि-
व तदरण्यमभवत्। अचिराच्च प्रशान्ते तस्मिन्मृगयाकलकले निर्वृ-
5 ष्टमूकजलधरवृन्दानुकारिणि मथनावसानोपशान्तवारिणि सागर इव
स्तिमिततामुपागते कानने मन्दीभूतभयोहमुपजातकुतूहलः पितुरुत्स-
ङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य संत्रासतरल-
तारकः शैशवात्किमिदमिति समुपजातदिदृक्षस्तामेव दिशं चक्षुः
प्राहिणवम्।

10 अभिमुखमापतंच्च तस्माद्वनान्तरादर्जुनभुजदण्डसहस्रविप्रकीर्णमिव
नर्मदाप्रवाहमनिलवशाच्चलितमिव तमालकाननमेकीभूतमिव कालरा-
त्रीणां यामसंघातमञ्जनशिलास्तम्भसंभारमिव क्षितिकम्पविघूर्णितम-
न्धकारपुञ्जमिव रविकिरणाकुलितमन्तकपरिवारमिव परिभ्रमन्तम-
वदारितरसातलोद्भूतमिव दानवलोकमशुभकर्मसमूहमिवैकत्र समाग-
15 तमशेषदण्डकारण्यवासिमुनिजनशापसार्थमिव संचरन्तमनवरतशर-
निकरवर्षिरामनिहतखरदूषणबलनिवहमिव तद्पध्यानात्पिशाचतामुप-
गतं कलिकालबन्धुवर्गमिवैकत्र संगतमवगाहप्रस्थितमिव वनमहिषयू-
थमचलशिखरस्थितकेसरिकराकृष्टिपतनविशीर्णमिव कालमेघपटलम-
खिलरूपविनाशाय धूमकेतुजालमिव समुद्गतमन्धकारितकाननमनेक-
20 सहस्रसंख्यमतिभयजनकमुत्पातवेतालव्रातमिव शबरसैन्यमद्राक्षम्।

मध्ये च तस्यातिमहतः शबरसैन्यस्य प्रथमे वयसि वर्तमानम-
तिकर्कशत्वादायसमिव निर्मितमेकलव्यमिव जन्मान्तरागतमुद्भि-
द्यमानश्मश्रुराजितया प्रथममदलेखामण्ड्यमानगण्डभित्तिमिव गज-
यूथपतिकुमारकमसितकुवलयश्यामेन देहप्रभाप्रवाहेण कालिन्दीज-
25 लेनेव पूरितारण्यमाकुटिलाग्रेण स्कन्धावलम्बिना कुन्तलभारेण केस-
रिणमिव गजमदमलिनीकृतेन केसरकलापेनोपेतमायतललाटमतितुङ्ग-

घोरघोणमेककर्णाभरणतामुपनीतस्य भुजंगफणमणेरापाटलैरंशुभिरालोहितीकृतेन पर्णशयनाभ्यासाल्लग्नपल्लवरागेणेव वामपार्श्वेन विराजमानमचिरप्रहतगजकपोलगृहीतेन सप्तच्छदपरिमलवाहिना कृष्णागुरुपङ्केणेव सुरभिणा मदेन कृताङ्गरागमुपरि तत्परिमलान्धेन भ्रमता मायूरातपत्रानुकारिणा मधुकरकुलेन तमालपल्लवेनेव निवारितातपमालोलकर्णपल्लवव्याजेन भुजबलनिर्जितया भयप्रयुक्तसेवया विन्ध्याटव्येव करतलेनापमृज्यमानगण्डस्थलस्वेदलेखमापाटलया हरिणकुलक्षयरात्रिसंध्यायमानया शोणितार्द्रयेव दृष्ट्या रञ्जयन्तमाशाविभागानाजानुलम्बेन कुञ्जरकरप्रमाणमिव गृहीत्वा निर्मितेन चण्डिकारुधिरबलिप्रदानार्थमसकृन्निशितशस्त्रोल्लेखविषमितशिखरेण भुजयुगलेनोपशोभितमन्तरान्तरालग्नश्यानहरिणरुधिरबिन्दुना स्वेदजलकणिकाचितेन गुञ्जाफलविमिश्रैः करिकुम्भमुक्ताफलैरिव रचिताभरणेन विन्ध्यशिलातलविशालेन वक्षःस्थलेनोद्भासमानमविरतश्रमाभ्यासादुल्लिखितोदरमिभमदमलिनमालानस्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन लाक्षालोहितकौशेयपरिधानमकारणेपि क्रूरतया बद्धत्रिपताकोग्रभ्रुकुटिकराले ललाटफलके प्रबलभक्त्याराधितया मत्परिग्रहोयमिति कात्यायन्या त्रिशूलेनेवाङ्कितमुपजातपरिचयैरनुगच्छद्भिः श्रमवशाद्दूरविनिर्गताभिः स्वभावपाटलतया शुष्काभिरपि हरिणशोणितमिव क्षरन्तीभिर्जिह्वाभिरावेद्यमानखेदैर्विवृतमुखतया स्पष्टदृष्टदन्तांशून्दंष्ट्रान्तराललग्नकेसरिसटानिव स्कन्धभागानुद्वहद्भिः स्थूलवराटकमालिकापरिगतकण्ठैर्महावराहदंष्ट्राप्रहारजर्जरैरल्पकायैरपि महाशक्तित्वादनुपजातकेसरैरिव केसरिकिशोरकैर्मृगवधूवैधव्यदीक्षादानदक्षैरनेकवर्णैः श्वभिरतिप्रमाणाभिश्च केसरिणामभयप्रदानयाचनार्थमागताभिः सिंहीभिरिव कौलेयककुटुम्बिनीभिरनुगम्यमानं कैश्चिद्गृहीतचमरवालगजदन्तभारैः कैश्चिदच्छिद्रपर्णबद्धमधुपुटैः कैश्चिन्मृगपतिभिरिव गजकुम्भमुक्ताफलनिकरसनाथपाणिभिः कैश्चिद्यातुधानैरि-

व गृहीतपिशितभारैः कैश्चित्प्रमथैरिव केसरिकृत्तिधारिभिः कैश्चि-
त्क्षपणकैरिव मयूरपिच्छवाहिभिः कैश्चिच्छिशुभिरिव काकपक्षधरैः
कैश्चित्कृष्णचरितमिव दर्शयद्भिः समुत्खातविधृतगजदन्तैः कैश्चि-
ज्जलदागमदिवसैरिव जलधरच्छायामलिनाम्बरैरनेकवृत्तान्तैः श-
5 बरवृन्दैः परिवृतमरण्यमिव सखड्गधेनुकमभिनवजलधरमिव मयू-
रपिच्छचित्रचापधारिणं बकराक्षसमिव गृहीतैकचक्रमरुणानुजमिवो-
द्धृतानेकमहानागदशनं भीष्ममिव शिखण्डिशत्रुं निदाघदिवसमिव
सततातविर्भूतमृगतृष्णं विद्याधरमिव मानसवेगं पराशरमिव यो-
जनगन्धानुसारिणं घटोत्कचमिव भीमरूपधारिणमचलराजकन्य-
10 काकेशपाशमिव नीलकण्ठचन्द्रकाभरणं हिरण्याक्षदानवमिव म-
हावराहदंष्ट्राविभिन्नवक्षःस्थलमतिरागिणमिव कृतबहुबन्दीपरिग्रहं पि-
शिताशनमिव रक्तलुब्धकं गीतकलाविन्यासमिव निषादानुगतम-
म्बिकात्रिशूलमिव महिषरुधिरार्द्रकायमभिनवयौवनमपि क्षपितबहु-
वयसं कृतसारमेयसंग्रहमपि फलमूलाशनं कृष्णमप्यसुदर्शनं स्व-
15 च्छन्दप्रचारमपि दुर्गैकशरणं क्षितिभृत्पादानुवर्तिनमपि राजसेवा-
नभिज्ञमपत्यमिव विन्ध्यस्यांशावतारमिव कृतान्तस्य सहोदरमिव
पापस्य सारमिव कलिकालस्य भीषणमपि महासत्त्वतया गम्भीर-
मिवोपलक्ष्यमाणमनभिभवनीयाकृतिं मातङ्गकनामानं शबरसेनाप-
तिमपश्यम् । अभिधानं तु पश्चात्तस्याहमश्रौषम् ।

20 आसीच्च मे मनसि । अहो मोहप्रायमेतेषां जीवितं साधुजनविग-
र्हितं च चरितम् । तथा हि । पुरुषपिशितोपहारे धर्मबुद्धिः ।
आहारः साधुजननिन्दितो मधुमांसादिः । श्रमो मृगया । शास्त्रं
शिवारुतम् । समुपदेष्टारः सदसतां कौशिकाः । प्रज्ञा शकुनिज्ञानम् ।
परिचिताः श्वानः । राज्यं शून्यास्वटवीषु । आपानकमुत्सवः । मि-
25 त्राणि क्रूरकर्मसाधनानि धनूंषि । सहाया विषदिग्धमुखा भुजंगा
इव सायकाः । गीतमुत्सादकारि मुग्धमृगाणाम् । कलत्राणि बन्दी-

गृहीताः पर्योषितः। क्रूरात्मभिः शार्दूलैः सह संवासः। पशुरुधिरेण देवतार्चनम्। मांसेन बलिकर्म। चौर्येण जीवनम्। भूषणानि भुजंगमणयः। वनगजमदैरङ्गरागः। यस्मिन्नेव कानने निवसन्ति तदेवोत्खातमूलमशेषतः कुर्वते। इति चिन्तयत्येव मयि स शबरसेनापतिरटवीभ्रमणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलीतरोरधश्छायायामवतारितकोदण्डस्त्वरितपरिजनोपनीतपल्लवासने समुपाविशत्। अन्यतमस्तु शबरयुवा ससंभ्रममवतीर्य तस्मात्करयुगलपरिक्षोभिताम्भसः सरसो वैडूर्यद्रवानुकारि प्रलयदिवसकरकिरणोपतापादम्बरैकदेशमिव विलीनमिन्दुमण्डलादिव प्रस्यन्दितं द्रुतमिव मुक्ताफलनिकरमत्यच्छतया स्पर्शानुमेयं हिमजडमरविन्दकोशरजःकषायमम्भः कमलिनीपत्रपुटेन प्रत्यग्रोद्धृतांश्च धौतपङ्कनिर्मलमृणालिकाः समुपाहरत्। आपीतसलिलश्च सेनापतिस्ता मृणालिकाः शशिकला इव सैंहिकेयः क्रमेणादशत्। अपगतश्रमश्चोत्थाय परिपीताम्भसा सकलेन तेन शबरसैन्येनानुगम्यमानः शनैःशनैरभिमतं दिगन्तरमयासीत्।

एकतमस्तु जरच्छबरस्तस्मात्पुलिन्दवृन्दादनासादितहरिणपिशितः पिशिताशन इवातिविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यलम्बत। अन्तरिते च शबरसेनापतौ स जीर्णशबरः पिबन्निवास्माकमायूंषि रुधिरबिन्दुपाटलया कपिलभ्रूलतापरिवेषभीषणया दृष्टया गणयन्निव शुककुलकुलायस्थानानि श्येन इव विहगामिषास्वादलालसः सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत् उत्क्रान्तिमिव तस्मिन्क्षणे तदालोकनभीतानां शुककुलानामसुभिः। किमिव हि दुष्करमकरुणानाम्। यतः स तमनेकतालतुङ्गमभ्रंकषशाखाशिखरमपि सोपानैरिवायत्नेनैव पादपमारुह्यताननुपजातोत्पतनशक्तीन्कांश्चिदल्पदिवसजातान्गर्भच्छविपाटलाञ्छाल्मलीकुसुमशङ्कामुपजनयतः कांश्चिदुद्भिद्यमानपक्षतया नलिनसंवर्तिकानुकारिणः कां-

श्चिदर्कफलसदृशान्कांश्चिल्लोहितायमानचञ्चूकोटीनीषद्विघटितदलपुटपाटलमुखानां कमलमुकुलानां श्रियमुद्वहतः कांश्चिदनवरतशिरःकम्पव्याजेन निवारयत इव प्रतीकारासमर्थानेकैकतया फलानीव तस्य वनस्पतेः शाखान्तरेभ्यः कोटरेभ्यश्च शुकशावकानग्रहीत्। अपगतासूंश्च
5 कृत्वा क्षितावपातयत्।

तातस्तु तं महान्तमकाण्ड एव प्राणहरप्रतीकारमुपप्लवमुपनतमालोक्य द्विगुणतरोपजातवेपथुर्मरणभयादुद्भ्रान्ततरलतारकां विषादशून्यामश्रुजलप्लुतां दृशमितस्ततो दिक्षु विक्षिपन्नुच्छुष्कतालुरात्मप्रतीकाराक्षमस्त्राससस्तसंधिशिथिलेन पक्षसंपुटेनाच्छाद्य मां तत्का-
10 लोचितप्रतीकारं मन्यमानः स्नेहपरवशो मद्रक्षणाकुलः किंकर्तव्यताविमूढः क्रोडविभागेन मामवष्टभ्य तस्थौ। असावपि पापः क्रमेण शाखान्तरैः संचरमाणः कोटरद्वारमागत्य जीर्णासितभुजंगभोगभीषणं प्रसार्य विविधवनवराहवसाविस्रगन्धि करतलं कोदण्डगुणाकर्षणव्रणाङ्कितप्रकोष्ठमन्तकदण्डानुकारिणं वामबाहुमतिनृशंसो मुहु-
15 र्मुहुर्दत्तचञ्चुप्रहारमुत्कूजन्तमाकृष्य तातमपगतासुमकरोत्। मां तु स्वल्पत्वाद्भयसंपिण्डिताङ्गत्वात्सावशेषत्वादायुषः कथमपि पक्षसंपुटान्तरगतं नालक्षयत्। उपरतं च तमवनितले शिथिलशिरोधरमधोमुखममुञ्चत्। अहमपि तच्चरणान्तराले प्रवेशितशिरोधरो निभृतमङ्कनिलीनस्तेनैव सहापतम्। अवशिष्टपुण्यतया तु पवनवशसंपु-
20 ञ्जितस्य महतः शुष्कपत्त्रराशेरुपरि पतितमात्मानमपश्यम्। अङ्गानि येन मे नाशीर्यन्त यावच्चासौ तस्मात्तरुशिखरान्नावतरति तावद्हमवशीर्णपर्णसवर्णत्वादस्फुटोपलक्ष्यमाणमूर्तिः पितरमुपरतमुत्सृज्य नृशंस इव प्राणपरित्यागयोग्येऽपि काले बालतया कालान्तरभुवः स्नेहरसस्यानभिज्ञो जन्मसहभुवा भयेनैव केवलमभिभूयमानः किं-
25 चिदुपजाताभ्यां पक्षाभ्यामीषत्कृतावष्टम्भो लुठन्नितस्ततः कृतान्तमुखकुहरादिव विनिर्गतमात्मानं मन्यमानो नातिदूरवर्तिनः शाब-

रसुन्दरीकर्णपूररचनोपयुक्तपल्लवस्य संकर्षणपटनीलच्छाययोपहसत इव गदाधरदेहच्छविमच्छैः कालिन्दीजलच्छेदैरिव विरचितच्छदस्य वनकरिमदसलिलैरिवोपसिक्तकिसलयस्य विन्ध्याटवीकेशपाशश्रियमुद्वहतो दिवाप्यन्धकारितशाखान्तरस्याप्रविष्टसूर्यकिरणमतिगहनमपरस्येव पितुरुत्सङ्गमतिमहतस्तमालविटपिनो मूलदेशमविशम्। 5

अवतीर्य स तेन समयेन क्षितितलविप्रकीर्णान्संहृत्य ताञ्छुकशिशूनेकलतापाशसंयतानाबध्य पर्णपुटेतित्वरितगमनः सेनापतिगतेनैव वर्त्मना तामेव दिशमगच्छत्। मां तु लब्धजीविताशं प्रत्यग्रपितृमरणशोकशुष्कहृदयमतिदूरपातादायासितशरीरं संत्रासजाता सर्वाङ्गोपतापिनी बलवती पिपासा परवशमकरोत्। अनया च 10 कालकलया सुदूरमतिक्रान्तः स पापकृदिति परिकलय्य किंचिदुन्नमितकंधरो भयचकितया दृशा दिशोवलोक्य तृणेपि चलति पुनः प्रतिनिवृत्त इति तमेव पदे पदे पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात्तमालतरुमूलात्सलिलसमीपमुपसर्तुं प्रयत्नमकरवम्।

अजातपक्षतया च नातिस्थिरचरणसंचारस्य मुहुर्मुहुर्मुखेन पततो 15 मुहुस्तिर्यङ्निपतन्तमात्मानमेकया पक्षपाल्या संधारयतः क्षितितलसंसर्पणश्रमातुरस्यानभ्यासवशादेकमपि दत्त्वा पदमनवरतमुन्मुखस्य स्थूलस्थूलं श्वसतो धूलिधूसरस्य संसर्पतो मम समभून्मनसि। अतिकष्टास्वप्यवस्थासु जीवितनिरपेक्षा न भवन्ति खलु जगति सर्वप्राणिनां प्रवृत्तयः। नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तूनाम्। 20 एवमुपरतेपि सुगृहीतनाम्नि ताते यदहमविकलेन्द्रियः पुनरेव प्राणिमि। धिङ्मामकरुणमतिनिष्ठुरमकृतज्ञम्। अहो सोढपितृमरणशोकदारुणं येन मया जीव्यते। उपकृतमपि नापेक्ष्यते। खलं हि खलु मे हृदयम्। मया हि लोकान्तरगतायामम्बायां नियम्य शोकवेगमाप्रसवदिवसात्परिणतवयसापि सता तैस्तैरुपायैर्मत्संवर्धनक्लेशमतिमहा- 25 न्तमपि स्नेहवशादगणयता यत्तातेन परिपालितस्तत्सर्वमेकपदे विस्मृ-

तम् । अतिकृपणाः खल्वमी प्राणाः । यदुपकारिणमपि तातमद्यापि
क्वापि गच्छन्तं नानुगच्छन्ति । सर्वथा न कंचिन्न खलीकरोति जीवि-
ततृष्णा । यदीदृगवस्थमपि मामयमायासयति जलाभिलाषः । मन्ये
चागणितपितृमरणशोकस्य निर्घृणतैव केवलमियं मम सलिलपान-
5 बुद्धिः । अद्यापि दूर एव सरस्तीरम् । तथा हि । जलदेवतानूपुररवा-
नुकारि दूरेऽद्यापि कलहंसविरुतमेतत् । अस्फुटानि श्रूयन्ते सारसरसि-
तानि । अयं च विप्रकर्षादाशामुखविसर्पणविरलः संचरति नलिनीख-
ण्डपरिमलः । दिवसस्य चेयमतिकष्टा दशा वर्तते । तथा हि । रविर-
म्बरतलमध्यवर्ती स्फुरन्तमातपमनवरतमनलधूलिनिकरमिव विकि-
10 रति करैः । अधिकामुपजनयति तृषामातपस्पर्शसंतप्तपांसुपटलदुर्गमा
भूमिः । अतिप्रबलपिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गानि ।
अप्रभुरस्म्यात्मनः । सीदति मे हृदयम् । अन्धकारतामुपयाति चक्षुः ।
अपि नाम खलो विधिरनिच्छतोपि मे मरणमद्योपपादयेत् ।

इत्येवं चिन्तयत्येव मयि तस्मात्सरसो नातिदूरवर्तिनि तपोवने
15 जाबालिर्नाम महातपा मुनिः प्रतिवसति स्म । तत्तनयश्च हारीतनामा
तापसकुमारकः सनत्कुमार इव सर्वविद्यावदातचेताः सवयोभि-
रपरैस्तपोधनकुमारकैरनुगम्यमानस्तेनैव पथा द्वितीय इव भगवान्वि-
भावसुरतितेजस्वितया दुर्निरीक्ष्यमूर्तिरुद्यतो दिवसकरमण्डलादिवो-
त्कीर्णस्तडिद्भिरिव रचितावयवस्तप्तकनकद्रवेणेव बहिरुपलिप्तमूर्तिरा-
20 पिशङ्गावदातया देहप्रभया स्फुरन्त्या सबालातपमिव दिवसं सदा-
वानलमिव वनमुपदर्शयन्नुत्तप्तलोहलोहिनीनामनेकतीर्थाभिषेकपूताना-
मंसस्थलावलम्बिनीनां जटानां निकरेणोपेतः स्तम्भितशिखाकलापः
खाण्डववनदिधक्षया कृतकपटवटुवेष इव भगवान्पावकस्तपोवनदेव-
तानूपुरानुकारिणा धर्मशासनकटकेनेव स्फाटिकेनाक्षवलयेन दक्षिण-
25 श्रवणावलम्बिना विराजमानः सकलविषयोपभोगनिवृत्त्यर्थमुपपा-
दितेन ललाटपट्टके त्रिसत्येनेव भस्मत्रिपुण्ड्रकेणालंकृतो गगनगमनो-

न्मुखचलाकानुकारिणा स्वर्गमार्गमिव दर्शयता सततमुद्ग्रीवेण स्फटिकमणिकमण्डलुनाध्यासितवामकरतलः स्कन्धदेशावलम्बिना कृष्णाजिनेन नीलपाण्डुभासा तपस्तृष्णानिपीतेनान्तर्निष्पतता धूमपटलेनेव परीतमूर्तिरभिनतविससूत्रनिर्मितेनेव परिलघुतया पवनलोलेन निर्मांसविरलपार्श्वकपञ्जरमिव गणयता वामांसावलम्बिना यज्ञोपवीतेनोद्भासमानो देवतार्चनार्थमागृहीतवनलताकुसुमपरिपूर्णपर्णपुटलनाथशिखरेणाषाढदण्डेन व्यापृतसव्येतरपाणिर्विषाणशिखरोत्खातामुद्वहता स्नानमृदमुपजातपरिचयेन नीवारमुष्टिसंवर्धितेन कुशकुसुमलतायास्यमानलोलदृष्टिना तपोवनमृगेणानुयातो विटप इव कोमलवल्कलावृतशरीरो गिरिरिव समेखलो राहुरिवासकृदास्वादितसोमः पद्मनिकर इव दिवसकरमरीचिपो नदीतटतरुरिव सततजलक्षालनविमलजटः करिकलभ इव विकचकुमुददलशकलसितदशनो द्रौणिरिव कृपानुगतो नक्षत्रराशिरिव चित्रमृगकृत्तिकाश्लेषोपशोभितो घर्मकालदिवस इव क्षपितबहुदोषो जलधरसमय इव प्रशमितरजःप्रसरो वरुण इव कृतोदवासो हरिरिवापनीतनरकभयः प्रदोषारम्भ इव संध्यापिङ्गलतारकः प्रभातकाल इव बालातपकपिलो रविरथ इव दृढनियमिताक्षचक्रः सुराजेव निगूढमन्त्रसाधनक्षपितविग्रहो जलनिधिरिव करालशङ्खमण्डलावर्तगर्तो भगीरथ इवासकृद्दृष्टगङ्गावतारो मधुकर इवासकृदनुभूतपुष्करवनवासो वनचरोपि कृतमहालयप्रवेशोऽसंयतोपि मोक्षार्थी सामप्रयोगपरोपि सततावलम्बितदण्डः सुप्तोपि प्रबुद्धः संनिहितनेत्रद्वयोपि परित्यक्तवामलोचनस्तदेव कमलसरः सिस्नासुरुपागमत्।

प्रायेणाकारणमित्राण्यतिकरुणार्द्राणि च सदा खलु भवन्ति सतां चेतांसि। यतः स मां तदवस्थमालोक्य समुपजातदयः समीपवर्तिनमृषिकुमारकमन्यतममब्रवीत्। अयं कथमपि शुकशिशुरसंजातपक्षपुट एव तरुशिखरादस्मात्परिच्युतः। श्येनमुखपरिभ्रष्टेन वानेन भवितव्यम्। तथा हि। अतिदवीयस्तया प्रपातस्याल्पशेषजीवितोय-

मामीलितलोचनो मुहुर्मुहुर्मुखेन पतति मुहुर्मुहुरत्युल्बणं श्वसिति मुहु-
र्मुहुश्चञ्चुपुटं विवृणोति। न शक्नोति शिरोधरां धारयितुम्। तदेहि या-
वदेवायमसुभिर्न वियुज्यते तावदेव गृहाणेममवतारय सलिलसमी-
पम्। इत्यभिधाय तेन मां सरस्तीरमनाययत्। उपसृत्य च जलसमी-
5 पमेकदेशनिहितदण्डकमण्डलुरादाय स्वयं मां मुक्तप्रयत्नमुत्तानितमु-
खमङ्गुल्या कतिचित्सलिलबिन्दूनपाययत्। अम्भःक्षोदकृतसेकं च स-
मुपजातनवीनप्राणमुपतटप्ररूढस्य नलिनीपलाशस्य जलशिशिरायां छा-
यायां निधाय समुचितमकरोत्स्नानविधिम्। अभिषेकावसाने चानेकप्रा-
णायामपूतो जपन्पवित्राण्यघमर्षणानि प्रत्यग्रभग्नैरुन्मुखो रक्तारविन्दै-
10 र्नलिनीपत्रपुटेन भगवते सवित्रे दत्त्वार्घमुदतिष्ठत्। आगृहीतधौतधवल-
वल्कलश्च सहज्योत्स्न इव संध्यातपः करतलनिर्धूननविशदजटः कमण्ड-
लुमापूर्य शुचिना सरोवारिणा प्रत्यग्रस्नानार्द्रजटेन सकलेन तेन मुनिकु-
मारककदम्बकेनानुगम्यमानो मां गृहीत्वा तपोवनाभिमुखं शनैरगच्छत्।

अनतिदूरमिव गत्वा दिशि दिशि सदासंनिहितकुसुमफलैस्ता-
15 लतिलकतमालहिन्तालबकुलबहुलैरेलालताकुलितनालिकेरीकलापैर्लो-
ललोध्रलवलीलवङ्गपल्लवैरुल्लसितचूतरेणुपटलैरलिकुलझंकारमुखरसह-
कारैरुन्मदकोकिलकुलकलापकोलाहलिभिरुत्फुल्लकेतकीरजःपुञ्जपिञ्जरैः
पूगीलतादोलाधिरूढवनदेवतैस्तारकावर्षमिवाधर्मविनाशपिशुनं कुसुम-
निकरमनिलचलितमनवरतमतिधवलमुत्सृजद्भिः संसक्तपादपैः का-
20 ननैरुपगूढमचकितप्रचलितकृष्णसारशतशबलाभिरुत्फुल्लकमलिनीलोहि-
नीभिर्मारीचमायामृगाचल्लूनरूढवीरुद्दलाभिर्दाशरथिचापकोटिक्षतकन्दग-
र्तविषमिततलाभिर्दण्डकारण्यस्थलीभिरुपशोभितप्रान्तमागृहीतसमित्कु-
शकुसुममृद्भिरध्ययनमुखरशिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनि-
भिरशून्योपकण्ठमुत्कण्ठितशिखण्डिमण्डलश्रूयमाणजलकलशपूरणध्वा-
25 नमनवरताज्याहुतिप्रीतैश्चित्रभानुभिः सशरीरमेव मुनिजनममर-
लोकं निनीषुभिरुद्धूयमानधूमलेखाछलेनाबध्यमानस्वर्गमार्गगमनसोपान-

सेतुमिवोपलक्ष्यमाणमासन्नवर्तिनीभिस्तपोधनसंपर्कादिवापगतकालुष्याभिस्तरंगपरंपरासंक्रान्तरविबिम्बपङ्क्तिभिस्तापसदर्शनागतसप्तर्षिमालाविगाह्यमानाभिरिवातिविकचकुमुदवनमृषिजनमुपासितुमवतीर्णं ग्रहगणमिव निशासूद्वहन्तीभिर्दीर्घिकाभिः परिवृतमनिलावनमितशिखराभिः प्रणम्यमानमिव वनलताभिरनवरतमुक्तकुसुमैरभ्यर्च्यमानमिव 5 पादपैरावद्धपल्लवाञ्जलिभिरुपास्यमानमिव विटपैरुटजाजिरप्रकीर्णशुष्यच्छ्यामाकमुपसंगृहीतामलकलवलीकर्कन्धूकदलीलकुचपनसचूततालफलमध्ययनमुखरवटुजनमनवरतश्रवणगृहीतवषट्कारवाचालशुककुलमनेकसारिकोद्घुष्यमाणसुब्रह्मण्यमरण्यकुक्कुटोपभुज्यमानवैश्वदेवबलिपिण्डमासन्नवापीकलहंसपोतभुज्यमाननीवारबलिमेणीजिह्वापल्लवोपलि- 10 ह्यमानमुनिबालकमग्निकार्यार्धदग्धसिमिसिमायमानसमित्कुशकुसुममुपलभग्ननालिकेररसस्निग्धशिलातलमचिरक्षुण्णवल्कलरसपाटलभूतलं रक्तचन्दनोपलिप्तादित्यमण्डलकनिहितकरवीरकुसुममितस्ततो विक्षिप्तभस्मलेखाकृतमुनिजनभोजनभूमिपरिहारं परिचितशाखामृगकराकृष्टिनिष्कास्यमानप्रवेश्यमानजरदन्धतापसमिभकलभकार्धोपभुक्तपतितैः स- 15 रस्वतीभुजलताविगलितैः शङ्खवलयैरिव मृणालशकलैः कल्माषितमृषिजनार्थमेणकैर्विषाणशिखरोत्खन्यमानविविधकन्दमूलमम्बुपूर्णपुष्करपुटैर्वनकरिभिरापूर्यमाणविटपालवालकमृषिकुमारकाकृष्यमाणवनवराहदंष्ट्रान्तराललग्नशालूकमुपजातपरिचयैः कलापिभिः पक्षपुटपवनसंधुक्ष्यमाणमुनिहोमहुताशनमारब्धामृतचरुचारुगन्धमर्धपक्वपुरोडाश- 20 पुण्यपरिमलामोदितमविच्छिन्नाज्यधाराहुतिहुतभुग्झंकारमुखरितमुपचर्यमाणातिथिवर्गं पूज्यमानपितृदैवतमर्च्यमानहरिहरपितामहमुद्दिश्यमानश्राद्धकल्पं व्याख्यायमानयज्ञविद्यमालोच्यमानधर्मशास्त्रं वाच्यमानविविधपुस्तकं विचार्यमाणसकलशास्त्रार्थमारभ्यमाणपर्णशालमुपलिप्यमानाजिरमुपमृज्यमानोटजाभ्यन्तरमाबध्यमानध्यानं साध्य- 25 मानमन्त्रमभ्यस्यमानयोगमुपह्रियमाणवनदेवताबलिं निर्वर्त्यमानमौ-

अमेखलं क्षाल्यमानवल्कलमुपसंगृह्यमाणसमिधमुपसंस्क्रियमाणकृष्णाजिनं गृह्यमाणगवेधुकं शोष्यमाणपुष्करबीजं ग्रथ्यमानाक्षमालं न्यस्यमानवेत्रदण्डं संस्क्रियमाणपरिव्राजकमापूर्यमाणकमण्डलुमदृष्टपूर्वं कलिकालस्यापरिचितमनृतस्याश्रुतपूर्वमनङ्गस्याब्जयोनिमिव त्रिभुव-
5 नवन्दितमसुरारिमिव प्रकटितवराहनरसिंहरूपं साङ्ख्यमिव कपिलाधिष्ठितं मधुरोपवनमिव बलावलीढदर्पितधेनुकमुदयनमिवालन्दितवत्सकुलं किंपुरुषाधिराज्यमिव मुनिजनगृहीतजलकलशाभिषिच्यमानद्रुमं निदाघसमयावसानमिव प्रत्यासन्नजलप्रपातं जलधरसमयमिव वनगहनमध्यसुखसुप्तहरिं हनुमन्तमिव शिलाश-
10 कलप्रहारसंचूर्णिताक्षास्थिसंचयं खाण्डवविनाशोद्यतार्जुनमिव प्रारब्धाग्निकार्यं सुरभिविलेपनधरमपि सततविर्भूतहव्यधूमगन्धं मातङ्गकुलाध्यासितमपि पवित्रमुल्लसितधूमकेतुशतमपि प्रशान्तोपद्रवं परिपूर्णद्विजपतिमण्डलसनाथमपि सदासंनिहिततरुगहनान्धकारमतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम्।

15 यत्र च मलिनता हविर्धूमेषु न चरितेषु मुखरागः शुकेषु न कोपेषु तीक्ष्णता कुशाग्रेषु न स्वभावेषु चञ्चलता कदलीदलेषु न मनःसु चक्षूरागः कोकिलेषु न परकलत्रेषु कण्ठग्रहः कमण्डलुषु न सुरतेषु मेखलाबन्धो व्रतेषु नेर्ष्याकलहेषु स्तनस्पर्शो होमधेनुषु न कामिनीषु पक्षपातः कृकवाकुषु न विद्याविवादेषु भ्रान्तिरनलप्रदक्षिणासु
20 न शास्त्रार्थेषु वसुसंकीर्तनं दिव्यकथासु न तृष्णासु गणना रुद्राक्षवलयेषु न शरीरेषु मुनिबालनाशः क्रतुदीक्षया न मृत्युना रामानुरागो रामायणेन न यौवनेन मुखभङ्गविकारो जरया न धनाभिमानेन। यत्र च महाभारते शकुनिवधः पुराणे वायुप्रलपितं वयःपरिणामे द्विजपतनमुपवनचन्दनेषु जाड्यमग्नीनां भूतिमत्त्वमेणकानां
25 गीतश्रवणव्यसनं शिखण्डिनां नृत्यपक्षपातो भुजंगानां भोगः कपीनां श्रीफलाभिलाषो मूलानामधोगतिः।

तस्य चैवंविधस्य मध्यभागमण्डलमलंकुर्वाणस्यालक्तकालोहित-पल्लवस्य मुनिजनालम्बितकृष्णाजिनजलकरकसनाथशाखस्य तापस-कुमारिकाभिर्मूलभागदत्तपीतपिष्टपञ्चाङ्गुलस्य हरिणशिशुभिरापीय-मानालवालकसलिलस्य मुनिकुमारकाबद्धकुशचीरदाम्नो हरितगोम-योपलेपनविविक्ततलस्य तत्क्षणकृतकुसुमोपहाररमणीयस्य नातिम- 5
हतः परिमण्डलतया विस्तीर्णावकाशस्य रक्ताशोकतरोरधश्छा-यायामुपविष्टमत्युग्रतपोभिर्भुवनमिव सागरैः कनकगिरिमिव कुलप-र्वतैः क्रतुमिव वैतानवह्निभिः कल्पान्तदिवसमिव रविभिः कालमिव कल्पैः समन्तान्महर्षिभिः परिवृतमुग्रशापभियेव कम्पितदेहया प्र-णयिन्येव विहितकेशग्रहया क्रुद्धयेव कृतभ्रूभङ्गया मत्तयेवाकुलित- 10
गमनया प्रसाधितयेव प्रकटिततिलकया जरया गृहीतव्रतयेव भस्म-धवलया धवलीकृतविग्रहम्रायामिनीभिः पलितपाण्डुराभिस्तपसा विजित्य मुनिजनमखिलं धर्मपताकाभिरिवोच्छ्रिताभिरमरलोकमारोढुं पुण्यरज्जुभिरिवोपसंगृहीताभिरतिदूरप्रवृद्धस्य पुण्यतरोः कुसुममञ्ज-रीभिरिवोद्गताभिर्जटाभिरुपशोभमानमुपरचितभस्मत्रिपुण्ड्रकेण तिर्य- 15
क्प्रवृत्तत्रिपथगास्रोतस्त्रयेणेव हिमगिरिशिलातलेन ललाटफलकेनो-पेतमधोमुखचन्द्रकलाकाराभ्यामवलम्बितवलिशिथिलाभ्यां भ्रूल-ताभ्यामवष्टभ्यमानदृष्टिमनवरतमन्त्राक्षराभ्यासविवृताधरपुटतया नि-पतद्भिरतिशुचिभिः सत्यप्ररोहैरिव स्वच्छेन्द्रियवृत्तिभिरिव करुणा-रसप्रवाहैरिव दशनमयूखैर्धवलितपुरोभागमुद्वमदमलगङ्गाप्रवाहमिव 20
जह्नुमविरतसोमोद्गारसुगन्धिनिश्वासावकृष्टैर्मूर्तिमद्भिरिव शापाक्षरैः सदा मुखभागसंनिहितैः परिस्फुरद्भिरलिभिरविरहितमतिकृशतया निम्नतरगण्डगर्तमुन्नततरहनुघोणमाकरालतारकमवशीर्यमाणविरलनयन-पक्ष्ममालमुद्गतदीर्घरोमरुद्धश्रवणविवरमानाभिलम्बकूर्चकलापमाननमा-दधानमतिचपलानामिन्द्रियाश्वानामन्तःसंयमनरज्जुभिरिवाततताभिः क- 25
ण्ठनाडीभिर्निरन्तरसंबद्धकंधरं समुन्नतविरलास्थिपञ्जरमंसावलम्बि-

धवलयज्ञोपवीतमनिलवशजनिततनुतरंगभङ्गमुत्प्लवमानमृणालमिव म-
न्दाकिनीप्रवाहमकलुषमङ्गमुद्वहन्तममलस्फटिकशकलघटितमक्षवलयमु-
ज्ज्वलस्थूलमुक्ताफलग्रथितं सरस्वतीहारमिव चलदङ्गुलिविवरग-
तमावर्तयन्तमनवरतभ्रमिततारकाचक्रमपरमिव ध्रुवमुन्नमता शि-
5 राजालकेन जरत्कल्पतरुमिव परिणतलतासंचयेन निरन्तर-
निचितममलेन चन्द्रांशुभिरिवामृतफेनैरिव गुणसंतानतन्तुभिरिव
निर्मितेन मानससरोजलक्षालितशुचिना दुकूलवल्कलेन द्वितीयेनेव
जराजालकेन संछादितमासन्नवर्तिना मन्दाकिनीसलिलपूर्णेन त्रिद-
ण्डोपविष्टेन स्फटिककमण्डलुना विकचपुण्डरीकराशिमिव राजहंसे-
10 नोपशोभमानं स्थैर्येणाचलानां गाम्भीर्येण सागराणां तेजसा सवितुः
प्रशमेन तुषाररश्मेर्निर्मलतयाम्बरतलस्य संविभागमिव कुर्वाणं वैन-
तेयमिव स्वप्रभावोपात्तद्विजाधिपत्यं कमलासनमिवाश्रमगुरुं जरच्च-
न्दनतरुमिव भुजंगनिर्मोकधवलजटाकुलं प्रशस्तवारणमिव प्रलम्ब-
कर्णवालं वृहस्पतिमिवाजन्मसंवर्धितकचं दिवसमिवोद्यदर्कविम्बभा-
15 स्वरमुखं शरत्कालमिव क्षीणवर्षं शंतनुमिव प्रियसत्यव्रतमम्बि-
काकरतलमिव रुद्राक्षवलयग्रहणनिपुणं शिशिरसमयसूर्यमिव कृतो-
त्तरासङ्गं वडवानलमिव सततपयोभक्षं शून्यनगरमिव दीनानाथवि-
पन्नशरणं पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरं भगवन्तं जावा-
लिमपश्यम् ।

20 अवलोक्य चाहमचिन्तयम् । अहो प्रभावस्तपसाम् । इयमस्य
शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामिनीव चक्षुषः
प्रतिहन्ति तेजांसि । सततमुदासीनापि महाप्रभावतया भयमिवोप-
जनयति प्रथमोपगतस्य । शुष्कनलकाशकुसुमनिपातितानलचटुलवृत्ति
नित्यमसहिष्णु तपस्विनां तनुतपसामपि तेजः प्रकृत्या भवति
25 किमुत सकलभुवनतलवन्दितचरणानामनवरततपःक्षपितमलानां क-
रतलामलकफलवदखिलं जगदालोकयतां दिव्येन चक्षुषा भगवता-

मेवंविधानामप्रत्ययकारिणाम्। पुण्यानि हि नामग्रहणान्यपि महामुनीनाम्। किं पुनर्दर्शनानि। धन्यमिदमाश्रमपदमयमधिपतिर्यत्र। अथवा भुवनतलमेव धन्यमखिलमनेनाधिष्ठितमवनितलकमलयोनिना। पुण्यभाजः खल्वमी मुनयः यदहर्निशमेनमपरमिव नलिनासनमपगतान्यव्यापारा मुखावलोकननिश्चलदृष्टयः पुण्याः कथाः शृण्वन्तः 5 समुपासते। सरस्वत्यपि धन्या यास्य तु सततमतिप्रसन्ने करुणाजलनिष्यन्दिन्यगाधगाम्भीर्ये रुचिरद्विजपरिवारा मुखकमलसंपर्कमनुभवन्ती निवसति हंसीव मानसे। चतुर्मुखमुखकमलवासिभिश्चतुर्वेदैः सुचिरादिव द्वितीयमिदमपरमुचितमासादितं स्थानम्। एनमासाद्य शरत्कालमिव कलिकालजलदसमयकलुषिताः प्रसादमुपगताः 10 पुनरपि जगति सरित इव सर्वविद्याः। नियतमिह सर्वात्मना कृतावस्थितिना भगवता परिभूतकलिकालविलसितेन धर्मेण न स्मर्यते कृतयुगस्य। धरणितलमनेनाधिष्ठितमालोक्य न वहति नूनमिदानीं सप्तर्षिमण्डलनिवासाभिमानमम्बरतलम्। अहो महासत्त्वेयं जरा यास्य प्रलयरविरश्मिनिकरदुर्निरीक्ष्ये रजनिकरकिरणपाण्डुरशिरो- 15 रुहे जटाभारे फेनपुञ्जधवला गङ्गेव पशुपतेः क्षीराहुतिरिव शिखाकलापे विभावसोर्निपतन्ती न भीता। बहलाज्यधूमपटलमलिनीकृताश्रमस्य भगवतः प्रभावाद्भीतमिव रविकिरणजालमपि दूरतः परिहरति तपोवनम्। एते च पवनलोलपुञ्जीकृतशिखाकलापा रचिताञ्जलय इवात्र मन्त्रपूतानि हवींषि प्रतिगृह्णन्त्येतत्प्रीत्याशुशुक्षण- 20 यः। तरलितदुकूलवल्कलोयं चाश्रमलताकुसुमसुरभिपरिमलो मन्दसंचारी सशङ्क इवास्य समीपमुपसर्पति गन्धवाहः। प्रायो महाभूतानामपि दुरभिभवानि भवन्ति तेजांसि। सर्वतेजस्विनामयं चाग्रणीः। द्विसूर्यमिवाभाति जगदनेनाधिष्ठितं महात्मना। निष्कम्पेव क्षितिरेतदवष्टम्भात्। एष प्रवाहः करुणारसस्य संतरणसेतुः सं- 25 सारसिन्धोराधारः क्षमाम्भसां परशुस्तृष्णालतागहनस्य सागरः सं-

तोषामृतस्योपदेष्टा सिद्धिमार्गस्यास्तगिरिरसद्ग्रहस्य मूलमुपशमतरो-
र्नाभिः प्रज्ञाचक्रस्य स्थितिवंशो धर्मध्वजस्य तीर्थं सर्वविद्यावताराणां
वडवानलो लोभार्णवस्य निकषोपलः शास्त्ररत्नानां दावानलो रागप-
ल्लवस्य महामन्त्रः क्रोधभुजङ्गस्य दिवसकरो मोहान्धकारस्यार्गला-
5 बन्धो नरकद्वाराणां कुलभवनमाचाराणामायतनं मङ्गलानामभूमि-
र्मदविकाराणां दर्शकः सत्पथानामुत्पत्तिः साधुताया नेमिरुत्साह-
चक्रस्याश्रयः सत्त्वस्य प्रतिपक्षः कलिकालस्य कोशस्तपसः सखा
सत्यस्य क्षेत्रमार्जवस्य प्रभवः पुण्यसंचयस्यादत्तावकाशो मत्सर-
स्यारातिर्विपत्तेरस्थानं परिभूतेरननुकूलोभिमानस्यासंमतो दैन्यस्या-
10 नायत्तो रोषस्यावशी विषयाणामनभिमुखः सुखानाम्। अस्य भग-
वतः प्रसादादेवोपशान्तवैरमपगतमत्सरं तपोवनम्। अहो प्रभावो
महात्मनाम्। अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तात्मानस्ति-
र्यञ्चोपि तपोवनवसतिसुखमनुभवन्ति। तथाहि। एष विकचोत्प-
लवनरचनानुकारिणमुत्पतच्चारुचन्द्रकशतं हरिणलोचनद्युतिशबलम-
15 भिनवशाद्वलमिव विशति शिखिनः कलापमातपाहतो निःशङ्कमहिः।
अयमुत्सृज्य मातरमजातकेसरैः केसरिशिशुभिः सहोपजातपरिचयः
प्रक्षरत्क्षीरधारमापिबति कुरंगशावकः सिंहीस्तनम्। एष मृणाल-
कलापाशङ्किभिः शशिकरधवलं सटाभारमामीलितलोचनो बहु म-
न्यते द्विरदकलभैराकृष्यमाणं मृगपतिः। इदमिह कपिकुलमपगत-
20 चापलमुपनयति मुनिकुमारकेभ्यः स्नातेभ्यः फलानि। एते च न नि-
वारयन्ति मदान्धा अपि गण्डस्थलभाञ्जि मदजलपाननिश्चलानि म-
धुकरकुलानि जातदयाः कर्णतालैः करिणः। किं बहुना। तापसाग्नि-
होत्रधूमलेखाभिरुत्सर्पन्तीभिरनिशमुपपादितकृष्णाजिनोत्तरासङ्गशोभाः
फलमूलभृतो वल्कलिनो निश्चेतनास्तरवोपि सनियमा इव लक्ष्यन्तेस्य
25 भगवतः। किं पुनः सचेतनाः प्राणिनः।

एवं चिन्तयन्तमेव मां तस्यामेवाशोकतरोरधश्छायायामेकदेशे

स्थापयित्वा हारीतः पादावुपगृह्य कृताभिवादनः पितुरनतिसमीप-
वर्तिनि कुशासने समुपाविशत्। आलोक्य तु मां ते सर्व एव मुन-
यः कुतोयमासादितः शुकशिशुरिति तमासीनमपृच्छन् । असौ तु
तानब्रवीत्। अयं मया स्नातुमितो गतेन कमलिनीसरस्तीरतरुनीड-
पतितः शुकशिशुरातपजनितक्लान्तिरुत्तप्तपांसुपटलमध्यगतो दूरनिप- 5
तनविह्वलतनुरल्पावशेषायुरासादितः । तपस्विदुरारोहतया च तस्य
वनस्पतेर्न शक्यते स्वनीडमारोपयितुमिति जातदयेनानीतः । तद्या-
वदयमप्ररूढपक्षतिरक्षमोन्तरीक्षमुत्पतितुं तावदत्रैव कस्मिंश्चिदाश्रम-
तरुकोटरे मुनिकुमारकैरस्माभिश्चोपनीतेन नीवारकणनिकरेण फल-
रसेन च संवर्ध्यमानो धारयतु जीवितम् । अनाथपरिपालनं हि 10
धर्मोस्मद्विधानाम्। उद्भिन्नपक्षतिस्तु गगनतलसंचरणसमर्थो यास्यति
यत्रास्मै रोचिष्यते। इहैव वोपजातपरिचयः स्थास्यति। इत्येवमादि-
कमस्मत्संबद्धमालापमाकर्ण्य किंचिदुपजातकुतूहलो भगवाञ्जाबालि-
रीषदावलितकंधरः पुण्यजलैः प्रक्षालयन्निव मामतिप्रशान्तया दृष्ट्या
दृष्ट्वा सुचिरमुपजातप्रत्यभिज्ञान इव पुनः पुनर्विलोक्य स्वस्यैवावि- 15
नयस्य फलमनेनानुभूयत इत्यवोचत् । स हि भगवान्कालत्रयदर्शी
तपःप्रभावाद्दिव्येन चक्षुषा सर्वमेव करतलगतमिव जगदवलोकयति ।
वेत्ति जन्मान्तराण्यतीतानि । कथयत्यागामिनमप्यर्थम् । ईक्षणगो-
चरगतानां च प्राणिनामायुषः प्रमाणमावेदयति । यतः सर्वैव तापस-
परिषच्छ्रुत्वा विदिततत्प्रभावा कीदृशोनेनाविनयः कृतः किमर्थं वा 20
कृतः क वा कृतो जन्मान्तरे वा कोयमासीदिति कौतूहलिन्यभवत्।
उपनाथितवती च तं भगवन्तम्। आवेदय प्रसीद भगवन्कीदृशस्या-
विनयस्य फलमनेनानुभूयते । कश्चायमासीज्जन्मान्तरे । विहगजातौ
कथमस्य संभवः। किमभिधानो वायम्। अपनयतु नः कुतूहलम्।
आश्चर्याणां हि सर्वेषां भगवान्प्रभवः। 25

इत्येवमुपयाच्यमानस्तु तपोधनपरिषदा स महामुनिः प्रत्यवदत्।

अतिमहदिदमाश्चर्यमाख्यातव्यम्। अल्पशेषमहः। प्रत्यासीदति च न.
स्नानसमयः। भवतामप्यतिक्रामति देवार्चनविधिवेला। तदुत्तिष्ठन्तु
भवन्तः सर्व एव तावदाचरन्तु यथोचितं दिवसव्यापारम्। अपरा-
ह्णसमये भवतां पुनः कृतमूलफलाशनानां विश्रब्धोपविष्टानामादितः
5 प्रभृति सर्वमावेदयिष्यामि। योयम्। यच्चानेन कृतमपरस्मिञ्जन्म-
नि। इह लोके यथास्य संभूतिः। अयं च तावदपगतक्लमः क्रियता-
माहारेण। नियतमयमप्यात्मनो जन्मान्तरोदन्तं स्वप्नोपलब्धमिव
मयि कथयति सर्वमशेषतः स्मरिष्यति। इत्यभिदधदेवोत्थाय सह
मुनिभिः स्नानादिकमुचितं दिवसव्यापारमकरोत्।

10 अनेन च समयेन परिणतो दिवसः। स्नानोत्थितेन मुनिजनेनार्घ-
विधिमुपपादयता यः क्षितितले दत्तस्तमम्बरतलगतः साक्षादिव रक्त-
चन्दनाङ्गरागं रविरुदवहत्। ऊर्ध्वमुखैरर्कबिम्बविनिहितदृष्टिभिरु-
ष्मपैस्तपोधनैरिव परिपीयमानतेजःप्रसरो विरलातपो दिवसस्तनिमा-
नमभजत्। उद्यत्सप्तर्षिसार्थस्पर्शपरिजिहीर्षयेव संहृतपादः पारावत-
15 चरणपाटलरागो रविरम्बरतलादलम्बत। आलोहितांशुजालं जल-
शयनगतस्य मधुभिदो विगलन्मधुधारमिव नाभिनलिनं प्रतिमाग-
तमपरार्णवे सूर्यमण्डलमलक्ष्यत। विहाय धरणितलमुन्मुच्य कम-
लिनीवनानि शकुनय इव दिवसावसाने तपोवनतरुशिखरेषु पर्वता-
ग्रेषु च रविकिरणाः स्थितिमकुर्वत। आलग्नरक्तातपच्छेदा मुनिभि-
20 रालम्बितालोहितवल्कला इवाश्रमतरवः क्षणमशोभन्त। अस्तमुपगते
च भगवति सहस्रदीधितावपरार्णवतलादुल्लसन्ती विद्रुमलतेव पाटला
संध्या समदृश्यत। यस्यामाबध्यमानध्यानमेकदेशदुह्यमानहोमधे-
नुदुग्धधाराध्वनितधन्यतरातिमनोहरमग्निहोत्रवेदीविकीर्यमाणहरितकुश-
मृषिकुमारिकाभिरितस्ततो विक्षिप्यमाणदिग्देवताबलिसिक्थमाश्रमप-
25 दमभवत्। क्वापि विहृत्य दिवसावसाने लोहिततारका तपोवनधेनुरिव
कपिला परिवर्तमाना संध्या मुनिभिरदृश्यत। अचिरप्रोषिते सवितरि

शोकविधुरा कमलमुकुलकमण्डलुधारिणी हंससितदुकूलपरिधाना मृणालधवलयज्ञोपवीता मधुकरमण्डलाक्षवलयमुद्वहन्ती कमलिनी दिनपतिसमागमव्रतमिवाचरत्। अपरसागराम्भसि पतिते दिनकरे पतनवेगोत्थितमम्भःसीकरनिकरमिव तारागणमम्बरमधारयत्। अचिराच्च सिद्धकन्यकाविक्षिप्तसंध्यार्चनकुसुमशबलमिव तारकितं वियदराजत। क्षणेन चोन्मुखेन मुनिजनेनोर्ध्वविप्रकीर्णैः प्रणामाञ्जलिसलिलैः क्षाल्यमान इवागलदखिलः संध्यारागः। 5

क्षयमुपागतायां संध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममभिनवमवहत्। अपहाय मुनिजनहृदयानि सर्वमन्यदन्धकारतां तिमिरमनयत्। क्रमेण च रविरस्तमुपागत इत्युदन्तमुपलभ्य जातवैराग्यो धौतदुकूलवल्कलधवलाम्बरः सतारान्तःपुरः पर्यन्तस्थिततनुतिमिरतमालवनलेखं सप्तर्षिमण्डलाध्युषितमरुन्धतीसंचरणपवित्रमुपहिताषाढमालक्ष्यमाणमूलमेकान्तस्थितचारुतारकमृगममरलोकाश्रममिव गगनतलममृतदीधितिरध्यतिष्ठत्। चन्द्राभरणभूतस्तारकाकपालशकलालंकृतादम्बरतलात्त्र्यम्बकोत्तमाङ्गादिव गङ्गा सागरानापूरयन्ती हंसधवला धरण्यामपतज्ज्योत्स्ना। हिमकरसरसि विकचपुण्डरीकसिते चन्द्रिकाजलपानलोभादवतीर्णो निश्चलमूर्तिरमृतपङ्कलग्न इवादृश्यत हरिणः। तिमिरजलधरसमयापगमानन्तरमभिनवसितसिन्धुवारकुसुमपाण्डुरैरर्णवागतैरगाह्यन्त हंसैरिव कुमुदसरांसि चन्द्रपादैः। विगलितसकलोदयरागं रजनिकरबिम्बमम्बरापगावगाहधौतसिन्दूरमैरावतकुम्भस्थलमिव तत्क्षणमलक्ष्यत। शनैः शनैश्च दूरोदिते भगवति हिमततिस्रुति सुधाधूलिपटलेनेव धवलीकृते चन्द्रातपेन जगत्यवश्यायजलबिन्दुपतनमन्दगतिषु विघट्टमानकुमुदवनकषायपरिमलेषु समुपोढनिद्राभरालसतारकैरन्योन्यग्रथितपक्ष्मपुटैरारब्धरोमन्थमन्थरमुखैः सुखासीनैराश्रममृगैरभिनन्दितागमनेषु प्रवहत्सु निशामुखसमीरेष्वर्धयाममात्रावखण्डितायां 10 15 20 25

विभावर्यां हारीतः कृताहारं मामादाय सर्वैस्तैः सह मुनिभिरुपसृत्य चन्द्रातपोद्भासिनि तपोवनैकदेशे वेत्रासनोपविष्टमनतिदूरवर्तिना जालपादनाम्ना शिष्येण दर्भपवित्रधवित्रपाणिना मन्दमुपवीज्यमानं पितरमवोचत् । हे तात सकलेयमाश्चर्यश्रवणकुतूहलाकलितहृदया समुपस्थिता तापसपरिषदाबद्धमण्डला प्रतीक्षते । व्यपनीतश्रमश्च कृ- 5 तोयं पतत्रिपोतः । तदावेद्यतां यदनेन कृतमपरस्मिञ्जन्मनि कोयमभूद्भविष्यति च । इत्येवमुक्तस्तु स महामुनिरग्रतःस्थितं मामवलोक्य तांश्च सर्वानेकाग्राञ्छ्रवणपरान्मुनीन्बुद्ध्वा शनैः शनैरब्रवीत् । श्रूयतां यदि कुतूहलम् ।

---

Printed by RAMZAN ALI SHAH at the National Press, Allahabad

# NOTES

The introductory verses are evidently by Bana's son, who also wrote the Uttarabhaga.

P. 1, v. 1. The reference is to the Supreme Being that performs the three functions of creating, maintaining and destroying the universe assuming the three forms of Brahma, Vishnu and Mahesha on account of the three limitations set up by the three constituent qualities of Nature. *viz.* रजस्, सत्त्वम् and तमस्.

त्रिगुणात्मकाय । सत्त्वरजस्तमोगुणस्वरूपायेत्यर्थः ।

त्रयीमयाय। त्रयी ब्रह्मविष्णुमहेशानां वेदानां वा त्रयी, तन्मयाय तत्स्वरूपाय। It is better to interpret the compound as वेदत्रयप्रतिपाद्याय ।

V. 2. सुरासुराधीशशिखान्तशायिनः । सुराश्चासुराश्च, तेषामधीशाः (स्वामिनः), तेषां शिखाः (चूडाः), तासां अन्ते ( प्रान्ते ) शेरत इत्येवंशीलाः ।

भवच्छिदः । संसारविच्छेदिनः । that cut the (bonds of) wordly life.

V. 3. उपेन्द्रः is a name of Vishnu in Nrisimhavatara.

विभित्सया । भेत्तुमिच्छया ।

क्षणलब्धलक्ष्यया । क्षणं लब्धं लक्ष्यं ( अवलोकनैकाग्रत्वं ) यया तथा ।

The रिपुः referred to is Hiranyakasipu.

अस्रपाटलम् । अस्रं (रुधिरं), तद्वत्पाटलं ( आरक्तं ) ।

V. 4. भर्वोः । भरुः ( ईश्वरः ) च भरुः ( स्वामी ) च भरू, तयोः, भर्वोः । This is the explanation adopted by Professor P. Peterson on the authority of the commentator Mahadeva and Kern. One commentator takes the word as referring to Bana's *Guru* of the name. Some other commentators also take the verse as referring to the *Guru* of Bana but read the name as भत्सोः or भर्त्सोः instead of भर्वोः ।

सशेखरैः । समुकुटैः ।

मौखरिभिः । Maukhari is the name of a dynasty of Kshatriyas mentioned in the Harshacharita.

समस्त......अङ्गुलि । समस्ताः (समग्राः) ये सामन्ताः (विषयान्तरराजानः) तेषां किरीटानि ( कोटीराणि ) एव वेदिका ( परिष्कृता भूमिः ), तस्या विटङ्कः ( मध्य उन्नतप्रदेशः ) एव पीठः (स्थलं) तत्र उल्लुठिताः (घृष्टाः), अत एव अरुणाः ( रक्ताः ) अङ्गुलयः यस्येति तत्तथा ।

P. 2, v. 5. अकारण......दारुणात् । अकारणं ( अनिमित्तं ) एव आविष्कृतं यद्वैरं ( विरोधः ) तेन दारुणात् ( क्रूरात् ) ।

सुदुःसहम् । अत्यन्तोद्वेगजनकम् ।

सन्निहितम् । present.

V. 6. कटु क्वणन्तः would mean 'uttering bitter words' when qualifying खलाः, and 'making an unpleasant noise' when qualifying श्रृंखलाः ।

मलदायकाः । The compound is to be explained as मलः ( मिथ्याकलङ्कः ), तस्य दायकाः ( आरोपकाः ) when qualifying खलाः, and as मलः ( स्वसम्पर्कात्स्वमालिन्यं ), तस्य दायकाः ( आरोपकाः ) ।

पदे पदे would mean शब्दे शब्दे in the case of सन्तः, and चरणप्रक्षेपे प्रक्षेपे in the case of मणिनूपुराः ।

V. 7. हारि । मनोहारि ।

हृदयेन धत्ते । put in his heart.

अर्करिपोरिवामृतम् । अर्करिपु means *Rahu*. The reference is to the following story :—When the nectar churned out of the ocean was being distributed to the gods, Rahu disguised himself and attempted to drink it along with them. But he was detected by the sun and the moon who informed Vishnu of the fact. Thereupon Vishnu severed his head from the body ; but, as he had already tasted a little of the nectar, his head became immortal although his body perished as the nectar did not go down his throat before he was beheaded. Since then he is supposed to wreak his vengeance on the sun and the moon at the time of eclipses.

V. 8. स्फुरत्...कोमला। In the case of कथा it is to be explained as स्फुरत् ( चञ्चत् ) कलः ( मधुरः ) यः आलापः ( शब्दरचना ) तस्य विलासः ( माधुर्यं ), तेन कोमला ( मृद्वी )। pleasing on account of the grace of shining sweet and agreeable discourse. In the case of वधूः it is to be explained as स्फुरत् (प्रसर्पत्) यः कलः (मन्द्रः) आलापविलासः ( वचनव्यापारः ) तेन कोमला ( सुन्दरा )।

कौतुकाधिकम्। कौतुकम् (delight) अधिकं यस्मिंस्तत्। This qualifies रागम्।

रसेन। In the case of कथा रस means 'pathos', 'emotion,' or 'sentiment,' and in the case of वधूः it means 'love.'

शय्या। it means शब्दगुम्फः or 'composition' in the case of कथा and a 'couch' in the case of वधूः।

V. 9. उज्ज्वलदीपकोपमैः। This is to be explained as दीपकाः (तन्नामकालङ्कारविशेषाः) च उपमाश्च दीपकोपमाः। उज्ज्वलाः (प्रकटाः) दीपकोपमाः येषु तैः, 'in which sparkle dipakas and upamas', in the case of कथाः, and उज्ज्वलो यो दीपकः ( प्रदीपः ) तदुपमैः (तत्तुल्यैः), like 'flashing lamps' in the case of महास्रजः।

निरन्तरश्लेषघनैः। This also has two interpretations:—(1) निरन्तरं ( अव्यवधानं प्रतिपदं वा ) श्लेषः (उपमानोपमेययोरर्थसाम्यरूपः शब्दसाम्यरूपो वा ), तेन घनाः ( बहुलतराः ) 'thick set with plays upon words.' (2) निरन्तरं (सान्द्रतरं) यः श्लेषः ( ग्रथना ) तेन घनाः (निबिडाः), 'well tied together.'

सुजातयः। This too has two meanings:—(1) सुष्ठु जातिः (छन्दोविशेषः ) यासु ताः or सुष्ठु जातिः ( स्वरूपं ) यासां ताः, 'abounding in the figures of speech known as जातिः, or, 'of beautiful forms.' (2) सुष्ठु जातयः ( जातीपुष्पाणि ) यासु ताः 'full of Jati flowers.'

P. 3, v. 10. अनेकगुप्तार्चितपादपङ्कजः। अनेके ( असंख्याः ) ये गुप्ताः ( गुप्तनामाङ्किताः वैश्यशूद्रादयः ), तैः अर्चितं पादपङ्कजं यस्य सः। The reference is probably to the Gupta dynasty of kings. The interpretation of गुप्ताः रक्षिताः is absurd according to Prof. Peterson.

V. 11. श्रुतिशान्तकल्मषे। श्रुतिभिः ( वेदाध्ययनैः ) शान्तं (उपशमितं) कल्मषं ( पापं ) यस्य तत्तथा तस्मिन्।

पुरोडाशः । अग्निहोत्रे देवेभ्यो दत्तहविःशेषः ।

कषायित । made astringent. This is because सोम is a bit pungent.

बन्धुरे । मनोहरे ।

V. 12. अभ्यस्तसमस्तवाङ्मयैः । समस्तविद्यापारङ्गतैरित्यर्थः ।

निगृह्यमाणाः । checked. Siddhachandra says that the parrots threatened the pupils with punishment from the *Guru* whenever they were wrong.

Note the greatness of the man even the parrots of whose house were so learned as to correct the pupils.

V. 13. अर्थपति is the name of Kubera's son.

द्विजन्मनाम् । In the case of गरुड it means पक्षिणाम् । In the other case it means ब्राह्मणानाम् ।

पतिः here means श्रेष्ठः ।

V. 14. विसारि । विस्तरणशीलम् ।

विवृण्वतः । अध्यापयतः ।

श्रवणे has two meanings :—(1) 'hearing,' and (2) 'ear.'

V. 15. विधान...शोभितैः । (*a*) विधानेन ( विध्युक्तमार्गेण ) सम्पादितं (विहितं) यद्दानं तेन शोभितैः, that is to say 'accompanied by rich gifts' which usually characterise great sacrifices. (*b*) विधानेन ( मदोद्रेकार्थं गजादीनां दीयमानभक्ष्यविशेषेण ) सम्पादितं ( निष्पन्नं ) यत् दानं (मदजलं) तेन शोभितैः ।

स्फुर······मूर्तिभिः । (*a*) स्फुरन्तः (उज्ज्वलन्तः) ये महावीराः (श्रौताग्नयः) तैः सनाथा ( सहिता ) मूर्तिः येषां ते तथा तैः । (*b*) स्फुरन्तः ( शूराः ) ये महावीराः ( योद्धारः ) तैः सनाथमूर्तिभिः ( अधिष्ठितैः ) ।

यूपकरैः । (*a*) यूपाः ( यज्ञे पशुबन्धनार्थं स्तम्भविशेषाः ) एव कराः येषां तैः । (*b*) यूपवत् ( यज्ञस्तम्भवत् ) करः ( शुण्डादण्डः ) येषां तैः ।

V. 16. महात्मनाम् । जितेन्द्रियाणाम् ।

स्फटिकोपलोपमम् । (*a*) स्फटिकोपलः ( the crystal stone ) उपमा यस्य तम् । निष्कलङ्कमित्यर्थः । (*b*) स्फटिकाश्मभिर्निर्मितम् । स्फटिकोपलामलं is another reading.

क्षमाभृताम् । (*a*) क्षान्तिमताम् (*b*) भूधराणाम् । "क्षितिक्षान्त्योः क्षमा" इत्यमरः ।

V. 17. सुदूरनिर्गताः । दिगन्तं गताः ।

कलङ्क......त्विषः । कलंकेन मुक्तो य इन्दुस्तस्य कला इव अमला (विशदा) त्विड् कान्तिर्येषां ते ।

कृतान्तराः । कृतं अन्तरं (अवकाशः *i. e.* प्रवेशपद्धतिः ) यैस्ते ।

V. 18 दिशाम् । दिग्वधूनाम् ।

अलीक......भङ्गताम् । अलीके ( ललाटदेशे ) अलकानां ( चूर्णकुन्तलानां ) भङ्गः ( रचनाविशेषः ) तस्य भावस्तत्ताम् ।

त्रयी......पल्लवः । वेदत्रयी एव वधूः, तस्याः कर्णे तमालपल्लवा इव तमालपल्लवः ।

मलीमसः । dark. The figure of speech in मलीमसः शुक्लतरं etc., is what is called the विषमालङ्कार as there is a contrariety of qualities between cause and effect.

V. 19. सरस्वती......शीकराम्भसः । सरस्वत्याः पाणिसरोजसम्पुटेन प्रमृष्टं (प्रोञ्छितं) होमादिकर्मसम्बन्धि श्रमस्य (खेदस्य) शीकराम्भः (प्रस्वेदजलं) यस्य स तथा तस्मात् ।

यशोंऽशु......विष्टपात् । यशसः अंशवः ( दीप्तयः ), तैः शुक्लीकृतानि ( शुभ्रीकृतानि ) सप्त विष्टपानि ( भुवनानि ) येन तस्मात् ।

P. 5, v. 20. अक्षतकण्ठकौण्ठ्यया । अक्षतं ( अच्छिन्नं ) कण्ठे (गले) कौण्ठ्यं ( कण्ठता ) यस्याः सा, तया । whose bluntness is not broken even in the throat ( or voice ), not to speak of an assembly of the learned.

महा......अन्धया । महान् यो ( मनसः मोहः ) मनोमोहः (चित्तविकलता) तेन मलीमसा ( मलिना ) चासावन्धा च, तया । मनोमोह is 'delusion of mind.'

अलब्ध......मुग्धया । अलब्धः ( अप्राप्तः ) यो वैदग्ध्यविलासः ( चातुर्य-लीला ) तेन मुग्धा ( अप्रगल्भा ), तया । simple on account of not having attained the grace of proficiency.

L. 5. अशेष......शासनः । As applied to पाकशासन or Indra, this compound has been very ingeniously explained by some commentators as follows :—Sukhakara, अः ( विष्णुः ) शेषश्च ।

नरतोयः (sic) तत्पतिः (वरुणः) । Balakrishna, अः (विष्णुरुपेन्द्रः) । शेषस्तदवतारो लक्ष्मणबलभद्रादिरूपः । अद्याप्यवताराणां देवक्रीडायतनखण्डान्तरेषु विद्यमानत्वात्, नरपतयो नहुषादयो धर्मविजितस्वर्गाः । समन्ताः दिगीशाः । Sivarama, अशेषनरपतयः राजपक्षे वर्त्तमानाः इन्द्रपक्षे नहुषादयः । The ordinary plain meaning is अशेषाः ( समग्राः ) ये नरपतयः (राजानः) तेषां शिरांसि, तैः समभ्यर्चितं ( सादरतया गृहीतं ) शासनम् ( आज्ञा ) यस्य सः as explained by Siddhachandra.

L. 6. प्रताप......चक्रः । प्रतापः ( कोदण्डजं तेजः ) अनुरागः ( स्नेहः ) ताभ्यां अवनतं (नम्रीभूतं) समस्तं ( समग्रं ) सामन्तचक्रं ( स्वदेशपर्यन्तवर्तिराजमण्डलं ) यस्य ।

L. 7. चक्रधरः । Vishnu.

कर......लाञ्छनः । करकमले उपलक्ष्यमाणं ( दृश्यमानं ) शंखचक्राकारं (रेखोपरेखास्वरूपं) लाञ्छनं (चिह्नं) यस्य सः ।

L. 8. जितमन्मथः । In the case of the king the compound would mean जितेन्द्रियः because it is the senses that excite passion ( मन्मथ )

गुहः । कार्त्तिकेयः ।

शक्तिः । (*a*) 'strength,' (*b*) 'spear.'

L. 9. कमलयोनिः । Brahma.

विमानीकृतराजहंसमण्डलः । (*a*) विगतः मानः ( दर्पः ) यस्य तद्विमानं तथा कृतं विमानीकृतं (humbled) राजहंसानां ( excellent kings ) मण्डलं (वृन्दं) येन सः । (*b*) विमानं ( देवयानं 'a vehicle') तत्स्वरूपीकृतं राजहंसानां ( royal swans ) मण्डलं येन सः ।

L. 10. प्रसूतिः । उत्पत्तिस्थानम् ।

भगीरथपथप्रवृत्तः । भगीरथस्य राज्ञः पन्थाः ( पितॄणामुद्धारः ) तत्र प्रवृत्तः (लग्नः). Sivarama, however, explains it as भगी ( श्रीमान् ), रथ इव पथप्रवृत्तः । यथा रथः स्वमार्गेणैव गच्छति तथायं स्वपित्रादिकल्पितव्यवहारेण प्रवृत्तः न तूत्मार्गगन्ता ।

L. 11. उदयः । सम्पत्तेरुद्रेकः in the case of the king.

उपजीव्यमाना । सेव्या ।

L. 12. अनवरत...करः । In the case of the king the reference is to the practice of making gifts with water. In

the case of the elephant दान means 'ichor' and कर means 'the trunk'.

महाश्चर्याणि । अनन्यकृतयुद्धादीनि ।

L. 13. आदर्शः । a mirror, a model.

आगमः । source.

L. 14. उदयशैलः । In the case of friend it means 'अभ्युन्नतेः स्थानं and in the case of the sun 'the उदयाचल'

उत्पातकेतुः । धूमकेतुः । a meteor ( portending evil ).

L. 15. गोष्ठीबन्धानाम् । मधुरकथानाम् ।

धनुष्मतां प्रत्यादेशः । सर्वधनुर्धरोत्कृष्ट इत्यर्थः । प्रत्यादेशः ( निराकर्ता ) ।

L. 16. धौरेयः । धुरि (अग्रे) भवः धौरेयः श्रेष्ठ इत्यर्थः ।.

विदग्धानाम् । पण्डितानाम् ।

वैनतेयः । विनतायाः अपत्यं पुमान् । गरुडः ।

विनतानन्दः । (*a*) 'joy to the humble, (*b*) joy to विनता the mother of Garuda.

L. 17. वैन्यः । Also read as वैण्य is the son of वेण । He is also known as पृथु from whom the earth derived the name पृथिवी or पृथ्वी *Cf.* "ततोऽभ्युपगमाद्राज्ञः पृथोर्वैण्यस्य भारत । दुहितृत्वमनुप्राप्ता देवी पृथिवीति चोच्यते"–Harivamsa.

The reference here is to the Pauranic story that the earth was once full of mountains and Prithu made it even by removing them with his bow.

अरातयः । शत्रवः ।

The compound is to be expounded as अरातय एव कुलाचलाः in the case of the king, and as अरातयश्च कुलाचलाश्च in the case of वैन्य । (*a*) The king's enemies were as mountains ; (*b*) the mountains were Prithu's enemies.

L. 19. आडम्बरः । आटोपः । arrogant external appearance.

L. 20. एकविक्रम । (*a*) 'Unique valour' (*b*) 'one step.' विक्रमः । पादविक्षेपः ।

The idea is that king Sudraka excelled even Vasudeva; for, (1) he split the hearts of his enemies with his name

alone whereas Vasudeva had to take the form of Nrisimha to split the heart of his enemies and, (2) he possessed the three worlds by his unique valour—*one step* only, whereas Vasudeva (in the Vamanavatara) possessed the three worlds by *three steps*.

L. 21. अतिचिरकाल etc., Lakshmi remained washing the old stains due to the connection with thousands of bad kings that passed away. The idea is that, by the force of his sword, Sudraka won fortunes that removed the blots of all past misrule.

L. 23. मनसि धर्मेण । सदा धर्मचिन्तनात् । The word वसता in L. 25 is to be taken with धर्मेण and with all the other instrumentals.

L. 24. भुजे भुवा । राज्यभारक्षमत्वात् ।
मुखे शशिना । जनाह्लादकत्वात् ।

L. 26. अनुकरोति नारयणस्य । अनुकरोति governs the genitive of the person. कर्मण: शेषत्वविवक्षायां षष्ठी ।

P. 6, l. 1. यस्य etc. The principal sentence is समरनिशासु यस्य समीपं राजलक्ष्मीरभिसारिकेव सकृदगात् ।

मद......आचरत: । In other words the compound means 'breaking the heads of his enemies.' कलं (मनोज्ञं) पीठं (फलकम्) the flat surface. पाटनं । विदारणम् ।

लग्न···दन्तुरेण । The idea is that the pearls on the hilt were as if they were drops of water forced out of it ( the sword ) by the firm grip of his ( Sudraka's ) hand. लग्न (सम्बद्ध). धारैव जलं धाराजलम् । दन्तुर: । covered with.

L. 3. सुभट......वर्तिनी । परस्य ये सुभटा: ( योद्धार: ) तेषामुरांस्येव कपाटानि, तेभ्यो विघटितानि (विभिन्नानि) कवचानि ( तनुत्राणि ), तेषां यदसहस्रं तदेव नैल्यसादृश्यादन्धकार: ( तमिस्रं ), तन्मध्यवर्तिनी तदन्त:पातिनी ।

करटम् । कपोलम् ।

L. 4. आसार: । heavy shower.
दुर्दिनम् । thick darkness or a stormy day.

असकृत् । more than once. Siddhachandra follows the reading सकृत् and renders it as 'once for all' meaning that the Lakshmi which came once did not go back again.

L. 5. पतीन् । the husbands (of the enemy-ladies).

L. 7. यस्मिंश्चेत्यादि । In this sentence the idea is that in his (Sudraka's) rule, the things enumerated in the sentences were to be found only in the places noted against them and not in the people themselves. The figure of speech is known as परिसंख्या which is defined in Kavya Prakasa thus :—

किञ्चित्पृष्टमपृष्टं वा कथितं यत्प्रकल्प्यते ।
तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥

'That is known as परिसंख्या where, with or without a query, something is affirmed for the denial, expressed or implied, of something else similar to it.' The figure is very striking when, as here, it is based upon a श्लेष ( pun ). Thus चित्रकर्मसु वर्णसङ्कराः means that mixtures of *Varnas* (colours) were to be found in paintings, but mixtures (or confusions) of *Varnas* (castes) were not to be found in the people. It is to be noted that only half of the above idea is expressed while the rest is implied; and there is a pun on the word वर्ण । The rest of the sentence is also to be understood in the same way.

L. 8. दृढबन्धाः । कठिनबन्धाः । बन्धः (*a*) imprisonment, (*b*) an arrangement of a stanza in a particular shape such as खड्गबन्धः, मुरजबन्धः, पद्मबन्धः etc. There were no imprisonments because nobody committed crimes.

चिन्ता । (*a*) thinking, reflection, (*b*) care, anxiety. People had no cares, for, they had plenty.

L. 9. विप्रलम्भः । separation ( of lovers ). There were no separations as there were no premature deaths.

कनकदण्डाः । (*a*) golden handles, (*b*) fines in gold.

प्रकम्पः । (*a*) quivering, (*b*) trembling (out of fear).

रागविलसितानि । रागः ॥(*a*) musical modes such as वसन्त etc., (*b*) passions, such as anger etc. रागानां विलसितानि (चेष्टितानि)।

L. 10. गुणच्छेदाः। (*a*) गुणस्य ( ज्यारूपस्य ) छेदः ( त्रुटनम् ), ते। (*b*) गुणस्य (शौर्यादिः) विछेदः । सर्वदा सदाचारित्वात् ।

जालामार्गः । (*a*) window, (*b*) snare, deception.

शशि etc., शशी च कृपाणं ( खड्गम् ) च कवचः (armours ) च, तेषु.

L. 11. कलङ्काः । (*a*) चिन्हानि, (*b*) व्यभिचारादिदोषाः ।

शार्यक्षेषु । in chess ( शारि ) and dice ( अक्ष )

शून्यगृहाः । (*a*) शून्यस्थानानि (*b*) उद्वसगृहाणि or houses of banished people.

L. 12. परलोकाद्भयम् । न शत्रुलोकादिति भावः ।

अन्तः......अलकेषु । अन्तःपुरे भवाः अन्तःपुरिकाः ( नायिकाः ), तासां अलकेषु (केशेषु) ।

भङ्गः । वक्रता ।

L. 13. मुखरता। (*a*) tinkling (*b*) garrulousness.

कर । (*a*) hand, (*b*) tax.

कशः or कशा । a whip.

L. 14. मकर......ध्वनिः । अन्यत्र न भयाभावात्तदारोपणमितिभावः ।

L. 15. कलि etc., कलिकालाद्भयंत्रयं तस्मात्पुञ्जीभूतं ( समुदायीभूतं, compressed ), कृतयुगं ( सत्ययुगं ), तदनुकरोतीत्येवंशीला ।

त्रिभुवन etc., त्रयाणां भुवनानां समाहारः त्रिभुवनं, तस्य प्रसवभूमिः ( उत्पत्तिस्थानं ), धरित्री, तद्वदिव ।

L. 16. मज्ज......मालया । मज्जन्त्यः ( स्नान्त्यः ) या मालवविलासिन्यः (अवन्तिकामिन्यः) तासां कुचतटानि ( पयोधरस्थलानि ) तेषामास्फालनेन (आघातेन ) जर्जरिताः ( क्षीणाः, shattered ) ऊर्मिमालाः ( कल्लोलपङ्क्तयः ) यस्याः सा ।

L. 17. जयकुञ्जराः । परदलदलनसमर्थाः हस्तिनः ।

सिन्दूरम् । red lead (with which the elephants' foreheads were adorned).

सन्ध्यायमान । looking red like the evening.

L. 18. कोलाहलः । अनभिव्यक्तध्वनिः । a loud and confused noise.

मुखर । resounding with.

वेत्रवती is the name of a river.

L. 19. परिगता । surrounded by.

L. 21. निर्वृतः । निष्पन्नप्रयोजनः । One who is free of care or anxiety (having accomplished his objects).

मौलिमालाः । मौलयः ( किरीटानि शिरांसि वा ), तेषां मालाः ( स्रजः, पङ्क्तयः वा )

लालित । क्रीडित । caressed.

L. 22. लीलया । क्रीडया । स्वल्पप्रयासेनेत्यर्थः ।

अनेककुलक्रमागतैः । अनेके च ते कुलक्रमागताश्च, तैः । कुलपारम्पर्यागतैः नत्वाधुनिकैरित्यर्थः ।

L. 23. असकृत् । more than once.

L. 24. अलंकाराः । विभूषणानि ।

L. 25. कलाकलापाः । विज्ञानसमुदायाः ।

कठोरा । (शास्त्रे) दृढा ।

अतिप्रगल्भैः । very brave or eminent.

इङ्गित । inward thoughts.

L. 26. प्रभावानुरक्त । another reading is प्रेमानुरक्त ।

P. 7, L. 1. आख्यानक । episodes.

आख्यायिक । stories.

आलेख्य । painting.

L. 2. अवदलित......बन्धैः । by whom were shattered the broad foreheads of innumerable elephants of the enemies.

L. 3. किशोरकैः । बालैः ।

विक्रमैकरसैरपि । though essentially heroic.

विनयव्यवहारिभिः । who were yet humble in their demeanour.

L. 5. लघुवृत्ति । light, frivolous.

स्त्रैणम् । स्त्रीसमूहम् ।

आकलयतः । चिन्तयतः ।

L. 7. विलास । grace, charm, any feminine gesture indicative of amorous sentiment.

L. 8. विभ्रम nearly means the same thing as विलास।

लावण्यम्। loveliness. It is thus defined in the Sabdakalpa-druma:—

> मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा।
> प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥

अन्वयवति। अन्वयः (सुवंशः) अस्ति यस्य तस्मिन्।

अवरोधजन। women of the harem.

L. 9. घर्घरिका is a small bell used as an ornament. They are generally inserted in ear ornaments.

अस्फालनम्। वादनम्।

L. 10. स्वयमारब्धमृदङ्गवाद्यः। Siddhachandra explains it as स्वयं आत्मनैवारब्धं विदितं मृदङ्गवाद्यं वादित्रं येन स तथा। Prof. Peterson understands the commentator to mean 'he was himself his own instruments.' The Professor himself explains it as "As he played himself on the Mridangas."

L. 11. आसारः। धारासम्पातः। shower.

L. 12. आबद्ध……मण्डलः। surrounded by learned men.

प्रबन्धाः। stories.

L. 15. अक्षरच्युतक……प्रदानादिभिः। Siddhachandra explains this as follows:—अक्षरस्य वर्णस्य च्युतिर्यत्र तदक्षरच्युतकम्। यथा—'कुर्वन्दिवाकराश्लेषं दधच्चरणडम्बरम्। देव यौष्माकसेनायाः करेणुः प्रसरत्यसौ'॥ इति। अत्र करेणुपदात्ककारच्युतौ द्वितीयार्थप्रतीतिः। मात्रायाश्च्युतिर्यत्र तन्मात्राच्युतकम्। यथा–'मूलस्थितिमधः कुर्वन्पात्रैर्जुष्टो गताक्षरैः। विटः सेव्यः कुलीनस्य तिष्ठतः पथिकस्य सः॥' इति। विटपदादिकारमात्राच्युतौ वटस्यार्थस्य प्रतीतिः। पद्य-वर्णसंख्यया बिन्दुमात्रव्यवस्थापनेन तद्वर्णोपलब्धिः बिन्दुमती यथा—'ठ़िठठठ़ूठाठठ़' ठिठ़' ठिंठोः ठुठ़ठ़ठीठंठुः। ठठुठठठि ठुठ़ठाठुठठठीठठोठठंठ़ः॥' इति। एतत्पद्यं यथा–'त्रिनयनचूडारत्नं मित्रं सिन्धोः कुमुद्वतीबन्धुः। अयमुदयति घुसृणारुणरमणीवदनोपमश्चन्द्रः॥' गूढो गुप्तश्चतुर्थः पादो यस्य तद्गूढचतुःपादं चित्रम्। एतदुदाहरणं विदग्धमुखमण्डनादवसेयम्। प्रहेलिका प्रवह्लिका। सा शाब्दी आर्थी च। आद्योदाहरणं यथा–'पयस्विनीनां धेनूनां ब्राह्मणः प्राप्य विंशतिम्। ताभ्योऽष्टादश विक्रीय गृहीत्वैकां गृहं गतः॥' अत्र धेन्वा ऊना धेनूना तां धेनून-

मिति विंशतेर्विशेषणेनार्थावगमः सुगमः। आर्या यथा- जइ सासुआइ भणिआ पियवासघरंमि दीवयं देसु। ता कीस मुद्धमुही हिययंमि निवेसए दिट्ठिम् ॥' एतेन सर्वदा मम हृदयान्तर्वर्तित्वेन मम हृदयमेव भर्तृर्वासगृहम्। तेन तत्र दीपककरणानर्हत्वमिति ज्ञापितम्। एतासां प्रदानं समर्पणम्। आदिशब्दात्स्वात्मना तन्निर्माणं च तैः ॥

L. 18. नातिदूरं। recently.
दलसम्पुट। folds of petals.
पाटलिमा। श्वेतरक्तत्वम्।

L. 19. सहस्रमरीचिमालिनि। सहस्रसंख्याका ये मरीचयः (किरणाः) तैः मालते (शोभते) तान्धारयतीति वा यः तस्मिन्। सूर्ये।

L. 20. कौक्षेयक। a sword.
सन्निहितविषधरा। सन्निहिताः (पार्श्ववर्तिनः) विषधराः सर्पाः यस्याः सा।

L. 25. वेत्रलतावती। In the case of विन्ध्यवनभूमिः 'full of वेतस creepers.' In the case of प्रतीहारी 'holding the door-keeper's staff in her hand.'

P. 8, L. 1. हुङ्कारः। कोपध्वनिः।

L. 4. रत्नम्। Note that 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते ॥'

L. 5. देवः प्रमाणम्। Your Majesty will decide (what to do).

L. 7. राज्ञामालोक्य मुखानि। This is to see if they also desired to see the मातङ्गकुमारी।

L. 9. सा refers to the मातङ्गकुमारी and not to the प्रतीहारी।
अशनि......गतमिव। The reference is to the story that the mountains used to have wings and Indra once cut away those wings with his thunderbolt (अशनिः).

L. 10. कनकशिखरिणम्। मेरुम्।

L. 11. जालकानि। जालानि। मण्डलानि।
इन्द्रायुध। the rainbow.

L. 13. मणिदण्डिकाः। रत्नखचिताः यष्टयः।
गगनसिन्धुः। स्वर्नदी। आकाशगङ्गा।

L. 14. दुकूलम्। क्षौमं। silk or velvet.
वितानम्। उल्लोचः। cushion.
इन्दुकान्तमणिः। the moon-stone.

उद्धूय...कलापम् । उद्धूयमानः (व्यज्यमानः, fanned) सुवर्णस्य दण्डः (अवलम्बनयष्टिः) येषु, एतादृशानि चामराणि (*chowries*). तेषां कलापः (समूहः)

L. 15. उन्मयूख etc., Siddhachandra explains it as 'उदूर्ध्वं मयूखाः किरणाः यस्मिन्नेतादृशं यन्मुखं तस्य या कान्तिर्दीप्तिस्तस्य यो विजयो जयस्तेन यः पराभवस्तिरस्कारस्तेन प्रणते पादसंलग्ने । The idea is that the foot-stool made of crystal was like the moon who, as it were, took shelter at the king's feet being ashamed of the lustre of his face, which (lustre) was greater than his own.

L. 16. इन्द्रनीलमणिकुट्टिमः । floor paved with sapphires.

L. 18. उल्लसिताः । देदीप्यमानाः । shining, gleaning.

पद्मरागः,–गं । a ruby.

पाटल । pale-red or pink.

L. 19. गोरोचना । 'a bright yellow pigment prepared from the urine or bile of a cow, or found in the head of a cow.' Apte's Dictionary. Siddhachandra explains it as गोपित्तं, the bile of a cow.

L. 20. सनाथः । सहितः ।

पर्यन्तः । प्रान्तदेशः ।

प्रनर्तितदृशे । another reading is प्रनर्तितान्तर्देशे ।

L. 21. कुङ्कुमस्थासकाः । कुङ्कुमस्य (केसरस्य) स्थासकाः (हस्तबिम्बाः) । saffron paints. स्थासकः really means perfuming or smearing the body with any fragrant ungeant.

L. 22. अन्तरान्तरा । मध्ये मध्ये ।

कैलासशिखरिणम् । रजताद्रिम् ।

L. 23. परिवेषः । परिधिः । halo.

L. 24. निगडः । fetters, link

कटकः । string, link, bracelet.

केयूरः । armlet.

मलयजः । चन्दनः । sandal.

L. 25. कर्णोत्पलम् । श्रवणपङ्कजम् ।

L. 26. घोणा । नासिका ।

कलधौतम् । सुवर्णम् ।

पट्टायतम् । पट्टः (plate), तद्वदायतम् ( विस्तीर्णम् ) ।

P. 9, L. 1. ऊर्णा । भ्रुवोरन्तरावर्तः । a circle of hair between the eye-brows. Having such a circle of hair is said to be a sign of a very great man such as a monarch.

L. 2. शेखरः । चूडाभूषणम् ।

पर्यस्ताः । पतिताः ।

पुञ्जाः । समुदायाः ।

L. 3. पिशङ्गितम् । पीतरक्तीकृतम् । made reddish-brown.

लग्न । coming in contact with.

L. 4. वारविलासिनी । prostitute, harlot.

L. 6. अशेषजन etc. Henceforward the sentence contains many instances of the figure of speech known as विरोधाभास ।

L. 7. अद्वितीय । alone, (because matchless).

L. 8. खड्गमात्रसहायम् । because there was no necessity of any other weapon.

व्याप्त । (*a*) possessed, (*b*) famous.

L. 9. धनुः । (*a*) bow, (*b*) a zodiacal sign of the name.

आसनगतमपि धनुषि निषण्णम् । Following the commentary of Siddhachandra, Prof. Peterson explains, "The numerical value of the letters composing his name gives the धनुः sign of the Zodiac. On hearing his name therefore his enemies fled away."

L. 10. ज्वलत् । (*a*) burning, (*b*) shining.

सूक्ष्म । small.

सूक्ष्मदर्शिन् । sharp-sighted.

महादोषम् । (*a*) long-armed, (*b*) great faults.

L. 11. कुपतिम् । (*a*) lord of the earth, *Cf.* गोत्रा ।कुः पृथिवी पृथ्वी "—Amarakosa, (*b*) a bad husband.

दान । (*a*) gift, (*b*) ichor.

L. 12. कृष्णचरितम् । (*a*) of deeds like those of Krishna or Arjuna, (*b*) of black deeds.

कर । (*a*) tax, (*b*) hand.

L. 13. जर्जरित। hollowed.

L. 17. तालः। (*a*) वाद्यविशेषः, (*b*) तरुविशेषः (palm), (*c*) clapping.

आवलित। परावर्तित। slightly turned.

L. 20. अपाङ्गौ। लोचनप्रान्तौ।

L. 22. आर्यः। सभ्यः।

L. 23. आकुलाकुला। dishevelled.

काकपक्ष। locks of hair.

शलाका। ईषिका। a thin bar.

L. 24. मरकतम्। emerald.

L. 25. असुर etc. Siddhachandra explains it as "असुरैर्दैत्यैर्गृहीतं यदमृतं तस्य यदपहरणमपहृतिस्तत्र कृतो विहितो यः कपटेन कैतवेन पटुः प्रकटो विलासिनी मोहिनी स्त्री तस्या वेष आकृतिर्येन स तथा तस्य।" But पटु also means 'beautiful.'

The reference here is to Vishnu's guise as मोहिनी।

L. 26. Note that श्यामा also means 'a girl under sixteen years of age.'

संचारिणी। ever-changing. Siddhachandra explains it as सञ्चरणशीलां जङ्गमप्राणिरूपाम्।

पुत्रिका। पाञ्चालिका। a doll.

P. 10, L. 1. आगुल्फावलम्बिना। Another reading is गुल्फावलम्बिना। hanging up to the ankles.

L. 2. अवगुण्ठनम्। a veil.

L. 3. दन्तपत्रम्। a sort of ear-ornament.

छुरित। streaked, covered with, enveloped by, besmeared with.

L. 4. कपिल। tawny reddish.

आकपिल॰ The idea is that with the तिलक mark looking like a third eye she looked like Bhawani herself putting on the dress of a Kirata in imitation of that assumed by Siva.

ईशानरचित॰। Other readings are ईशानरंजनानुरचितकिरातवेषाम्, ईशानुरचितकिरातवेशाम् and ईशानाचरितानुचरितकिरातवेशाम्।

L. 7. उन्मद॰ The reference is to the story that once, Balarama, a brother of Krishna, under the influence of wine, called upon the river Yamuna to come to him that he might bathe; and, on his command being unheeded, plunged his plough-share into the river and dragged the waters after him.

L. 8. अतिबहल॰ Siddhachandra explains it as अतिबहलोऽतिप्रचुरो यः पिण्डालक्तकः पिण्डीकृतो यावकस्तस्य रसो द्रवस्तस्य रागो रक्तिमा तेन पल्लवितं संजातकिसलयं पादपङ्कजं यस्याः सा । बहल । thick, plentiful. पिण्डालक्तक is a red dye. पल्लवित । sprouting or having young sprouts.

L. 10. भङ्गान् । bits, fragments.

L. 11. आपिञ्जरेण......आलिङ्गितदेहाम् । with her body enveloped by the spreading (उत्सर्पिणा) mass ( जाल ) of the reddish-yellow ( पिञ्जर ) radiance ( प्रभा ) of the jewells of her anklets ( नूपुरमणीनां ), ( she looked ) as if embraced by the God of Fire, with an eye only for her beauty ( *i. e.*, disregarding her low birth), in order to remove the stain of her birth, in defiance of the Creator.

L. 13. अनङ्ग......मालायमानेन । Siddhachandra explains it as अनङ्ग एव वारणो गजः तस्य सिरसि शोभार्थं नक्षत्रमालावदाचरमाणेन ।

L. 14. आलवाल is a basin round the root of a tree etc. for water.

मेखलादाम । girdle-string.

L. 15. परिगत । surrounded.

L. 16. पुण्डरीकलोचन । In the case of the woman 'with her eyes like lotuses' and in the case of शरत् 'with lotuses as her eyes.'

L. 17. प्रावृषम् । the rainy season.

घनकेशजालाम् । (*a*) with dense masses of hair, (*b*) with clouds as her masses of hair.

मेखला । मध्यभागः ।

चन्दनपल्लवावतंसाम् । (*a*) with ornaments made of sprouts of the sandal wood tree, (*b*) with the sprouts of the sandal wood tree as ornaments.

L. 18. चित्र......भूषिताम् । (1) adorned with various (चित्र) ear-ornaments, (2) (*a*) adorned with the stars known as चित्र, श्रवण and भरणि or (*b*) adorned with the ornaments, (the stars known as) चित्रा and श्रवण ।

L. 19. हस्तस्थितकमलशोभाम् । (*a*) हस्ते स्थिता कमलस्य शोभा यस्याः ताम् । with the loveliness of a lotus in her hand, or as Prof. Peterson puts it 'with a hand as fair as a lotus;' (*b*) हस्ते स्थितं यत्कमलं तेन शोभा यस्याः ताम् । beautiful with the lotus in her hand. Prof. Peterson explains (*b*) as 'in her hand a fair lotus.'

मनोहारिणीम् । (*a*) captivating, pleasing, (*b*) stealing away the mind; (causing unconciousness).

अक्षतरूपसम्पन्नाम् । (*a*) possessed of good beauty, or, possessed of goodness (or well-being) and beauty, (*b*) infested with unhurt beasts, or, full of *Aksha* trees.

L. 20. अकुलीनाम् । (*a*) not nobly born, (*b*) not stationed upon the earth. Note that कुः means पृथ्वी ।

L. 21. मातङ्गकुलदूषिताम् । (*a*) disgraced by being born in the family of *Chandalas*, (*b*) injured by herds of elephants.

अमूर्तामिव । like an immaterial thing ( having no finite or fixed measure or motion) *Cf.* परिच्छिन्नपरिमाणवत्त्वं क्रियावत्त्वं वा मूर्तत्वम् ।

स्पर्शवर्जिता । untouchable ( because of the low caste in the one case and being immaterial in the other.

L. 22. विजातिम् । (*a*) of a low caste or family, ( जाति ) (*b*) without the *Malati* (जाति) flower.

L. 23. यक्षाधिपः । कुबेरः ।

अलकोद्भासिनीम् । (*a*) beautiful by her hair, (*b*) beauteous in Alaka (the capital of Kubera). Siddhachandra explains (*b*) as अलकाभिर्नगरीभिरुद्भासिनीम् ।

L. 26. निष्पादनम् । निर्माणम् ।

P. 11, L. 3. अक्लिष्टता । कोमलत्वं । delicacy.

L. 4. असंदृशसंयोगकारिणम् । who brings about improper combinations. Or, as Prof. Peterson would have it, 'who joins in one things so unlike each other.'

L. 5. सततनिन्दितसुरता । ( *a* ) सततं निन्दितं ( गर्हितं ) सुरतं यस्यां सा, (*b*) सततं निन्दिता सुरता ( सुरसमूहः ) यया ।

L. 7. प्रगल्भवनितेव । सम्प्रत्यारूढयौवनत्वादप्रगल्भापि प्रगल्भवनितेव । like a mature woman. In poetic compositions प्रगल्भा is a class of heroine said to be well versed in all kinds of caresses, lofty of demeanour, possessed of no great modesty, of mature age and ruling her husband.

L. 12. सुभाषितानाम् । Siddhachandra explains it as शृङ्गारनीतिवैराग्यप्रतिपादकानाम् ।

L. 13. पेशलः । दक्षः । skilled in.

वीणा । the Indian lute.

वेणुः । a flute.

मुरजः । a kind of drum or tabor.

L. 15. लक्षणानि । Siddhachandra explains them as सामुद्रिकोक्तानि ।

L. 21. अतिस्पष्टवर्णस्वरसंस्कारया । Siddhachandra explains it as अतिस्पष्टा ( अतिव्यक्ता ) वर्णा ( अक्षराणि ) स्वरा ( उदात्तादयः ), तेषां संस्कारः ( परिपाकः ) यस्यां सा तथा तया । Prof. Peterson however points out, that स्पष्टता वर्णोच्चारणे स्वरे मधुरता च in. p. 12. l. 2. below indicate that स्वर means 'voice' and not 'accent' as Siddhachandra takes it. But we also say 'sweet accents.'

स्तनयुग etc. The two breasts of your enemies, bathed in tears, being nearer the fire of sorrow in their hearts, and deprived of the string of pearls, are as it were performing penance. Note the pun on the word विमुक्ताहारः which can be dissolved as (*a*) विमुक्तः आहारः येन ' (*b*) वि

( विगतः ) मुक्ताहारः (string of pearls) यस्मात् । Siddhachandra dissolves, (*b*) as विमुक्तः आ (समन्तात्) हारः (necklace). येन । Note that a man practising penance also bathes, maintains the sacred fire and remains without food.

L. 26. अतिवयसम् । अति वयः यस्य तम् ।

P. 12, L. 3. असंकीर्णः । distinct.

अभिव्यक्ताः । प्रकटाः । expressed, uttered.

मात्राः । एकारादयः ।

संस्कारः । व्याकरणशुद्धिः ।

विशेषसंयुक्ताम् । Siddhachandra explains it as विशेषः ( शब्दश्लेषादिः ) तेन संयुक्ताम् । Prof. Peterson renders it as 'of more than ordinary merit.'

L. 5. संस्कार । the faculty of recollection.

L. 14. अग्निशापात् etc. Siddhachandra explains the allusion here as follows :—छद्मना गृहीतरूपस्य वह्नेर्यादृशं सम्वादं श्रुतवाग्भृकुस्तथैवोक्तवानिति तं प्रतिक्रुद्धेन वह्निना शप्तः"

L. 16. नाडिका...सारी । नाडिका ( घटिका consisting of 24 minutes) तस्याः छेदः ( परिसमाप्तिः end), तस्यां प्रहतः ( ताडितः ) पटुः ( महान् ) पटहः ( दुन्दुभिः ), तस्य नादं अनुसर्तुं शीलं यस्य ।

L. 20. रभसेन । वेगेन ।

अङ्गदपत्रभङ्गमकरकोटिः । Siddhachandra explains it as अङ्गदपत्राणां भङ्गः ( त्रुटनं ) तस्य या मकरकोटिः ( वक्रप्रदेशः ). Prof. Peterson says, "This explanation of भङ्ग is wrong. पत्रभङ्ग is the same as पत्ररचना or पत्रलता ।" अङ्गदम् । an ornament or bracelet worn on the upper arms. पत्र and पत्रभङ्ग generally mean the drawing of lines or figures of painting on the person ( or face ) with fragrant and coloured substances such as musk, saffron etc.

L. 21. आक्षेपः । परस्परसंलग्नता । drawing together.

उल्लसित । gleaming.

L. 22. पटवासः । पिष्टातः । perfumed powder.

L. 23. गमनप्रणामलालसानाम् । 'eager to do him homage as he went.'—Peterson. The गमन refers to that of the king.

अहमहमिकया । Siddhachandra explains it as "अहं शक्तोहं शक्त इत्यहमहमिका । मयूरव्यंसकादित्वात्साधुः । तया ।" Balakrishna explains it as परस्पराहंकारेण ।

L. 24. प्रेङ्खोलिताः । तरलिताः । oscillating.

जरत् । infirm, decayed, old. But Siddhachandra explains जरत्कलहंसा as कादम्बाः a kind of goose.

P. 13, L. 1. जर्जरितम् । worn out, overpowered, drowned in.

L. 2. आस्फलनम् । ताडनं ।

रसिताः । शब्दं कुर्वाणाः ।

L. 4. दीर्घिकाः । वाप्यः ।

कोलाहलः । कलकलः । a loud and confused noise.

रसना । कटिमेखला ।

L. 5. उत्सुकितानाम् । another reading is उत्सुकानाम् ।

तारतर । उच्चतर ।

विरावः । शब्दः ।

उल्लिख्यमान । घृष्यमाण ।

कांस्य । bell-metal.

झेङ्कारः । अव्यक्तध्वनिः ।

L. 9. हेला । लीला । क्रीडा ।

L. 12. शलाका । a thin bar or piece.

दन्तुर । notched, dentated.

पर्यस्त । पतित ।

L. 13. रणरणायितानाम् । रणरणिति शब्दानाम् ।

L. 16. कुसुमप्रकरम् । पुष्पसमूहम् ।

L. 22. करङ्कः । स्थगी । a small box.

आप्तः । इष्टः ।

L. 24. गगनाभोगः । the firmament of the sky.

L. 26. उन्मिषन्तीभिः । प्रकाशं प्राप्नुवन्तीभिः ।

P. 14, L. 1. अवदलित । मर्दित ।

मञ्जरी । वल्लरी । a cluster of blossoms.

विभ्रमः । भ्रान्तिः ।

L. 2. प्रकरः । समूहः ।

अष्टमी...वडम्बिनीभिः । अष्टमीचन्द्र एव शकलं (fragment), तस्य तले (in its lower part) उल्लसन्त्यः दीप्यमानाः ये अमृतस्य बिन्दवः तान् विडम्बयन्ति ( तिरस्कुर्वन्ति ) इत्येवंशीलास्ताभिः ।

L. 3. कणिकाः । सूक्ष्मबिन्दवः ।

संततिः । परंपरा ।

L. 5. विरल । स्वल्प ।

राजलोके । राजगृहे ।

L. 6. विततः । विस्तीर्णः ।

वितानम् । a cushion or a platform.

L. 7. द्रोणी । कुण्डिका ।

L. 9. कर्पटः । a piece of cloth.

L. 12. अवगुण्ठित । covered.

अंशुकनिबिडनिबद्धस्तनपरिकराः । अंशुकैः ( वस्त्रैः ) निबिडं ( दृढं ) निबद्धाः स्तनपरिकराः । ( कुचाभोगाः ) याभिः ताः ।

L. 13. कर्णोत्सङ्गोत्सारितालकाः । कर्णोत्सङ्गात् ( कर्णसमीपात् ) उत्सारिताः ( उपरिन्यस्ताः ) अलकाः याभिः ताः ।

L. 24. जाड्यम् । शीतम् ।

L. 26. उदपादि । उपपन्नोऽभूत् ।

स्फोटयन् । द्विधाकुर्वन् ।

P. 15, L. 1. झल्लरी । a cymbol, a kind of drum.

L. 4. विषधरनिर्मोकपरिलघुनी । विषधराणां ( सर्पाणां ) निर्मोकः ( कञ्चुकः ) तद्वत्परिलघुनी ( अतिलघुनी ). निर्मोकः । slough.

L. 6. छेदः । खण्डः

दुकूलपट्टः । silk garment.

पल्लवेन । प्रान्तेन ।

L. 9. झङ्कारिभिः । झंकारशब्दं कुर्वाणैः ।

L. 10. अलिकदम्बकैः । भ्रमरसमूहैः ।

अनुबध्यमान । accompanied or followed closely.

वासः । परिमलः ।

L. 11. शेखरः । शिरोभूषणम् ।

अम्बरपरिवर्तः । change of dress. परिवर्त is also read as परीवर्त ।

L. 14. परिपीतधूपधूमवर्तिः । Siddhachandra explains it as "मुखवीगन्ध्यप्रतिरोधनार्थं परि सामस्त्येन पीता गृहीता धूमवर्तिर्द्रव्यविशेषो येन सः ।

उपस्पृश्य । आचम्य ।

प्रमृष्ट । well washed.

L. 16. वेत्रलता...करेण । Siddhachandra omits अनवरत and explains this as वेत्रस्य वेतसस्य लता ( सरलयष्टिः ), तस्याः ग्रहणं (धारणं), तस्य प्रसङ्गः (अभ्यासः), तस्मात् अतिजरठं (अतिकठिनं) यत्किसलयं तदनुकरोति तादृशं करतलं यस्यैवंविधः करः यस्य तेन । On this Prof. Peterson remarks: " If the reading is right प्रतीहार्या प्रसारितबाहुम् is an Ekadesanvaya ; and अनवरत is an epithet of परिजनेन । Their hands (कर) had palms (करतल) as described. So the Com. But, besides the awkwardness of expression, such an epithet of परिजनेन has no peculiar appropriateness here." Another reading is प्रसारितमवलम्ब्यानवरतवेत्रलताग्रहणप्रसङ्गादतिजरठकिसलयानुकारि करतलं करेण" having the compound अनवरत...अनुकारि as an adjective qualifying the करतलं of the प्रतीहारी । This seems to be correct as वेत्रलताग्रहण can properly apply only to the प्रतीहारी । There are two more readings one of which is exactly the same as above except that it reads अनतिजरठ for अतिजरठ । The other one is "प्रसारितं बाहुमवलम्ब्यानवरतवेलत्रताग्रहणप्रसङ्गादतिजरठकिशलयानुकारि करतलं करेण" ।

L. 18. जवनिका । a screen or curtain surrounding a tent.

परिगत । सहित ।

पर्यन्तः । प्रान्तः ।

L. 19. मृगनाभिपरिगतेनामोदिना । made more fragrant by the infusion of musk. Another reading is मृगनाभिपरिमलेनामोदिना ।

L. 20. अविरलविप्रकीर्णेन । अविरलं वप्रकीर्णेन । densely strewn with.

L. 21. कुसुमोपहारेण । पुष्पसमूहेन ।

निचितम् । व्यस्तम् ।

उत्कीर्ण । carved, engraved.

शालभञ्जिकाः । पुत्रिकाः । dolls, pictures.

L. 22. कलधौतम् । सुवर्णम् ।

L. 23. अखिल० । अखिलः विगलितः जलनिवहः यस्मिन्नेवंभूतः धवलः जलधरः, तस्य शकलं, तमनुकारिणा ।

L. 24. वासित । scented.

प्रच्छदपटेन । with a bed-cloth or coverlet.

L. 25. पट्टम् । fine cloth or silk.

उपधानम् । pillow or cushion.

अध्यासित । अधिष्ठित ।

शरोधाम । शिरस्थलम् ।

प्रतिपादुकाः । अधःपीठानि ।

L. 26. सनाथीकृता । सहिता ।

वेदिका । संस्कृता भूमिः ।

P. 16, L. 1. आस्थानमण्डपः । hall of audience ; assembly-room.

L. 2. उत्सङ्गनिहितासिलतया । उत्सङ्गे (क्रोडे) निहिता (स्थापिता) असिलता । ( खड्गलता ) यया तया ।

L. 10. अवच्छन्न । another reading is अवच्छिन्न । both pactically mean the same thing *viz.*, आच्छादित ।

L. 18. नीलपाटलः । Siddhachandra explains it as श्वेतरक्तः ।

कषायमधुरः । कषायश्च मधुरश्च । astringent and sweet.

L. 19. नखराः । नखाः ।

मुक्ताफलत्विषि । मुक्ताफलानां त्विट् (कान्तिः) इव त्विट् येषु येषां वा तानि ।

L. 20. हरिन्ति । नीलानि ।

L. 22. वचनमाक्षिप्य । interrupting.

L. 24. कात्स्न्र्येन । समग्रत्वेन ।

L. 26. आगमः । उपलब्धिः ।

P. 17, L. 2. छद्मम् । in disguise.

उषितम् । lived.

L. 7. पूर्वापर...लग्ना । पूर्वश्च अपरश्च (west) पूर्वापरौ जलनिधी, तयोः वेलावनं ( तटकाननम् ), तावत्पर्यन्तं लग्ना ( सम्बद्धा ) ।

L. 10. मदकल० । मदेन कलाः ( मनोज्ञाः ) कुरराः (ospreys), तेषां कुलानि, तैः दश्यमानानि ( आस्वाद्यमानानि ) मरिचस्य (black pepper) पल्लवाः यस्यां सा ।

L. 11. मधुमद० । मधु ( कापिशायनं, liquor), तस्य मदः (आवेशः intoxication), तेन उपरक्ता ( लोहिता ) केरली ( केरलदेशोद्भवा स्त्री ), तस्याः कोमलच्छविरिव छविः ( कान्तिः ) यस्य तेन । केरल is the name of

modern Malabar. The idea is that Malabari women who are naturally ruddy and delicate, were the more so on account of the intoxication of liquor.

L. 13. कक्कोल also written as कंकोल is a plant bearing berries. It is otherwise called केशपल ।

L. 14. शबलाः । कर्बुराः । variegated.

पांसुला । dusty.

L. 15. स्रस्तर । another reading is संस्तरः । Both mean a bed. But संस्तरः especially means 'a bed of leaves etc.; and that seems to be the proper word here.

नालिकेर । another reading is नारिकेल ।

करीर । the shoot of a bamboo. It also means a thorny plant growing in deserts and eaten by camels.

केसर । It may mean either the Bakula tree, or, saffron.

परिगतप्रान्तैः । परिगतः ( व्याप्तः ) प्रान्तः ( अन्त्यप्रदेशः ) येषां तैः ।

ताम्बूलीलतावनद्धम् । ताम्बूली चासौ लता च, तया अवनद्धं ( बद्धं ) ।

L. 18. मदगन्धिना । मदस्य गन्ध इव गन्धो यस्मिन्नेतादृशेन । qualifies एलालतावनेन ।

नखमुख० । Note the belief of ancient writers that pearls are found in the temples of elephants.

L. 19. प्रेताधिपः । यमः ।

सदा···भीषणा । Siddhachandra explains it as (सदा) निरंतरं संनिहितो निकटवर्ती मृत्युर्यमस्तेन भीषणा भयंकारिणी । पक्षे सदा निकटस्थो मृत्युरजगरस्तेन भीषणा भयावहा । यद्वा करणे कार्योपचारान्मृत्युर्व्याघ्रादयस्तै-र्भीषणेत्यर्थः ।

L. 20. महिषः । (*a*) wild buffalo. (*b*) the riding animal of यम ।

पताकिनी । सेना ।

बाणासनारोपितशिलीमुखा । Siddhachandra reads it as बाणसमारोपितशिलीमुखा and explains it as बाणाख्ये वृक्षविशेषे समारोपिताः स्थापिताः शिलीमुखाः भ्रमराः यया सा तथा । पक्षे बाणे शरे सम्यक्प्रकारेणारोपिताः

शिलीमुखाः लोहखण्डाः यस्यामिति विग्रहः । Balakrishna adopts the reading given in our text and explains it as (*a*) बाणा आसनाश्च वृक्षविशेषास्तेषु आरोपिताः शिलीमुखा भ्रमरा यस्यां सा । (*b*) बाणासनेष्वारोपिताः शिलीमुखा बाणा यत्र ।

L. 21. विमुक्तसिंहनादा । Siddhachandra explains it as विमुक्तः त्यक्तः । अर्थात्केसरिभिः । सिंहनादः केसरिध्वनिर्यस्यां सा तथा । पक्षे सुभटैर्विहितः सिंहनाद इव नादो यस्याम् । Balakrishna reads it as विविक्त० ।

प्रचलित......अलंकृता च । Siddhachandra explains it as सेना प्रकर्षेण प्रचलितो यः खड्गो गण्डकस्तेन भीषणा भयावहा । रक्तचन्दनं रक्ताङ्गं वृक्षविशेषस्तेनालंकृता च भूषिता च । पक्षे प्रचलितो यः खड्गः कौक्षेयकस्तेन भीषणा भयजनका । रक्तमेव चन्दनं तेनालंकृता च । चर्चितेत्यर्थः ।

L. 22. कर्णीसुतः । also known as Muladeva is said to be the father of the science and art of thieving, and to have two men named विपुल and अचल as his friends and a man named शश as his minister.

सन्निहित······शशोपगता च । In the case of the forest it is to be interpreted as सन्निहिताः समीपवर्तिनः विपुलाः पृथुलाः (large, extensive) अचलाः पर्वताः यस्यां सा । शशः मृदुलोमकः (hare) लोध्रवृक्षो वा, तेन उपगता सहिता ।

L. 23. नीलकण्ठः (*a*) peacock, (*b*) Siva.

पल्लवारुणा । (*a*) पल्लवैः अरुणा, (*b*) पल्लववदरुणा ।

L. 24. वेला । अम्भसो वृद्धिः समयो वा ।

श्रीद्रुमोपशोभिता । (*a*) श्रीद्रुमैः ( तन्नामकवृक्षैः ) उपशोभिता, (*b*) श्रीः ( लक्ष्मीः ) च द्रुमः ( कल्पद्रुमः ) च, ताभ्यां उपशोभिता ।

वारुणी । ( *a* ) Durva grass, ( *b* ) liquor. Siddhachandra reads it as वारुणपरिगता and explains it as वारुणानां वृक्षविशेषाणां समूहो वारुणं तेन परि सामस्त्येन गता प्राप्ता चेत्यर्थः । पक्षे······वरुणस्येदं वारुणं मद्यं तेन परिगता सहिता । समुद्रप्रभवात्तस्येति भावः ।

L. 25. घन......अलंकृता । (*a*) घनवत् (मेघवत्) श्यामला or घनं ( निबिडं ) श्यामला कृष्णा । (*b*) घनैः मेघैः श्यामला । घनश्यामला । (*a*) अनेकशताः (बहुशतसंख्याकाः) ह्रदाः (lakes), तैरलंकृता । (*b*) अनेकाः (भिन्नभिन्नरूपाः) शतह्रदाः (lightnings), तैरलंकृता । घनश्यामला च अनेकशतह्रदालंकृता चेति विग्रहः ।

ऋक्ष । (*a*) भल्लूक (*b*) नक्षत्र । सार्थः । समुदायः ।

L. 26. हरिणः । (*a*) a deer, (*b*) the spot in the moon.

चमर......पालिता: । Siddhachandra explains it as चमराश्चमर्यो, मृगा हरिणाः, वालव्यजनानि चामराणि, तैरुपशोभिताः । सह मदेन वर्त्तमानाः समदा ये गजा हस्तिनस्तेषां घटाः समुदायास्ते परिपालिता यया सा । Balakrishna, however, explains it as चमरमृगसम्बन्धिवालव्यजनैरुपशोभिता । चमरमृगवालैः व्यजनेन तालवृन्तेन चोपशोभिता ।

P. 18, L. 1. स्थाणुसंगता । (*a*) स्थाणवः ( निष्पत्रकाण्डाः वृक्षाः कीलकाः वा—branchless trunks of trees, or, pegs or ports ) संगताः प्राप्ताः यया सा । (*b*) स्थाणुना (महादेवेन) संगता (मिलिता) ।

L. 2. मृगपतिसेविता । (*a*) मृगपतयः (सिंहाः) सेविताः (आश्रिताः) यया, (*b*) मृगपतिना (सिंहेन) सेविता । this is because the lion is the वाहन of पार्वती ।

प्रसूतकुशलवा । (*a*) प्रसूताः कुशानां लवाः ( pieces, fragments, bits ) यया । ( *b* ) प्रसूतौ कुशलवौ ( तन्नामकसुतौ ) यया ।

निशाचरपरिगृहीता (*a*) निशि चरन्ति इति निशाचराः ( उलूकादयः ), तैः परिगृहीता स्वीकृता । (*b*) निशाचरेण (रावणेन) परिगृहीता (स्वस्थानं नीता).

L. 3. अगुरु । a fragrant aloe wood and tree.

तिलक । (*a*) a kind of tree, (*b*) a mark made with ungnents.

L. 4. समदना । मदनेन ( *a* ) मदनवृक्षेण, ( *b* ) मन्मथेन सह वर्तमाना ।

बालग्रीवेव । बालानां ग्रीवा (कन्धरा) तद्वदिव ।

L. 5. व्याघ्रनखपङ्क्तिमण्डिता । (*a*) व्याघ्राः ( शार्दूलाः ), च नखाः (मृगविशेषाः) च, तेषां पङ्क्तयः (श्रेणीः), ताभिः मण्डिता । Siddhachandra say's that नख is a kind of odorous animal. Monier Williams says that it is "apparently a dried shell-fish." (*b*) व्याघ्राणां नखाः, तेषां पङ्क्तिः, तया मण्डिता । "बालरक्षार्थं व्याघ्रनखा बध्यन्त इति प्रसिद्धिः"—Siddhachandra.

गण्डकाभरणा । (*a*) गण्डकाः (rhinoceros) एव आभरणं यस्याम् । (*b*) गण्डस्थलपर्यन्तवर्ति यत्तादृशं ग्रीवास्थं देशविशेषे गण्डकमिति प्रसिद्धं तदाभरणं यस्यां सा—Siddhachandra.

प्रकटितमधुकोशाकशता । Siddhachandra explains it as प्रकटितं आविष्कृतं यन्मधु माक्षिकं (honey) कोशा एव कोशकः पट्टसूत्रस्थानानि (the

cocoons of silk-worms), तेषां शतं यस्यां सा। पक्षे प्रकटितं मधु मद्यं (liquor), तस्य कोशकानि पानपात्राणि तेषां शतं ययेति विग्रहः।

L. 6. महावराह। (*a*) a great boar, (*b*) the great boar—the third incarnation of Vishnu.

L. 7. दशमुखः। Ravana.

L. 8. चटुला। चञ्चला।

तुङ्ग। high.

शालाः। (*a*) शालवृक्षाः (*b*) गृहैकदेशाः।

आकुला। व्याकुला, व्यग्रा।

L. 9. उद्वृत्तः। निर्मर्यादः। another reading is उन्मत्त।

कण्टकिता। (*a*) कण्टकयुक्ता। (*b*) कण्टकः (रोमाञ्चः) संजातोऽस्या इति।

L. 10. मत्ता। drunken.

प्रलापः। (*a*) कलशब्दरूपः, (*b*) अनर्थकं वचः (meaningless talk).

उन्मत्तेव......तालशब्दा। उन्मत्तेवोन्मादवातयुक्तेव वायुवेगेन पवनाधिक्येन कृतो विहितस्तालवृक्षैः शब्दो यस्यां सा। उन्मादवातवानपि तालशब्दं (noise made by the clapping of the hands) करोतीति प्रसिद्धः—Siddhachandra.

L. 11. तालपत्रं। (*a*) palm leaf, (*b*) an ear-ornament known a ताटका or ताडंका।

शराः। (*a*) मुञ्जादण्डाः, (*b*) बाणाः।

L. 12. निचित। व्याप्त।

अमरपतिः। Indra, the thousand-eyed god.

नेत्रम्। (*a*) Siddhachandra takes it as (1) a kind of tree (वृक्षविशेष) or (2) जटा and quotes 'जटांशुक्योर्नेत्रम्'— Amara-Kosa. In this connection Balakrishna quotes "नेत्रं मन्थगुणे (the string of a churning-stick) वस्त्रे तरुमूले विलोचने"—Viswakosa.

L. 13. तमालनीला। (*a*) तमालैः (वृक्षविशेषैः) नीला। (*b*) तमाल-वन्नीला।

पार्थः। Arjuna.

वानराक्रान्ता। In the case of Arjuna this is because his banner bore the mark of a monkey.

L. 14. वेत्रलताशत । (*a*) वेत्राः (वृक्षाः) लताः ( वलयः ) च, तासां शतं । (*b*) वेत्रलताः (वेत्रयष्टयः) तासां शतम् ।

विराटनगरी । The city in which Pandavas lived in disguise in their exile. विराट was a king of the Matsyas. His daughter Uttara was married to Abhimanyu, the son of Arjuna.

L. 15. कीचकाः । (*a*) hollow bamboos rattling in the wind, (*b*) name of a people the chief of which कीचक was the commander-in-chief of king Virata.

व्याधा......मृगा । व्याधैः अनुगम्यमानाः (pursued) तरलाः (भयविह्वलाः ) तारकमृगाः विचित्रमृगाः यस्यां according to Siddhachandra, or, तरलतारकाः ( तरलाः चञ्चलाः तारकाः अक्षिकनीनिकाः येषां ते ) मृगाः according to Balakrishna followed by Prof. Peterson, (*b*) व्याधेनानुगम्यमानस्तरलतारकान्मृगश्चन्द्रनक्षत्रं यस्यामिति विग्रहः । महादेवेन व्याधरूपधारिणा हतं तस्मार्थं मृगनक्षत्रमिति प्रसिद्धम्—Siddhachandra.

L. 16. चीराणि । तृणविशेषाणि ।

जटा । (*a*) a fibrous root (शिफा), (*b*) matted hair.

वल्कलानि । (*a*) barks, (*b*) bark garments.

L. 17. सप्तपर्ण । (*a*) seven leaves, (*b*) name of a tree.

क्रूरसत्वा । (*a*) क्रूरं सत्वं ( मनः ) यस्याः, (*b*) क्रूराः सत्वाः ( जन्तवः ) यस्याम् ।

पुष्पवती । ( *a* ) woman in menses, ( *b* ) abounding in flowers.

L. 19. अन्तःपाति । अन्तर्वर्ति ।

L. 20. सुरपति......सलिलस्य । The reference is to the story that Agastya once drank up the ocean because he wished to help Indra (सुरपति) and the gods in their wars with a class of demons called Kaleyas who had hid themselves in the waters and oppressed the three worlds.

मेरुमत्सरात्......अनुलंघिताज्ञस्य । The reference is to another story that Agastya humbled the Vindhya mountains by making them prostrate themselves before him, when, vying with Mount Meru, they tried to rise higher and higher till

they well nigh occupied the sun's disc and obstructed his path in spite of the repeated requests of the gods.

L. 23. जठर......दानवस्य । The reference is to a legend that Agastya once ate up a Rakshasa named वातापि who assumed the form of a ram and digested him.

सुरासुर......रजसः । सुराः च असुराः च, तेषां मुकुटाः (किरीटानि), तेषु मकररत्नं (मकराकारः पक्षः) तस्य कोटि (अग्रं), तया चुम्बितं ( गृहीतं ) चरणयोः रजः यस्य । *i. e.*, highly respected by both the gods and the demons.

L. 24. विशेषकः । तिलकम् ।

सुरलोक...प्रभावस्य । The reference is to the following story about king Nahusha, grand-son of Pururavas and father of Yayati :—When Indra was concealing himself in waters to expiate the sin of killing the Brahman वृत्र, king Nahusha was asked to occupy his seat. While there Nahusha wanted to win the love of Indra's wife and caused the seven sages to convey him to her on a palanquin. In asking them to be quick on the way he used the words सर्प, सर्प (move on, move on), when Agastya cursed him to be a सर्प ( serpent ) and he fell down from the sky and remained a serpent till relieved from that state by Yudhisthira.

P. 19, L. 1. आषाढिना । अषाढः (पलाशदण्डः), सः अस्य अस्ति इति आषाढिन् । one bearing a Palasa staff.

L. 2. त्रिपुण्ड्रकम् । a mark on the forehead consisting of three lines made with भस्म (cow-dung ashes).

कुशचीरवासस । कुशा एव चीवरं वासो यस्य तेन—Siddhachandra. चीवर and चीर mean especially the dress of a mendicant.

मुञ्ज is a kind of grass.

आकलित । व्याप्त ।

L. 3. प्रत्युटजम् । उटजं उटजं प्रति । from hut to hut.

L. 5. शुकहरितैः । शुकवत् हरितैः ।

परिसरः । पर्यन्तभूमिः ।

L. 6. कलशयोनिः । Agastya. It is said that, once, at the sight of the lovely nymph Urvasi, the seed of Mitra and

Varuna fell from them. Part of the seed fell in a jar whence arose Agastya, and part into water whence sprang Vasishtha. That is why Agastya is called कलशयोनि and कुम्भयोनि ।

बद्धवेणिकया । वेण्येव वेणिका, बद्धा वेणिका यया तया —Siddhachandra. Balakrishna explains बद्धवेणिकया as बद्धप्रवाहया ।

L. 7. परिगतम् । surrounded.

L. 8. दशवदन……विरामः । दशवदनस्य (रावणस्य) लक्ष्मीः (श्रीः) तस्य विभ्रमः ( विलासः ), तस्य विरामः (अवसानं नाशनमित्यर्थः) यस्मात् सः ।

L. 11. निलीन । संलग्न ।

निभृत । Siddhachandra takes it as an indeclinable ( निभृतं ) meaning अत्यर्थं and qualifying पाण्डुः । But, as Prof. Peterson points out, it is better to take it as an adjective meaning 'still' or 'silent' and qualifying कपोताः as " it is the absence of noise which heightens the illusion."

लग्नतापस…राजयः । लग्नाः तापसानां यदग्निहोत्रं तस्य धूमानां राजिः येषु ।

L. 15. दशरथ……मूलम् । दशरथस्य सुतः, तस्य निशिताः (तीक्ष्णाः) शराः, तेषां निकरः (समूहः), तस्य निपातः, तेन निहताः रजनिचराः (राक्षसाः), तेषां बलं (सैन्यं), तत्सम्बन्धि बहलं (copious, or, thick) रुधिरं, तेन सिक्तं मूलं यस्य ।

L. 16. तद्रागाविद्धनिर्गतपलाशम् । तस्य रागेण आविद्धानि ( युक्तानि ) निर्गतानि पलाशानि (पलाशपुष्पाणि) यस्मिन् ।

L. 17. आभाति । शोभते ।

नवकिसलयम् । नवानि किसलयानि यस्मिन् ।

L. 18. निवहः । समूहः ।

L. 19. विवराणि । छिद्राणि ।

अजस्रम् । निरन्तरम् ।

L. 20. लुलिताः । व्याकुलीभूताः ।

L. 21. अनवरत……प्रोत्साहितः । अनवरतं या मृगया ( आखेटः ), तया निहताः, तेभ्यः ( or तेषां ) शेषाः वनहरिणाः, तैः प्रोत्साहितः ( उत्साहं प्रापितः ) ।

L. 22. विप्रलम्भः । वियोगः (separation), or विप्रतारणम् (delusion).

L. 24. पिशुनौ । सूचकौ ।

कबन्धः । (*a*) a demon of the name mentioned in the Ramayana, (*b*) Rahu. The original meaning of the word is 'a headless trunk retaining life.'

L. 25. अत्यायतः । अतिविस्तृतः ।

L. 26. योजनबाहुः । It is the name of a demon.

अगस्त्य......शङ्काम् । अगस्त्यस्य अप्रसादेन ( कोपेन ) आगतः नहुषस्य ( राज्ञः ) अजगरस्य ( सर्पस्य ) कायः, तस्य शङ्काम् ।

P. 20, L. 1. विरहविनोदनार्थम् । विरहस्य विनोदनम् ( परिहारः ) तदर्थम् ।

L. 2. उल्लसन्ती । springing up, arising. The reference is to the birth of Sita from the earth.

वनचरैः । भिल्लादिभिः ।

L. 5. उत्साहित । excited.

मत्सरः । envy, jealousy.

L. 6. वेधसा । by the Creator.

L. 7. प्रलय......बन्धम् । प्रलयकाले (कल्पान्ते) विघटिताः (नष्टाः) ये अष्टदिशां विभागाः (प्रदेशाः), तेषां संधयः (संयोगाः), तेषां बन्धाः (मर्यादाः) यस्मिन् तस्मिन् ।

L. 8. अनवरत......जलम् । अनवरतं मज्जन्त्यः ( स्नानं कुर्वत्यः ) उन्मदाः शबराणां कामिन्यः, ताभ्यां कुचावेव कलशौ, ताभ्यां लुलितं (आलोडितं) जलं यस्य तत्तथा ।

L. 9. उत्फुल्ल......कह्लारम् । उत्फुल्लानि ( विकसितानि ) कुमुदानि (कैरवाणि, white water-lily) कुवलयानि (कुवेलानि, blue water-lily) कह्लाराणि (सौगन्धिकानि, white lotus) च यस्मिन् ।

L. 10. उन्निद्र......चन्द्रकम् । उन्निद्राणि ( विकसितानि ) अरविन्दानि (कमलानि red or blue lotus), तेषां मधु (रसः) तस्य बिन्दवः, तेषां निस्यन्दः (द्रवः, trickling down, flow), तस्य बद्धाः (composed or formed of) चन्द्रकाः यस्मिन् । चन्द्रक means a circle of the moon's shape ( formed by a drop of oil or similar substance thrown into water. It also means the eye in a peacock's tail. Siddhachandra adopts this latter sense when he explains it as मयूरपिच्छचन्द्रकारिणः चन्द्रकाः ।

अलि......सौगन्धिकम् । अलीनां (भ्रमराणां) कुलानि, तेषां पटलं (समूहः), तेन अन्धकारितानि । (rendered dark) सौगन्धिकानि (कह्लाराणि) यस्मिन् ।

L. 11. आरसितेन । शब्दितेन ।

सारसाः । cranes or swans.

अम्बुरुह:......कोलाहलम् । अम्बुरुहाणि (कमलानि) तेषां मधु, तस्य पानं, तेन मत्ताः कलहंसकामिन्यः (वरटाः, ducks, drakes, geese), ताभिः कृतः कोलाहलः (a loud and confused noise) यस्मिन् ।

L. 12. अनेक......मालम् । अनेके ये (जले चरन्तीति) जलचराः, पतङ्गाः (पक्षिणः), तेषां शतं, तस्य संचलनं, तेन चञ्चलिताः (क्षोभं प्रापिताः) वाचालाः (मुखराः, noisy) वीचयः (लहर्यः), तासां मालाः यस्मिन् ।

अनिल......दुर्दिनम् । अनिलेन (वायुना) उल्लासिताः (made brilliant or splendid) कल्लोलाः (लहर्यः) एव शिखराणि, तेषां शीकरैः (अम्बुकणैः) आरब्धं (विहितं) (दुर्दिनं मेघजं तमः) यस्मिन् ।

L. 13. अशङ्कितावतीर्णाभिः । अशङ्कितं (शङ्कारहितं) यथा स्यात्तथावतीर्णाभिः ।

L. 15. कलः । मधुरः ।

उन्मिष......चारिभिः । उन्मिषन्ति (विकसन्ति) यान्युत्पलानि (कुवलयानि) तेषां वनं, तस्य मध्ये चरन्ति, तैः ।

L. 16. सवर्णतया रसितानुमेयैः । So closely resembling (the plants) in colour that they could be distinguished only by their voice.

कादम्बकदम्बकैः । कादम्बाः (कलहंसाः a kind of geese), तेषां कदम्बकानि (समूहानि), तैः ।

L. 17. पुलिन्दराजसुन्दर्यः । भिल्लस्वामिनां स्त्रियः ।

L. 18. उपान्त...पुलिनम् । उपान्ते (समीपे) जाताः याः केतक्यः (मालत्यः), तासां रजः, तस्य पटलं (समूहः), तेन बद्धं (नद्धं) कूलं (जलयुक्तं) पुलिनं (तटं) च यस्मिन् ।

आसन्नाः । निकटवर्तिनः ।

L. 19. कषाय...जलम् । कषायं (तुवरं, astringent, or dark-red) पाटलं (pale-red, pink) च तटजलं यस्मिन् ।

उपतटम् । तटस्य समीपम् ।

विटपिनः । विटपाः (शाखाः) अस्य सन्तीति विटपिन् (वृक्षः) ।

अविरला । निबिडा । dense.

तमालवीथिका । तमालानां ( कालस्कन्धानां ) ।

L. 20. वीथिका ( पंक्तिः ) ।

निर्वासितः । स्थानाद्भ्रंशितः ।

L. 21. अवलुप्त...लघुलताभिः । अवलुप्तानि (दूरीकृतानि) यानि फलानि, तैः लघुता यासु ताभिः ।

उद्वासिनाम् । तत्रस्थितिजुषाम् ।

L. 22. उत्पत...किसलयाभिः । उत्पतन्तः (flying) ये जलचराः पतङ्गाः ( पक्षिणः ) तेषां पक्षपुटानि, तेभ्यो विगलिताः ( स्रस्ताः ) जलबिन्दवः, तेषां सेकेन ( सिञ्चनेन ) सुकुमाराणि किसलयानि यासु ताभिः ।

L. 23. मण्डपाः । आच्छादितप्रदेशाः ।

तले । अधः प्रदेशे ।

L. 24. वनदेवताभिः । by the nymphs of the forest.

श्वासवासिताभिरिव । as if perfumed with their breath.

L. 25. वनराजिभिः । काननश्रेणिभिः ।

उपरुद्धम् । आबद्धम् ।

अपरसागराशङ्किभिः । अपरः (भिन्नः) यः सागरः तदाशङ्किभिः ( तद्भ्रान्तिकारिभिः ।

आदातुम् । ग्रहीतुम् ।

P. 21, L. 1. अगाधम् । अलब्धतलं । of immeasurable depth.

अनन्तम् । अपरिमितपारम् ।

L. 2. विकच...पक्षपुटानि । विकचानि कुवलयानि ( नीलाम्बुजानि ), तेषां प्रभा, तद्वत् श्यामायमानानि ( श्यामवदाचरमाणानि ) पक्षपुटानि येषां तानि ।

मूर्ति...ग्रस्तानि । मूर्तिमान्स्फुरद्वपो यो रामस्य शापः तेन ग्रस्तानि ( गृहीतानि ) ।

L. 3. मध्यचारिणा । वनान्तर्भ्रमणकारिणा ।

चक्रः । चक्रवाकः । the ruddy goose.

L. 4. राघव...खण्डस्य । राघवस्य शराः, तेषां प्रहारः, तेन जर्जरिताः ( विसंस्थुलाः, shattered, torn to pieces ) जीर्णाः (old) तालतरवः ( तालवृक्षाः ), तेषां खण्डं (वनं), तस्य ।

L. 5. दिग्गज...कारिणा । दिशायां गजाः, तेषां करदण्डाः ( शुण्डादण्डाः )ताननुकुर्वतीत्येवंशीलस्तेन ।

जरदजगरेण । by an old serpent. अजगर is a very huge serpent said to swallow goats (अज) ।

L. 6. तुङ्गः । उच्चः ।

L. 7. वेल्लितैः । कम्पितैः ।

अहिनिर्मोकः । the slough of a serpent.

दिक्चक्रवालपरिमाणम् । दिशां चक्रवालं (मण्डलं), तस्य परिमाणं (आयामः) ।

L. 8. भुवन...विप्रकीर्णेन । भुवनानां अन्तरालं ( मध्यभागः ), तत्र विप्रकीर्णेन (इतस्ततः पर्यस्तेन ) ।

संचयेन । समूहेन ।

प्रसारितम् । ऊर्ध्वीकृतम् ।

L. 9. उडुपतिशकलशेखरम् । उडूनां (नक्षत्राणां ) पतिः ( चन्द्रः ), तस्य शकलं (खण्डं ) शेखरे यस्य तं चन्द्रशेखरम् ।

विडम्बयितुम् । to imitate or mock.

L. 10. गगनस्कन्धलग्नः । Some editions read पवन or वायु instead of गगन । Siddhachandra adopts the reading वायुस्कन्धलग्नः and explains it as वायुः स्कन्धे लग्नः यस्य ।

L. 11. शिरा । any tubular vessel of the body such as a nerve, vein, astery etc.

प्रततिभिः । लताभिः ।

जरातिलकबिन्दुभिः । Siddhachandra explains it as जरायाः ( विस्रसायाः, of old age) ये तिलकबिन्दवस्तैरिव । अतिवार्धक्ये शरीरे कृष्णबिन्दवो जायन्त इति प्रसिद्धिः ।

L. 12. आचिता । व्याप्ता ।

इतस्ततः । समन्तात् ।

L. 13. पत्ररथैः । पक्षिभिः ।

निलीयमानैः । गुप्ततया तिष्ठद्भिः । this qualifies पत्ररथैः ।

अम्बुभरालसैः । जलभारेण मन्दगामिभिः ।

आर्द्रीकृतपल्लवैः । आर्द्रीकृताः पल्लवाः यैः तैः ।

L. 15. समीप···शाखः । The topmost branch of which was whitened by the clumps of cotton (upon it) " which made one wonder if it might be foam from the mouths of the horses of the sun." There were no foams on the branch.

It was only the cotton on it which was so white that it could be mistaken for the foams of the sun's horses.

L. 16. सूक्ष्मम् । ओष्ठप्रान्तः ।

परिस्रुतैः । पतितैः ।

L. 18. निलीनाः । लग्नाः ।

कल्पस्थायिना । कल्पान्तं तिष्ठता ।

L. 19. कोटरः । निष्कुहः । the hollow of a tree.

निविष्टैः । प्रविष्टैः ।

सजीव इव । as if full of life. This is because of the bees being busy in it.

शकुनिपक्षपातः (*a*) शकुनीनां ( पक्षिणां ) पक्षाणां ( छदां ) पातः यस्मिन् (*b*) शकुनौ ( तन्नामकदुर्योधनमातुलौ पक्षपातः ) यस्य ।

L. 20. नलिननाभः । another name of Krishna.

वनमालोपगूढः । (*a*) वनमालया ( वनश्रेण्या, by a line of woods ) उपगूढः ( आच्छादितः ), ( *b* ) वनमालः ( भूषणविशेषः ), तेन उपगूढः ( अलंकृतः ) ।

L. 21. नभसि । (*a*) आकाशे (*b*) श्रावणमासे । Siddhachandra however explains the clause as नभसि ( आकाशे ) दर्शिता उन्नतिर्येन स तथा । उभयोः साम्यत्वादभङ्गश्लेषः ।

L. 23. वनस्पतीनाम् । वृक्षाणाम् ।

शाखाबाहुभिः । शाखा एव बाहवः, तैः ।

उपगृह्य । आलिङ्ग्य ।

L. 24. शाल्मलीवृक्षः । a silk cotton tree.

L. 26. वल्कलानि । Siddhachandra reads as वल्कलविवरेषु and explains it as वल्कानिचोचानि । ( barks. )

अवकाशः । अन्तर्विस्तारः ।

विश्रब्ध...सहस्राणि । विश्रब्धं ( निश्शङ्कं ) विरचितानि ( निर्मितानि ) कुलायानां (of nests) सहस्राणि ;यैस्तानि ।

दूरारोहतया । दुःखेन आरोहः दुरारोहः, तस्य भावः दुरारोहता, तया ।

P. 22, L. 2. परिणाम...संहतिः । परिणामेन ( वार्धक्येन ) विरलानि ( तुच्छानि ) दलानि ( पत्राणि ), तेषां संहतिः यस्मिन् ।

L. 4. अतिवाह्य । अतिक्रम्य ।

L. 5. मदकल...स्रोतसम् । मदेन कलः (मनोज्ञः), हलधरः (बलरामः), तस्य हलः, तस्य मुखं ( अग्रप्रदेशं ), तेन उत्क्षेपः ( आकर्षणं, tossing up ), तेन विकीर्णानि ( पर्यस्तानि ) बहूनि स्रोतांसि यस्याः ।

L. 6. कलिन्दकन्या । the river Yamuna.

सुरगज···शङ्काम् । सुराणां गजः, तेन उन्मीलिता (उत्पाटिता ) विगलन्ती ( अधः पतन्ती ) या आकाशगंगा, तस्याः कमलिनी ( नलिनी ), तस्याः शङ्काम् । (भ्रान्तिम् ) ।

L. 8. सञ्चारिणीम् । भ्रमणशीलाम् ।

मरकतम् । emerald.

L. 9. विडम्बयन्तः । तिरस्कुर्वन्तः ।

शैवलपल्लवावलिम् । शैवलस्य ( शेवालस्य, the green moss-like substance growing on the surface of water) पल्लवावली ( किसलयश्रेणी ), ताम् ।

L. 10. गगनवितततैः । गगने विततैः ( विस्तृतैः ). Some editions read आवततैः instead of विततैः ।

दिनकर...मुखानि । दिनकरः (सूर्यः ), तस्य खराः ( तीक्ष्णाः ) ये कराः ( किरणाः ), तेषां निकरः (समूहः ), तेन परिखेदितानि ( संक्रामितानि ) आशामुखानि ( दिग्वदनानि ) ।

L. 11. वियति । आकाशे ।

विसारिणीम् । विस्तारिणीम् ।

L. 12. सेन्द्रायुथम् । इन्द्रायुधेन ( शक्रधनुषा ) सह वर्तमानम् ।

L. 14. कमममञ्जरीविकारान् । It is a misprint for कलममञ्जरीविकारान् । कलमः ( कलामकः, a kind of rice) तस्य मञ्जर्यः ( वल्लर्यः, stalks), तासां विकाराः ( परिपाकविशेषेण परिणताः कणाः ), तान् ।

प्रहत···पाटलेन । प्रहतः ( व्यापादितः, killed ) यो हरिणः, तस्य रुधिरं, तेन अनुरक्ता ( रक्तीकृता ) या शार्दूलस्य ( सिंहस्य ) नखकोटिः ( नखाग्रं ), तद्वत्पाटलं श्वेतरक्तं, pale-red), तेन ।

L. 15. अधरीकृतसर्वस्नेहेन । अधरीकृतः ( न्यूनत्वमापादितः ) सर्ववस्तुसम्बन्धी स्नेहः येन स तथा तेन ।

L. 16. क्षपाः । रात्रीः ।

L. 17. क्षपयन्तिस्म । used to pass.

L. 18. पश्चिम। here means 'last' (in time) *i. e.* old.

L. 21. अभिमत। beloved.

L. 22. पटुप्रसरम्। पटुः (स्पष्टः) प्रसरः (विस्तारः) यस्य तम्।

L. 23. अल्पावशिष्ट...जर्जराम्। अल्पानि (न्यूनानि) अवशिष्टानि (remaining) जीर्णानि (पुरातनानि) पिच्छानि (बर्हाणि), तेषां जालं (पुञ्जं), तेन जर्जरां (विशीर्णाम्)।

L. 24. अवस्रस्तांसदेशशिथिलाम्। अवस्रस्तः (गलितः) अंसदेशः (the protuberance between the two shoulders as the hump of a bull) यस्याः तां, अत एव शिथिलां (अदृढावयवसंयोगाम्)।

संस्कारः। शक्तिविशेषः।

L. 25. उपारूढः। प्राप्तः।

विधुन्वन्। विसृजन्।

अकठोर......पिञ्जरेण। अकठोरं शेफलिकाकुसुमं (निर्गुण्डीपुष्पं), तस्य नालं (a hollow stalk), तद्वत् पिञ्जरेण। (reddish yellow).

L. 26. कलम......लेखेन। कलमस्य मञ्जरी, तस्य दलनं (विदारणं), तेन मसृणिता (सञ्जातचिक्कणा) अत एव क्षीणा (घृष्टा) उपान्तलेखा (प्रान्तसमीवर्तिनी राजिः) यस्य तेन।

P. 23, L. 2. शालिवल्लरीभ्यः। from stalks of rice.

L. 4. आत्मना। The word is here used reflexively. Siddhachandra explains it as equal to आत्मने, for, he says "द्यप्रत्ययानुशासनवशात् चतुर्थ्यर्थे तृतीया।"

L. 5. गगन......सम्पुटे। गगनतलमेव कमलिनी, तस्याः मधु (रसः), तेन रक्तं पक्षसम्पुटं यस्य तस्मिन्।

L. 7. रङ्कुः। a kind of deer.

L. 8. हरिसटाः। सिंहस्कन्धकेसराः।

लाक्षिक। जतुविकारः। relating to lac.

आयामिनीभिः। विस्तारवतीभिः।

L. 9. अशिशिरकिरणदीधितिभिः। अशिशिराः (उष्णाः) किरणाः यस्य तस्य (सूर्यस्य) दीधितिभिः।

पद्मराग......सम्मार्जनीभिः। Siddhachandra omits रत्न and explains the compound as पद्मरागाः (लोहितकमणयः, rubies), तेषां शलाकाः, (ईषिकाः, thin bars or pieces), तासां सम्मार्जनीभिः (बहुकरीभिः), brooms or brushes).

L. 10. समुत्सार्यमाणे । दूरीक्रियमाणे ।

गगन......प्रकरे । गगनमेव कुट्टिमं, तत्र यः कुसुमानां प्रकरः (समूहः), तस्मिन् ।

L. 12. तट......विप्रकीर्णम् । तटगतानि (तटस्थानि) विघटितानि (स्फुटितानि) शुक्तिसम्पुटानि (अब्धिमण्डूकीपुटानि, pearl-oyster shells), तेभ्यो विप्रकीर्णम् (पर्यस्तं, spread about, scattered.)

उडुगणम् । नक्षत्रसमूहम् ।

L. 13. तुषार......वर्षिणि । तुषारस्य (तुहिनस्य, snow, ice, dew or frost) बिन्दवः, तेषां वर्षः यस्मिंस्तस्मिन् ।

L. 14. विजृम्भमाणकेसरिणि । विजृम्भमाणाः (जृम्भायुक्ताः, yawning) केसरिणः (सिंहाः) यस्मिंस्तस्मिन् ।

L. 15. क्षपा......केसरम् । क्षपा (रात्रिः), तत्सम्बन्धि जलेन (तुषारेण) जडानि (स्तम्भितानि) केसराणि (किंजल्कानि, filaments) यस्य ।

L. 16. पल्लवाञ्जलिभिः । पल्लवा एव अञ्जलयः, तैः ।

L. 17. रासभ......धूसरासु । रासभस्य रोमाणीव धूसराः (धूम्रवर्णाः, grey) तासु ।

पारावतमालायमानासु । पारवतानां (of pigeons) मालावदाचारमाणासु ।

L. 18. धर्मपताकासु । धर्मे (यज्ञादौ) पताकाः, तासु ।

समुन्मिषन्तीषु । समुत्सर्पन्तीषु ।

L. 19. अवश्यायशीकरिणि । अवश्यायः (हिमं) तस्य शीकराः (अम्बुकणाः) यस्मिंस्तस्मिन् ।

लुलितकमलवने । लुलितं (कम्पितं) कमलानां वनं (खण्डं) येन तस्मिन् ।

L. 20. कणिका । a drop, particle.

रोमन्थः । चर्वितचर्वणम् । chewing the cud.

चलित......व्यसनिनि । चलिताः (कम्पिताः) पल्लवाः यसां ताः लताः, तासां लास्यं (नृत्यं), तस्य उपदेशः (शिक्षणं), तस्य व्यसनं विद्यते यस्य तस्मिन् ।

L. 21. विघटमान......वर्षिणि । विघटमानानि (विकाशं प्राप्यमाणानि) कमलखण्डानि (नलिनवनानि), तेषां मधु (रसः), तस्य,शीकराः (वाताक्षिप्रकणाः, तेषां आसारः (धारासम्पातः, वेगवान् वर्षः) विद्यते यस्मिंस्तस्मिन् ।

L. 22. कुसुम......जाले । कुसुमानां आमोदः (परिमलः), तेन तर्पितं (प्रीणितं) अलिजालं (भ्रमरसमूहः) येन तस्मिन् ।

निशा......जडिम्नि । निशायाः अवसाने (अन्ते अर्थात्प्रातःकाले) जाता जडिमा (जडत्वं) यस्मिंस्तस्मिन् ।

L. 23. मातरिश्वनि । वातौ ।

मङ्गलपाठकाः । bards or professional panegyrists. The reference is to the ancient custom of bards waking kings and other great men in the mornings by singing some panegyrics.

इभगण्डडिण्डिमानाम् । इभगण्डाः ( हस्तिकरटयः ) एव डिण्डिमाः (पटहाः) येषां तेषां ।

L. 24. घनघटमान......मालम् । घनं ( निबिडं ) घटमानानि ( सङ्कोचं प्राप्यमाणानि) दलानि (पत्राणि) तेषां पुटानि (कोशानि), तेषु निबद्धा (अवरुद्धा) पक्षसंहतिः ( पक्षसमूहः ) येषां तेषाम् । This qualifies मधुलिहाम् । On this Prof. Peterson writes, "The bees are indignant that they are prevented from celebrating the morning on the cheeks of the elephants that serve them for drums, by being caught in the closing petals of the night lotus."

L. 25. प्रभात......आहतम् । प्रभातस्य शिशिरः ( शीतलः ) मारुतः, तेन आहतः (पीडितः) ।

. L. 26. जतुरसः । लाक्षारसः ।

पक्ष्ममाला । नेत्ररोमपङ्क्तिः ।

सशेष......तारम् । सशेषोद्धरिता या निद्रा तया जिह्मा (कुटिला, oblique) तारा (कनीनिका, pupil ) यस्य तत् ।

P. 24, L. 1. ऊषर......राजिषु । ऊषरा ( तृणरहिता ) शय्या (शयनस्थलं ), तया धूसरा (धूम्रवर्णा) क्रोडरोमराजिः ( हृदयलोमावलिः ) येषां तेषु ।

L. 2. विजृम्भमाणे । प्रसृते । The सप्तमी is what is known as सतिसप्तमी । The subject of the verb in this word is कोलाहल ।

L. 3. समुल्लसति । प्रसरति । This too is an instance of सति सप्तमी । The subject of the verb in this word is तालशब्द ।

नर्तित......मण्डले । नर्तितानि शिखण्डिनां ( मयूराणां ) मण्डलानि येन तस्मिन् ।

वनगज......शब्दे । वनगजानां कर्णा एव तालाः ( वाद्यविशेषाः ), तेषां शब्दः, तस्मिन् ।

L. 4. अवतरतः । lit. descending. But Siddhachandra explains it as अधिरोहतः (ascending).

दिवसकरवारणस्य । दिवसकरः (सूर्यः) एव वारणः (गजः), तस्य ।

L. 5. अवचूलचामरकलाप इव । अवनता चूडा (अग्रं) यस्य सः अवचूडः otherwise written as अवचूलः । an ornament (like a Chowri) hanging from the top of a banner. Siddhachandra takes अवचूलः as an adjective and explains the compound as अवचूलः अधोमुखचूर्णकः यश्चामरकलापस्तस्मिन्निवोपक्ष्यमाणे ।

मंजिष्ठा । the Indian madder. Its colour is bright red.

L. 6. पम्पा···सञ्चारिणि । This and the following adjectives apply to Sugreeva as well as the बालातप ।

L. 7. अध्यासितगिरिशिखरे । अध्यासितानि (आश्रितानि) गिरिशिखराणि (पर्वतशृंगाणि) येन तस्मिन् ।

दिवसकरजन्मनि । दिवसकरः (सूर्यः), तस्मात् जन्म यस्य तस्मिन् ।

हृततारे । (*a*) blotting out the stars (*b*) taking away Tara.

कपीश्वरे । refers to the monkey-lord Sugreeva.

L. 8. अभिपतति । व्याप्नुवति ।

दिवसाष्टमभागभाजि । दिवसस्य अष्टमः भागः, तं भजति इति दिवसाष्टमभाग-भाक्, तस्मिन् ।

L. 9. स्पष्टभासि । स्पष्टा भाः (कान्तिः) यस्य तस्मिन् ।

भास्वति । सूर्ये ।

भूते । जाते ।

L. 10. कुलाय······सनाथे । Siddhachandra explains it as कुलायाः (नीडानि, nests) तेषु निलीनाः (सुप्ताः) निभृतं (अत्यन्तं) शुकशावकाः कीरशिशवः, तैः सनाथेऽपि संयुक्तेऽपि But see note on p. 19, l. 11 above for the meaning of निभृत ।

L. 12. असञ्जात······पक्षपुटे । असञ्जातं (अनुत्पन्नं) बलं तेन समु-न्मिद्यमानं (विलीयमानं) पक्षपुटं यस्य तस्मिन् ।

L. 14. शब्दसन्ततः । शब्देन सम्यक् ततः (विस्तीर्णः, spread). सन्ततः, पीवरः, मांसलः, घर्घरः, उपबृंहितः, and बहलः are all used to express the same idea, *viz*. that the noise was made louder.

प्रचलित······मांसलः । प्रचलिताः लताः, तासु आकुलिताः (व्याकुलिताः), मत्ताः अलयः (भ्रमराः), तेषां कुलानि, तेषां क्वणितेन (शब्देन) मांसलः (पुष्टः) ।

L. 15. उद्घोणाः । उच्चनासाः ।

घर्घरः । कठोरः ।

L. 16. उपबृंहितः । वृद्धिं प्राप्तः ।

L. 17. बहुलः । प्रभूतः ।

L. 18. वेपथुः । कम्पः ।

अर्भकतया । शैशवात् ।

जर्जरित । Siddhachandra translates it as प्रतिरुद्ध ।

L. 19. भयविह्वलः । overcome with fear.

प्रतीकारबुद्ध्या । with a view to obviate or prevent (any danger). Prof. Peterson renders it as "In the hope of there finding shelter." Siddhachandra explains it as भयनिवृत्त्युपायधिया ।

L. 22. क्रोडकुल……आमोदः । क्रोडकुलैः (अरण्यशूकरसमुदायैः, by groups of wild hogs) दृश्यमानाः ( भक्ष्यमाणाः ) भद्रमुस्ताः (a kind of grass of which hogs are very fond), तासां रसः, तस्य आमोदः (परिमलः) ।

L. 23. सल्लकी is the name of a tree of which elephants are very fond. Siddhachandra explains it as गजप्रिया ।

L. 24. कोटिकुलिशं । कोटिः (अग्रं) तदेव कुलिशं ( वज्रम् ) । this is because both are so hard.

L. 26. विरुतम् । कूजितम् ।

कपिञ्जलाः । गौरतित्तिराः । a variety of partridges.

कलम् । मधुरम् ।

कुरराः । मत्स्यनाशनाः । ospreys.

P. 25, L. 1. रसितम् । आक्रन्दितम् ।

पङ्कः । कर्दमः ।

L. 2. पद्धतिः । मार्गः ।

कवलः । गुडः । mouthful.

रोमन्थः । चर्वितचर्वणम् । chewing the cud.

L. 3. गन्धगजः । lit. a scent elephant. It is an elephant of the best kind and is thus described :–यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः । स वै गन्धगजो नाम नृपतेर्विजयावहः । Siddhachandra however explains उन्मदगन्धगजा as सुरभिमदयुक्ताः इत्यर्थः as if any elephant with ichor could be called a गन्धगज ।

आलीन । आसक्त ।

मुखराः । वाचालाः । buzzing.

L. 4. रुरुपदवी । रुरूणां (मृगविशेषाणां) पदवी (मार्गः) ।
द्विरदः । द्वौ रदौ (दन्तौ) यस्य सः । हस्ती ।

L. 5. खड्गिन् । वाध्रीणसः । rhinoceros.
नख......पत्रलेखः । नखकोटिभिः (नखाग्रैः) विकटा ( विपुला ) विलिखिता (निर्भिन्ना) पत्रलेखा (अर्पणपङ्क्तिः) यस्मिन् ।

L. 6. करि......दन्तुरः । करिणां मौक्तिकानि, तेषां दलानि (खण्डानि) तैः दन्तुरः (दन्त+उरच्), स्थपुटः, jagged, serrated, notched.)

L. 7. भूमिरियम् । etc., Siddhachandra construes इयमटवीवेणिकानुकारिणी पक्षचरस्य यूथपतेर्मदजलमलिना as one clause and सञ्चारवीथीचमरीपङ्क्तिरियमनुगम्यताम् as another. Prof. Peterson says, " This seems wrong. It is the track (सञ्चारवीथी) of the elephant that is like a long black braided lock of the forest personified, being as it is black with the juice flowing from the beast's temples : and चमरीपङ्क्तिरियमनुगम्यताम् is a clause by itself." पक्षचरस्य । of an elephant strayed from the herd. Siddhachandra explains it as समुदायचारिणः । But, as Prof. Peterson points out, the explanation is unsatisfactory unless it is a copyist's mistake for असमुदायचारिणः ।

L. 9. करीषः । dry dung.
पांसुला । दूषिता ।

L. 11. अवहितैः । सावधानैः ।

L. 13. कोलाहलम् । कलकलम् । an uproar, a loud and confused noise.

L. 14. अनुलेपन......धीरेण । अनुलेपनं (द्रवद्रव्यं) तेन आर्द्रः मृदङ्गः (मुरजः, a kind of drum or tabor), तस्य ध्वनिः ।
गिरि......गम्भीरेण । गिरिविवरेषु विजृम्भितः ( प्रसृतः, filled ) यः प्रतिनादः (प्रतिच्छन्दः echoe), तेन गम्भीरेण ( मन्द्रेण, deep ).

L. 16. करास्फोटः । शुण्डाघातः ।
जल......कारिणा । जलधरस्य (मेघस्य) रसितं (गर्जितं), तदनुकारिणा ।

L. 17. सरभस......अवयवानाम् । सरभसं ( वेगवत्तरं ) सारमेयैः (श्वभिः) विलुप्यमानाः (दूरीक्रियमाणाः) अवयवाः येषां तेषां ।

L. 18. आलोल......तारकाणाम् । आलोलाः (चञ्चलाः) अतएव तरलाः (स्फुरिताः) तारकाः (कनीनिकाः ) येषां तेषाम् ।

एणकानाम् । हरिणानाम् ।

L. 20. उत्कर्णपल्लवाः । उत् (ऊर्ध्वं) कर्णपल्लवाः यासां ताः ।

L. 21. चीत्कारः । This is an onomatopœtic word meaning the cry of an elephant or such other animal.

L. 22. खड्गिधेनुः । गण्डकस्त्री । a female rhinoceros.

त्रास......अन्वेषिणीनाम् । त्रासेन ( भयेन ) परिभ्रष्टाः ( नष्टाः ) पोतकाः (शिशवः स्तनन्धयाः) तदन्वेषिणीनां ( तद्विलोकनपरानाम् ) ।

उन्मुक्तकण्ठम् । bitterly.

L. 23. आरसन्तीनाम् । आरटन्तीनां । roaring.

आकुलकुलचारिणाम् । आकुलाकुलं (very much agitated) यथास्यात्तथा चारिणाम् ।

L. 24. पत्ररथानाम् । पक्षिणाम् ।

रूपानुसारप्रधावितानां च मृगयूनाम् । Siddhachandra reads मृगयूथानां for मृगयूनां and explains it as रूपं ( शक्तिः ) तदनुसारेण प्रधावितानां (प्रचलितानां) मृगाः (हरिणाः) तेषां यूथानि (वृन्दानि), तेषाम् । Balakrishna however adopts the reading of our text taking रूप to mean 'beasts' and मृगयूनां to mean 'लुब्धकानाम्' । Thus taken, the clause would mean 'of hunters running after beasts.'

L. 26. मदकल......कलेन । the first कल is an adjective meaning 'sweet' or 'pleasing' and the second कल is a masculine noun meaning 'a sweet and indistinct tone.'

P. 26, L. 2. पवन......धाराणाम् । पवनस्य आहत्या ( आहननेन ) क्वणिताः (शब्दिताः) धाराः येषां तेषाम् ।

L. 3. वनान्तरव्यापिना । अरण्यमध्यप्रसरणशीलेन ।

L. 4. निवृष्ट......कारिणि । निवृष्टाः (कृतवर्षाः) मूकाः (स्तनितशून्याः) ये जलधराः, तेषां वृन्दं, तदनुकर्तुं शीलं यस्य तस्मिन् ।

L. 7. शिरोधराम् । ग्रीवाम् ।

L. 8. समुपजातदिदृक्षः । समुपजाता दिदृक्षा (द्रष्टुमिच्छा) यस्य सः ।

L. 9. प्राहिणवम् । sent forth. The root is हि conjugated as हिनोति etc.

L. 10. आपतत् । Other readings are आपतन्तं च and आपतितम् । अर्जुन here refers to सहस्रार्जुन ।

विप्रकीर्णम् । इतस्ततः पर्यस्तम् ।

L. 11. कालरात्रिः । तमस्विनी । a dark night.

L. 12. अञ्जनशिला । a kind of black stone.

सम्भारः । व्रातः । multitude.

विघूर्णितम् । मूर्च्छितम् । rolled.

L. 15. सार्थः । समूहः ।

खरदूषणः । खरश्च दूषणश्च । But Siddhachandra takes it as one name and explains it as खरदूषणस्य (पाताललङ्काधिपतेः) ।

L. 16. बलनिवहः । सैन्यसमूहः ।

तदपध्यानात् । तस्मिन् (रामे) अपध्यानं ( दुश्चिन्तनं, तस्मात् ) ।

L. 17. अवगाहप्रस्थितम् । अवगाहार्थं (मज्जनार्थं) प्रस्थितम् । Another reading is अवगाह्योत्थितप्रस्थितम् ।

L. 18. अचल......विशीर्णम् । अचलः ( पर्वतः ) तस्य शिखरं, तत्र स्थितः केसरी (सिंहः), तस्य करौ (हस्तौ), ताभ्यां आकृष्टिः ( आकर्षणं ) तस्मात् पतनं (भ्रंशः), तेन विशीर्णं (विशरारुतां प्राप्तं, shattered to pieces).

L. 19. अखिलरूपविनाशाय । अखिलानां रूपानां (पशूनां) विनाशाय । Siddhachandra does not seem to know that रूप also means a beast and explains the compound as अखिलानां ( समप्राणां ) यद्रूपं तस्य विनाशाय ।

L. 20. धूमकेतुजालम् । केतुसमूहम् । comets, meteors.

उत्पातवेतालव्रातम् । उत्पातः अजन्यं, ( portentous phenomenon ) वेतालव्रातम् (देवविशेषसमूहम्) ।

L. 21. प्रथमे वयसि वर्तमानम् । young. Siddhachandra has the following note on this :—अत्र प्राथम्यमापेक्षिकम् । तेन वार्धक्यापेक्षया प्रथमं वयः, तत्र वर्तमानम् ।

L. 22. अतिकर्कशत्वात् । अतिकठिनत्वात् ।

आयसमिव । आयसमयमिव (लोहमयमिव) ।

एकलव्यम् । Siddhachandra says, "एकलव्यः द्रोणाचार्यशिष्यः शबरः ।

जन्मान्तरागतम् । Siddhachandra adopts the reading जन्मान्तरगतं and explains it as एकस्माज्जन्मनः अन्यज्जन्मान्तरं, तत्र गतं प्राप्तम् ।

उत्तिष्ठमानम् । उत्पद्यमानम् ।

L. 25. पूरितारण्यम् । पूरितं अरण्यं येन तम् । Other readings are पूरितमरण्यम् and पूरयन्तमरण्यम् ।

आकुटिलाग्रेण । आ (ईषत्) कुटिलं (curled) अग्रं यस्य तेन ।

कुन्तलभारेण । केशकलापेन ।

L. 26. तुङ्गा । उच्चा ।

P. 27, L. 1. घोरा । रौद्रा ।

घोणा । नासिका ।

L. 3. सप्तच्छद......वाहिना । सप्तच्छदानां अयुक्छदानां वृक्षविशेषाणां परिमलं वहतीत्येवंशीलः, तेन ।

कृष्णागुरु । कालागुरुः । the fragrant aloe wood.

L. 4. अङ्गरागः । विलेपनम् । application of perfumed unguents to the body.

अन्धेन । विह्वलेन । delirious.

L. 5. मायूरातपत्रानुकारिणा । मायूरं (मयूरसम्बन्धि, made of the feathers of a peacock) आतपात्त्रायत इत्यातपत्रं (छत्रं), तदनुकारिणा ।

L. 6. आलोलकर्णपल्लवव्याजेन । Another reading is आलोलपल्लवव्याजेन । Siddhachandra adopts this reading. व्याजेन । छलेन । under the pretext of.

भयप्रयुक्तसेवया । भयेन प्रयुक्ता (आरब्धा) सेवा यया तया ।

L. 7. हरिणकुल......सन्ध्यायमानया । हरिणकुलानां क्षयरात्रिः (विनाशरात्रिः, night of destruction), तस्याः सन्ध्यायमानया (सायङ्कालवदाचरितया) ।

L. 8. रञ्जयन्तम् । शोभयन्तम् ।

आशाविभागान् । दिग्विभागान् । Another reading is आशाविभागानाम् । Siddhachandra adopts this latter reading and says that the षष्ठी is कर्मणि षष्ठी ।

L. 9. आजानुलम्बेन । आजानुपर्यन्तं यावल्लम्बेन ( आयतेन ) । Some editions read जानुलम्बेन and others जानुलम्बिना ।

चण्डिका......शिखरेण । चण्डिका (काली), तस्याः रुधिरबलिप्रदानाय असकृत् (निरन्तरं) निशितानि (तेजितानि) शस्त्राणि, तेषामुल्लेखः ( घर्षणं ), तेन विषमितं (खपुटं, made rough or uneven), शिखरं (भुजाग्रं) यस्य तेन ।

L. 10. अन्तरान्तर etc. Siddhachandra adopts the reading अन्तरालम । अन्तरा (मध्ये) ।

श्याना । शुष्का । congealed.

कणिकाचितेन । कणिकाभिः (क्षुद्ररजोभिः, by small particles,) आचितेन (व्याप्तेन) ।

L. 13. वक्षःस्थलेन । Siddhachandra adopts the reading चक्षुःस्थलेन ।

श्रमाभ्यासात् । on account of constant exercise.

L. 14. उल्लिखितोदरम् । उल्लिखितं (चिह्नितं) उदरं यस्य तम् ।

L. 15. कौशेयपरिधानम् । कौशेयं ( silken cloth ) तदेव परिधानं (अधोंशुकम्) ।

बद्ध……कराले । बद्धा त्रिपताका ( त्रिवलिः ) यया, एवंभूता भ्रुकुटिः, तया कराले ( भीषणे) ।

L. 16. परिग्रहः । a favourite, a member of the same family, a husband. Siddhachandra explains मत्परिग्रहः as मदीयः (my own).

L. 17. उपजातपरिचयैः and अनुगच्छद्भिः qualify श्वभिः in line 23.

L. 18. श्रमवशात्……क्षरन्तीभिः and आवेद्यमानखेदैः qualify जिह्वाभिः in line 19.

दूरविनिर्गताभिः । (मुखात्) दूरं विनिर्गताभिः ( निःसृताभिः ) ।

L. 19. विवृतमुखतया । विवृतं (विदीर्णं, open) मुखं, तस्य भावः, तया ।

स्पष्ट……दन्तांशून् । स्पष्टं दृष्टाः दन्तांशवः येषु तान् ।

L. 20. सृक्कभागान् । ओष्ठप्रान्तदेशान् । corners of the mouth.

उद्वहद्भिः । उत् (प्राबल्येन) वहद्भिः ।

वराटकाः । कपर्दकाः । *Cowries.*

L. 22. मृगवधू……दक्षैः । मृगवधूनां वैधव्यदीक्षादानं ( taking the vow of widowhood) तत्र दक्षैः ( निपुणैः ) ।

L. 23. अतिप्रमाणाभिः । प्रचण्डाभिः ।

कौलेयककुटुम्बिनीभिः । श्वानपत्नीभिः । she-hounds.

L. 24. कैश्चित् । refers to शरबवृन्दैः ।

गृहीत.. भारैः । गृहीताः । चमराणां ( गवयानां ) वालाः ( केशाः ) गजानां दन्ताश्च, तेषां भारः ( समूहः ) यैः तैः ।

L. 25. अच्छिद्र...मधुपुटैः । अच्छिद्रपर्णैः बद्धानि मधुनः पुटानि यैः तैः ।

मृगपतिभिः । सिंहैः ।

L. 26. यातुधानैः । राक्षसैः ।

P. 28, L. 1. गृहीतपिशिताहारैः । गृहीतं पिशितस्य ( माँसस्य ) भारः यैः तैः । Another reading is गृहीतपिशिताहारैः ।

प्रमथाः । पार्षदाः । a class of beings said to be attending on Siva.

कृत्तयः । hides.

L. 2. क्षपणकाः । Siddhachandra renders this as दिगम्बरैः । But the word is particularly applied to Buddhist or Jaina mendicants only.

मयूरपिच्छवाहिभिः । It appears that the *Bhillas also* wore the peacocks' feathers.

काकपक्षधरैः । (*a*) wearing sidelocks of hairs, (*b*) wearing cocks' feathers.

L. 3. कृष्ण......दन्तैः । Siddhachandra explains it as कृष्णचरितं ( विष्णुविजृम्भितं, exhibition or display of Krishna) दर्शयद्भिः ( प्रकाशयद्भिः ) इव पूर्वं समुत्खाताः ( सम्यक्प्रकारेणोत्पाटिताः ) पश्चाद्विशेषेण धृताः गजदन्ताः यैस्ते तथा तैः । कृष्णेनापि बाल्ये गजहननक्षण इत्थमेवाचरितमिति साम्यम् ।

L. 4. जलधर...अम्बरैः । (*a*) जलधरस्य छाया, तद्वन्मलिनानि अम्बराणि ( वस्त्राणि ) येषां तैः ; (*b*) जलधरछायया मलिनं अम्बरं ( आकाशं ) ये पुतैः ।

अनेकवृत्तान्तैः । अनेके वृत्तान्ताः (चरित्राणि) येषां तैः ।

L. 5. सखड्गधेनुकम् । Siddhachandra explains it as खड्गः कौक्षेयकः, sword or scimitar) धेनुका (कृपाणिका), ताभ्यां सह वर्तमानम् । पक्षे खड्गः ( वाध्रीणसः । rhinoceros), धेनुका (वशा) ताभ्यां युक्तम् । But in no dictionary is धेनुका said to mean कृपाणिका except when forming a compound with असि ।

मयूरपिच्छ...धारिणम् । मयूरपिच्छानीव चित्रं चापं, तद्धारिणम् ।

L. 6. गृहीतैकचक्रम् । (*a*) गृहीतं ( धृतं ) एकं ( अद्वितीयं ) चक्रं येन तम् (*b*) गृहीता ( स्वायत्तीकृता ) एकचक्रनामा पुरी येन तम् ।

अरुणानुजः । गरुडः ।

L. 7. उद्धत...दशनम् । (*a*) उद्धृताः (उत्पाटिताः) अनेकानां महानागानां (महागजानां) दशनाः येन तम् । (*b*) उद्धृताः (मुखान्निष्कासिताः) अनेकानां महानागानां (महासर्पाणां) दशनाः येन तम् ।

शिखण्डिन् । (*a*) peacock, (*b*) The son of Drupada who was originally a woman but contrived by practising penance to exchange her sex with a Yaksha, and who afterwards proved the means of killing Bhishma who declined to fight with a woman when Arjuna put him forward as his hero.

L. 8. सतत...मृगतृष्णाम् । (*a*) सततं (वने) आविर्भूतेषु (प्रकटीभूतेषु) मृगेषु तृष्णा (हननेच्छा) यस्य तम् । (*b*) सततं आविर्भूता प्रकटिता मृगतृष्णा (मरीचिका) यस्मिन् ।

विद्याधरः । a demi-god.

मानसवेगम् । Siddhachandra explains it as मानेन (अहंकारेण) सवेगः (सर्वदा तीव्रगतिः) । पक्षे मानसे (मानसाभिधाने सरसि) गतिः (गमनं) यस्येति विग्रहः ।

पराशरः । व्यासः ।

योजनगन्धा । (*a*) musk-deer, (*b*) Satyavati, the mother of Vyasa.

L. 9. घटोत्कचः । The son of Bhima by the female demon हिडिंबा ।

भीमरूपधारिणम् । (*a*) भीमं यद्रूपं तद्धारिणम् । (*b*) भीमस्य रूपं (आकृतिः) तद्धारिणम् being the son of Bhima.

अचलराजकन्यका । हिमाचलतनया पार्वती ।

L. 10. नीलकण्ठचन्द्रकाभरणम् । (*a*) नीलकण्ठः (मयूरः), तस्य चन्द्रकाः (मेचकाः, the eyes of the peacock's tail), तेषां आ (समन्तात्) भरणं (धारणं) यस्मिन्, तम् । (*b*) नीलकण्ठस्य (महादेवस्य) चन्द्र एव चन्द्रकः, तदेवाभरणं यस्मिन्, तम् । This is because of Mahadeva being अर्धनारीश्वर ।

महावराहः । (*a*) वनसूकरः । (*b*) वराहरूपो विष्णुः ।

L. 11. अतिरागिणम् etc. Siddhachandra explains this as अतिरागिणं (अतिरागाभिभूतमतियशोभिलुकं), तमिव । उभयोस्तुल्यतामाह— कृतेति । कुतो विहितो बहुबन्दीनां ग्रहाणां परि सामस्त्येन ग्रहो येन स तम् । पक्षे कृतो बहुबन्दिनां वैतालिकानां परिग्रहः स्वीकारो येनेति विग्रहः । 'श्लेषे स्वरो न

गण्यते' इति ह्रस्वदीर्घार्थः श्लेषः । बन्दी means (*a*) captives, prisoners and (*b*) panegyrists.

पिशिताशनः । पिशितं (मांसं) अशनं यस्य । मांसभक्षकः ।

L. 12. रक्तलुब्धकम् । (*a*) रक्ताः (अनुरक्ताः) लुब्धकाः (व्याधाः) यस्मिन्, तं । (*b*) रक्ते (रुधिरे) लुब्ध एव लुब्धकः (सस्पृहः), तम् ।

गीतकलाविन्यासम् । गीतकलायाः विन्यासः (रचना) । adjustment, disposition.

निषादानुगतम् (*a*) निषादैः (भिल्लैः) अनुगतम् । (*b*) निषादः (तन्त्रीकण्ठोद्भवः स्वरः, a musical note), तेन अनुगतम् ।

L. 13. महिष । (*a*) A demon of the name, also known as रक्ताक्षः, (*b*) buffalo.

L. 14. वयसम् । (*a*) birds (*b*) life.

कृतसारमेयसंग्रहम् । Siddhachandra explains it as कृतः (विहितः) सारस्य (घनस्य) मेयस्य (मातुं योग्यस्यान्नादेः) संग्रहः (स्वीकारः) येनैवंभूतमपि फलमूलान्येवाशनं भक्षणं यस्येति विरोधः । परिहारपक्षे कृतः सारमेयानां कुक्कुराणां संग्रहः येनैवंभूतम् ।

कृष्णमप्यसुदर्शनम् । विष्णुमपि सुदर्शनचक्रेण रहितमिति विरोधः, परिहारपक्षे तु श्यामवर्णमत एव असुदर्शनं भीमदर्शनम् ।

L. 15. दुर्गैकशरणम् । (*a*) दुर्गं (fort) एकं (अद्वितीयं) शरणं यस्य, तम् । (*b*) दुर्गा (भवानी) एकं शरणं यस्य तम् ।

क्षितिभृत्पादानुवर्तिनम् । (*a*) क्षितिभृत् (राजा), तत्पादानुवर्तिनं तत्समीपस्थायिनम् । (*b*) क्षितिभृत् (पर्वतः) तस्य पादाः (पर्यन्तपर्वताः), तदनुवर्तिनं (तत्रस्थायिनम्) ।

L. 17. महासत्त्वतया । goes with विन्ध्यस्य । Siddhachandra explains it as महत्त्वं तत्सत्त्वं च महासत्त्वं, तस्य भावस्तत्ता, तया ।

L. 18. अनभिभवनीयाकृतिम् । न अभिभवनीयः (तिरस्करणीयः) आकृतिः यस्य तम् । Some editions read अभिभवनीयाकृतिम् ।

L. 19. अभिधानं तु etc. Prof. Peterson says, "The clause is a very awkward one, which Bana either did not write, or would have corrected if he had lived to finish his book." Some editions read तस्य पश्चात् instead of पश्चात्तस्य ।

L. 20. मोहप्रायम् । मोहः ( अज्ञानं ) प्रायं ( प्रचुरं ) यत्र तादृशम् । एतेषाम् । भिल्लानामित्यर्थः ।

L. 21. उपहारः । भगवत्यै नैवेद्यदर्शनम् ।
धर्मबुद्धिः । श्रेयोधीः ।

L. 22. मधु । मद्यम् ।
श्रमः । exercise.

L. 23. कौशिकाः । उलूकाः । owls.
शकुनिज्ञानम् । पक्षिणां ( स्थूलमहत्त्वादिना ) ज्ञानम् ( विवेकबुद्धिः ) ।

L. 24. परिचिताः । विश्वासपात्राणि ।
आपानकम् । मद्यपानादिकम् ।

L. 25. दिग्धम् । निन्दितम् ।

L. 26. उत्सादकारि । उत्सादं ( नाशं ) करोति यत् तत् । Another reading is उत्साहकारि । Prof. Peterson says, "उत्साह is perhaps right in the sense of joy......It is because the deer have no sense that they delight in the song which is to be their ruin."

P. 29, L. 3. अङ्गरागः । विलेपनम् ।

L. 4. उत्खातमूलम् । उत्खातं ( उत्पाटितं ) मूलं (मध्यभागः ) यस्य एवंभूतम् ।

L. 6. अवतारितकोदण्डः । Siddhachandra explains अवतारितं as अनधिज्यं कृतम् ।

L. 7. कर...अम्भसः । करयुगलेन परिक्षोभितं ( विलोडितं ) अम्भः यस्य तस्मात् ।

L. 8. वैदूर्य । विदूरे गिरौ भवं । *Lapis Lazuli.* It is also written as वैडूर्य । The comparison is due to excessive brightness.
विलीनम् । क्षरितम् । liquified, melted.
प्रस्यन्दितम् । क्षरितम् । flown.
द्रुतम् । द्रवोपयुक्तम् । melted. This qualifies मुक्ताफलनिकरम् ।

L. 10. हिमजडम् । हिमेन ( तुहिनेन ) जडं ( स्तब्धतां प्राप्तम् ) ।
अरविन्द...कषायम् । अरविन्दस्य कोशः (bud), तस्य रजः, तेन कषायम् । fragrant.

L. 11. प्रत्यग्रोद्धृताः । प्रत्यग्रं ( तत्कालं ) उद्धृताः । just plucked.

L. 13. सैंहिकेयः । सिंहिकासुतः, राहुः ।

अदशत् । अभक्षयत् ।

L. 15. दिगन्तरम् । Siddhachandra explains it as एकस्याः दिशः सकाशादन्या दिशो दिगन्तरम् ।

L. 16. पुलिन्दवृन्दात् । शबरसमुदयात् ।

अनासादित......पिशितः । अनासादितं हरिणपिशितं (मृगमांसं ) येन सः ।

L. 17. पिशिताशनः । पिशितं अश्नातीति पिशिताशनः । The meaning usually given to this word is 'a demon' Bohtlingk gives the meaning 'wolf.' Siddhachandra, however, gives the meaning 'व्याघ्रः'

L. 18. व्यलम्बत । delayed himself.

L. 19. कपिल...भीषणया । कपिला ( पिङ्गला ) भ्रूलता, तस्याः परिवेषः ( परिधिः ) तेन भीषणया ।

L. 22. उत्क्रान्तमिव । निर्गतमिव ।

L. 23. अनेकतालतुङ्गम् । अनेके तालाः, तद्वत् तुङ्गम् । very high. The *Tala* tree is often used as a measure of height.

अभ्रंकषशाखाशिखरम् । अभ्रं ( आकाशं ) कषति ( पीडयति तुङ्गत्वात् ) इति अभ्रंकषं, अभ्रंकषं ( अभ्रंलिहं ) शाखानां शिखरं यस्य, तम् ।

L. 25. गर्भच्छविपाटलान् । Siddhachandra explains this as, प्रत्यग्रोत्पन्नस्य गर्भस्य या छविः ( कान्तिः ), तया पाटलान् ( श्वेतरक्तान् ) ।

L. 26. नलिन···कारिणः । नलिनानां संवर्तिका ( नवदलं ), तदनुकारिणः ।

P. 30, L. 1. ईषद्विकसित...मुखान् । ईषत् विकसितं दलपुटं, तेन पाटलं ( श्वेतरक्तं ) मुखं येषां तेषाम् ।

L. 2. श्रियं । शोभाम् ।

उद्वहतः । उत् ( प्राबल्येन ) वहतः ( धारयन्तः ) ।

L. 3. निवारयत इव । Siddhachandra has the following note on this:—"वयं बालकाः, अस्मासु दया कर्त्तव्या, मास्माञ्जहि", इति निवारणां कुर्वत इव ।

L. 6. अकाण्डे । नास्ति काण्डं ( अवसरः, उचितकालः ) यस्य, तस्मिन् । Suddenly, out of season, unexpectedly.

अप्रतीकार । irremediable. Qualifies उपप्लवम् ।

L. 7. विषादशून्याम् । विषादेन ( शोकेन ) शून्याम् ( निस्तेजाम् ) ।

L. 9. त्रास...शिथिलेन । त्रासेन ( भयेन ) त्रस्ताः ( त्रस्+क्त, विदीर्णाः, loose) सन्धयः ( अस्थिबन्धाः, joints), तैः शिथिलेन ( श्लथेन, loose, languid, enfeebled).

L. 10. मद्रक्षणाकुले । मम गुप्तौ संभ्रान्तः ।

किंकर्तव्यताविमूढः । किमिदानीं कर्तव्यं ( विधेयं ) इत्यस्य भावः किंकर्तव्यता, तत्र विमूढः (भ्रष्टमतिः ) ।

L. 11. क्रोडविभागेन । उत्सङ्गप्रदेशेन ।

अवष्टभ्य । आलम्बनीकृत्य ।

क्रोड...अवष्टभ्य । clasping me to his bosom.

L. 12. जीर्ण...भीषणम् । जीर्णः असितः ( कृष्णः ) भुजङ्गः, तस्य भोगः ( कायः ), तद्वत् भीषणम् ।

L. 13. विविध...करतलम् । विविधानां वनवराहाणां वसा (marrow of the flesh), तया विस्रं (smelling like raw meat) गन्धं यस्य तत्तादृशं करतलं यस्य तम् । qualifies बाहुम् ।

कोदण्ड...प्रकोष्ठम् । कोदण्डस्य ( धनुषः ) गुणाः ( प्रत्यञ्चाः, bowstring,) तेषां आकर्षणं, तेन व्रणं (sore, bruise), तेन अङ्कितः ( चिह्नितः ) प्रकोष्ठः ( कलाचिका, the fore-arm, the portion of the hand just above the wrist) यस्य तम् ।

L. 14. अन्तकः । यमः ।

L. 16. संपिण्डित । संकुचित ।

आयुषः सावशेषत्वात् । Siddhachandra expounds it as आयुषः ( जीवितव्यस्य ) अवशेषेण ( उद्धरितभागेन ) सहवर्तमानत्वात् ।

L. 17. उपरतम् । मृतम् ।

L. 18. निभृतम् । Siddhachandra again renders the word by अत्यर्थम् । Prof. Peterson, however, renders it as ' so as to be hidden.'

L. 19. अवशिष्टपुण्यतया । अवशिष्टं पुण्यं तस्य भवः, तया । The store of merit (acquired in a previous birth) not being exhausted. Some editions read आयुषोवशिष्टतया ; but this would be a mere repetition of सावशेषत्वादायुषः in line 16 above.

L. 21. येन । Siddhachandra says that it may refer either to पुण्य or to the fall on the heep of dry leaves mentioned above.

नाशीर्यन्त । न विगलितानि ।

L. 23. कालान्तरभुवः । बाल्यादन्यस्मिन्काले कालान्तरे ( प्रबुद्धवयोवस्थाविशेषे ) उत्पत्तिः यस्य तस्य । that grows in a mature age.

L. 24. अभिभूयमानः । पीड्यमानः । being overpowered.

L. 25. अवष्टम्भः । आधारः ।

ईषत्कृतावष्टम्भः resting a little upon.

P. 31, L. 1. संकर्षण...छायया । संकर्षणस्य ( बलभद्रस्य ) पटः ( वस्त्रं ), तस्य नीला छाया ( कान्तिः ) तया । other readings are, नीलछायम्, नीलदलछायया, पटछायानीलया छायया । नीलया छायया ।

L. 2. गदाधरदेहछविम् । गदाधरस्य ( विष्णोः ) देहछविम् । This is the object of the verb in उपहसतः ।

अच्छैः । निर्मलैः ।

छेदैः । खण्डैः ।

विरचितछदस्य । विरचितानि छदानि ( पत्राणि ) यस्य ।

L. 4. अतिगहनम् । very dense or impenetrable. Siddhachandra explains it as अतिशयेन गहनं अपर्याप्तावकाशम् ।

L. 8. लब्धजीविताशम् । लब्धा जीवितस्य आशा येन ।

L. 10. अनया कालकलया । by that time. कालकलया । घटिकया ।

L. 11. परिकलय्य । knowing, understanding.

L. 13. उत्प्रेक्षमाणः । उत्पश्यमानः । imagining.

L. 15. नातिस्थिरचरणसंचारस्य । Siddhachandra adopts the reading स्थिरतरचरण and explains the compound as न विद्यतेऽतिस्थिरतरश्चरणयोः क्रमयोः सञ्चारः स्थापनयोग्यता यस्य स तथा तस्य ।

मुखेन पततः । falling on my face.

L. 16. पक्षपाल्या । पक्षसंहत्या ।

क्षितितल...आतुरस्य । क्षितितले संसर्पणं ( गमनं ), तस्मात् भ्रमः ( भ्रान्तिः, embarrassment) तेन आतुरः ( पीडितः ) तस्य ।

L. 19. जीवितनिरपेक्षाः । जीविते निर्गता अपेक्षा ( स्पृहा ) यासां ।

प्रवृत्तयः । प्रवर्तनक्रियाः । active life, propensities.

L. 20. अभिमततरम् । इष्टतरम् ।

सुगृहीतनाम्नि । This is simply a respectful mode of speaking. Literally it would mean, 'one whose name is auspiciously

invoked or, one whose name it is auspicious to utter. Siddhachandra explains it as सुगृहीतं सर्वदा ग्रहणयोग्यं नाम यस्य, एवंभूते ।

L. 21. अविकलेन्द्रियः । अविकलानि (unimpaired, unmutilated) इन्द्रियाणि यस्य सः ।

L. 22. सोढ......दारुणम् । सोढः पितृमरणशोकः, तेन दारुणं यथा स्यात्तथा ।

L. 23. खलम् । mean, wicked.

P. 32, L. 1. न कश्चिन्न खलीकरोति । सर्वमेव खलीकरोतीत्यर्थः ।

L. 3. मन्ये......सलिलपानबुद्धिः । It is perhaps heartlessness that manifests itself as thirst. Prof. Peterson, however interprets it as "My mind to drink water, as I call it, is mere heartlessness. For the lake is no nearer me to-day than it ever was' *i.e.*, I know I cannot reach it". Some editions read निर्घृणतया for निर्घृणता ।

L. 7. विप्रकर्षात् । दूरात् । on account of remoteness or distance.

आशामुखविसर्पणविरलः । आशामुखेषु (दिङ्मुखेषु) विसर्पणेन (प्रसरणेन) विरलः ( न्यूनः, scanty ) खण्डः । a group or assemblage.

L. 8. कष्टा दशा । Siddhachandra interprets it as मध्यावस्था ।

L. 9. अनलधूलि । particles of fire.

L. 10 आतप......दुर्गमा । आतपस्य स्पर्शेन संतप्तं पांसोः (of dust) पटलं, तेन दुःखेन गन्तुं शक्या ।

L. 11. अवसन्नानि । खिन्नानि । languid.

अङ्गकानि । tiny limbs.

L. 12. अप्रभुरस्म्यात्मनः । I am not a master of myself, *i.e.*, I am powerless.

सीदति मे हृदयम् । my heart is broken.

L. 13. अपि नाम । some editions have this अपि in the previous sentence and read चक्षुरपि so that they begin this sentence with नाम. Siddhachandra also takes the अपि with चक्षुः । अपि नाम is used in the sense of 'Is it likely', 'may it be,' 'would that,' 'perhaps' etc.

उत्पादयेत् । कुर्यात् । may bring about.

L. 16. सनत्कुमारः । He was one of the four sons of Brahmana.

सर्व......चेताः । Siddhachandra expounds it as सर्वविद्यास्ववदातं (शुद्धं) चेतः (मनः) यस्य सः । But it looks queer to say that one's mind is pure in all the lores. What is meant is that 'his mind was refined by learning of every kind'. According to Kamandaka the Vidyas are four, viz., "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती" to which Manu adds आत्मविद्या as a fifth one. But generally the Vidyas are said to be fourteen; thus :— "षडङ्गमिश्रिता वेदाः धर्मशास्त्रं पुराणकः । मीमांसा तर्कमपि च एता विद्याश्चतुर्दश" ।

सवयोभिः । समानः वयः येषां तैः ।

L. 17. विभावसुः । सूर्यः ।

L. 18. दुर्निरीक्ष्यमूर्तिः । दुःखेनावलोकयितुं शक्या मूर्तिः यस्य सः ।

उत्कीर्णः इव । उल्लिख्य कर्पित इव । as if carved or engraved. The root is कॄ ।

L. 19. आपिशङ्गावदातया । आ (समन्तात्) पिशङ्गा (पीता) अवदाता (निर्मला), तया ।

L. 20. स्फुरन्त्या । देदीप्यमानया ।

L. 21. उपदर्शयन् । प्रकाशयन् ।

उत्तप्त......लोहिनीनाम् । उत्तप्तं लोहं (iron), तद्वल्लोहिनीनां (रक्तानाम्) ।

L. 22. स्तम्भितः । बद्धः ।

L. 23. कृतकपटबटुवेषः । ब्राह्मणकुमाररूपधारी । It is said that once the Khandaka forest was burnt by the Fire-god coming in the guise of a Brahmana. Siddhachandra follows the reading कृत-कपटपटुवेषः and explains it as "कृतः (विहितः) कपटेन पटुः (स्पष्टः) वेषो येनैवंभूतः ।"

L. 24. नूपुरः । anklet.

धर्मशासनकटकेन । Siddhachandra explains it as "धर्मो विधि-निषेधादिरूपस्तस्य शासनमाज्ञा तस्य कटकेन (वलयेन) ।

स्फाटिकेनाक्षवलयेन । with a rosary of crystals. Prof. Apte gives the following interesting explanation of अक्षमाला (the

same thing as an अक्षवलय) in his Practical Sanskrit—English Dictionary :—"अकारादिक्षकारान्तः अक्षः तत्कृता तत्प्रतिनिधिभूतानां माला"।

L. 25. सकल......उपपादितेन । Siddhachandra seems to take this as qualifying अक्षवलयेन and explains it as सकलविषयस्य (समग्रपदार्थस्य) य उपभोगः (परिभोगः) तस्मान्निवृत्तिः (उपरमः) तदर्थं (तन्निमित्तं) उपपादितेन (विहितेन) ।

L. 26. त्रिसत्येन । Siddhachandra explains it मनोवाक्कायलक्षणेन त्रिसत्येन ।

त्रिपुण्ड्रकेण । by three lines.

P. 33, L. 1. बलाकाः । cranes.

L. 2. अध्यासितम् । आश्रितम् ।

कृष्णाजिनम् । कृष्णस्य (कृष्णमृगस्य) अजति ( क्षिपति रज आदि आवरणेन ) इति अजिनं ( चर्मम् ) । the skin of a black antelope.

L. 3. नीलपाण्डुभासा । नीला च पाण्डुवी च भा (कान्तिः) यस्य तेन ।

तपस्तृष्णा......पतता । Siddhachandra explains it as "तपो मे भवत्विति तपस्तृष्णा तया निपीतेन । कीदृशेन । अन्तः शरीरान्तरे निपतता प्रवेशं कुर्वता" । Prof. Peterson translates it as "Drunk in, in very thirst of penance, and now 'exuding.'" The other readings for अन्तर्निष्पतता are (1) अन्तर्निपतता ( followed by Siddhachandra ), (2) अन्तर्नियतता, (3) अन्तरपगच्छता and (4) अन्तर्निर्यातनिष्पतता ।

L. 4. परीतमूर्तिः । परीता (व्याप्ता) मूर्तिः यस्य सः ।

निर्मांस......पञ्जरमिव । निर्मांसं ( अत एव ) विरलं पार्श्वकपञ्जरं ( पार्श्वगतास्थिसमुदायम् ) ।

L. 7. आषाढदण्डेन । by a staff of a Palasa wood.

व्यापृत । engaged in, busy with.

सव्येतरः । दक्षिणः । right.

L. 8. नीवारः । rice growing wild, *i.e.*, without cultivation.

कुश......दृष्टिना । कुशाश्च कुसुमानि च लताश्च, ताभिः आयास्यमाना (खेदं प्राप्यमाणा), अत एव लोला दृष्टिः यस्य तेन । Prof. Peterson renders it as "with eyes that wander being tempted by, etc."

L. 9. वल्कलः । (*a*) a garment made of bark, (*b*) the bark (of a tree).

L. 10. समेखलः । सह मेखलया वर्तमानः ।

मेखला । (*a*) the slope of a mountain, गिरिमध्यभागः । (*b*) the triple girdle worn by the first three castes, मौञ्जी ।

सोमः । (*a*) the moon ; (*b*) the *Soma* juice used in sacrifices.

L. 11. दिवसकरमरीचिपः । Siddhachandra explains it as (*a*) दिवसकरस्य सूर्यस्य आतपभयात् मरीचीन् पाति रक्षति ( guards itself against ) यः सः । (*b*) सूर्यविकासित्वात् सूर्यमरीचीन् पाति पिबति यः सः । Prof. Peterson remarks that " It seems better to take मरीचिप in the sense of ' drinking in the rays of the sun in both references.' "

L. 12. जटा । (*a*) a fibrous root ; (*b*) matted hair.

विकच......दशनः । विकचानि कुमुदानि, तेषां दलानि ( पर्णानि ) तेषां शकलानि, तद्वत् सिताः (शुभ्राः) दशनाः ( दन्ताः ) यस्य । In the case of the करिकलभ it is better to take it as विकचकुमुददलशकलैः सिताः दशनाः यस्य सः ।

द्रौणिः । द्रोणस्य अपत्यं पुमान् । अश्वत्थामन् ।

L. 13. कृपानुगतः । (*a*) कृपेण (by his preceptor Kripa) अनुगतः । (*b*) कृपया अनुगतः । merciful.

चित्र......उपशोभितः । (*a*) चित्रमृगस्य कृत्तिका ( चर्म ), तेन यः श्लेषः (सम्बन्धः) तेन उपशोभितः । (*b*) चित्रामृगशिराश्लेषैः नक्षत्रैः उपशोभितः ।

घर्मकालः । उष्णकालः ।

L. 14. क्षपितबहुदोषः । (*a*) क्षपिताः ( क्षयं प्रापिताः ) बहवः दोषाः (रागद्वेषादयः) येन सः । (*b*) क्षपिता बह्वी (दीर्घा) दोषा (रात्रिः) येन ।

प्रशमितरजःप्रसरः । (*a*) प्रशमितः (शान्तिं प्रापितः) रजोगुणव्यापारः येन । (*b*) प्रशमितः रजःप्रसरः (धूलिसमूहः) येन ।

L. 15. कृतोदवासः । (*a*) कृतः (विहितः) उदवासः (व्रतविशेषः) येन । (*b*) कृतः उदकेषु वासः येन । उदकस्य उदादेशः ।

नरकः । ( *a* ) दुर्गतिः ( hell ); ( *b* ) नरकासुरः ( the demon Naraka).

सन्ध्या......तारकः । (*a*) सन्ध्यासमयवत् पिङ्गला तारका ( कनीनिका ) यस्य सः । This is said to be a sign of a great man. Thus "क्षुद्रोऽपि चक्रवर्ती स्यात्पीततारकचक्षुषि ।" (*b*) सन्ध्यायां पिङ्गलाः तारकाः (नक्षत्राणि) यस्मिन् ।

L. 16. बालातपकपिलः । बालश्चासौ आतपश्च बालातपः । (a) बालातप-वत्कपिलः । (b) बालातपेन कपिलः । Siddhachandra expounds बालातपः as "बालो यः सूर्यस्तस्यातपः" in the alternative.

दृढ......अक्षचक्रः । (a) दृढं नियमितं (निबद्धं) अक्षाणां (इन्द्रियाणां) चक्रं (समूहः) येन—'who has well controlled the circle (or group) of his passions,' (b) दृढे नियमिते अक्षः (axle) च चक्रं (wheel) च अक्ष-चक्रे यस्मिन् ।

सुराजेव । like a good king.

L. 17. निगूढ......विग्रहः । Siddhachandra explains it as "निगूढं रहो यन्मन्त्रसाधनं देवताराधनं तेन क्षपितः कृशतां नीतो विग्रहः शरीरं येन सः । पक्षे निगूढोतिगुप्तो मन्त्रो रहस्यालोचनं साधनं गजाश्वादि ताभ्यां क्षपितः क्षयं नीतो विग्रहः शत्रुजनितक्लेशो येनेति विग्रहः" । Prof. Peterson renders it as " (a) with a body wasted by the secret performance of penance: (b) ' who brings to nought his enemy's plans of battle by secret counsels and his army ".

कराल......गर्तः । Siddhachandra explains this as "करालं यच्छंख-मण्डलं भालश्रवोन्तरं तत्रावर्त्तेन गर्तो यस्य सः तथा । तादृशावर्तश्च महातपस्वि-लक्षणम् । पक्षे करालानि जिह्मानि यानि शंखमण्डलानि षोडशावर्तवृन्दानि आवर्तः पयसां भ्रमः एते गर्ते अगाधप्रदेशे यस्येति विग्रहः ।"

L. 18. असकृत्......अवतारः । (a) असकृत् (अनेकवारं) दृष्टः गङ्गायाः अवतारः (घट्टः, known as घाट in Hindi) येन, (b) असकृत् दृष्टः गङ्गायाः अवतारः (प्रभवः) येन ।

पुष्करवन । (a) Pushkar, the famous place of pilgrimage near Ajmere; (b) कमलखण्डः । Siddhachandra expounds (a) as "पुष्करं (जलं), तेन सहितं यद्वनम् ।"

L. 19. वनचरोपि etc. The apparent incongruity is life in the woods and at the same time living in a big mansion (महान् आलयः), but the incongruity is to be removed by explaining महालय as मोक्षः । In this sense महालय is explained by Siddhachandra as "महालयो ब्रह्मणि लयः । तदुक्तम्–'अधोमुख्या कुण्डलि-न्योर्ध्वं मुखे कृते सति ब्रह्मरन्ध्रपर्यन्तं नीतायां तस्यामेकान्तेनावस्थानं ब्रह्मणि लयः' इति । यद्वा महालयो मोक्षस्तत्र कृतवसतिरित्यर्थः ।

असंयतः । (a) having no control of passions, (b) free.

L. 20. सामप्रयोगपर etc. Siddhachandra explains it as साम सान्त्वनं तत्प्रयोगपरोपि मैत्रीप्रयोगतत्परोऽपि सततं निरन्तरमवलम्बित आश्रितो दण्डो राजदेयद्रव्यं येनेति विरोधः । तत्परिहारपक्षे सामवेदप्रयोगपरोऽपि सततमवलम्बितो दण्डो यष्टिर्येनेति विग्रहः ।

सुप्तः । (*a*) निद्रितः । (*b*) "सुष्टु शोभना सटा जटा यस्य"—Siddhachandra, who quotes the following to illustrate this meaning of सटाः—"राजा राजाङ्किताङ्घ्रेरनुपचितकलो यस्य चूडामणित्वं नागा नागात्मजार्धं न भसितधवलं यद्वपुर्भूषयन्ति । मा रामारागिणी भून्मतिरिति यमिनां येन बोद्धाहि मारः स सटाः सटाभ्वनुन्नारुणकिरणनिभाः पातु चित्रस्त्रिनेत्रः ।"—इति श्रृङ्गारतिलकटीकायाम् and "सन्नालिका सदा सटा परिकरमुदिता"—इति शोभनस्तुतौ ।

सन्निहित etc. Siddhachandra explains it as "सम्यक्प्रकारेण निहितं स्थापितं नेत्रद्वयं लोचनद्वयं येनैवंभूतोपि परित्यक्तं दूरीकृतं वामलोचनं येनेति विरोधः । परिहारपक्षे परित्यक्तं वामं वक्रं लोचनं आलोकनं येनेत्यर्थः" ।

L. 26. दवीयस्तया । दवीयः ( अतिदीर्घः ) तस्य भावः तत्ता, तया । दवीयस्तया प्रपातस्य । falling from a great height.

P. 34, L. 1. उल्बणम् । उत्कटम् ।

L. 2. विवृणोति । विकाशयति ।

L. 5. उत्तानितम् । ऊर्ध्वीकृतम् ।

L. 6. अम्भः......सेकम् । अम्भसः (उदकस्य) क्षोदेन (हस्तच्युतेन) कृतः सेकः (सिञ्चनं) यस्य तम् ।

L. 7 जलशिशिरायाम् । जलेन शिशिरायाम् ( शीतलायाम् ) ।

L. 9. अघमर्षणानि । अघं ( पापं ) मृष्यते उत्पन्नत्वेपि नाशनेन कर्मणमत्वात् सह्यते अनेन इति अघमर्षणः । It is the 190th hymn of the Rigveda. Of it is said,—"सर्वेनसामपध्वंसि जप्यं त्रिष्वघमर्षणम्"—Amarkosa, and "यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः । तथाघमर्षणं सूक्तं सर्वपापप्रणाशनम् ।"

L. 10. अर्घम् । पूजाम् । Another reading is अर्घ्यं (oblation).

L. 11. करतल......जटः । करतलेन निर्धूननं ( आच्छोटनं, dishavelling with the fingers). तेन विशदा (निर्मला) जटा यस्य ।

L. 14. अनतिदूरमिव गत्वा । Construe this with आश्रमपदमपश्यम् in l. 14 of page 36. The first epithet of the आश्रम is काननैकदेशवर्तिनम् in l. 19—20 below,

सदा......कुसुमफलैः । सदा सन्निहितानि (Siddhachandra explains it as हस्तग्राह्यानि ) कुसुमानि च फलानि च, येषाम् ।

L. 15. बहलैः । abounding in, dense with.

एला......कलापैः । एलायाः लताः, ताभिः आकुलितः (व्याप्तः) नालिकेरी-कलापः (नालिकेरीसमूहः) येषु । नालिकेरी is also written as नारिकेली ।

लोल......पल्लवैः । लोलाः ( चञ्चलाः ) लोध्रः ( वृक्षविशेषः ) च लवली ( लताविशेषः) च, लवङ्गश्च, तेषां पल्लवाः येषु तैः ।

L. 16. उल्लसित...पटलैः । उल्लसितानि ( बहिर्निर्गतानि ) चूतानां (आम्राणां) रेणुपटलानि (परागसमूहानि) येषु तैः ।

अलि......सहकारैः । अलिकुलानां ( भ्रमरसमूहानां ) झङ्कारेण मुखराः (वाचालाः, noisy) सहकाराः (वृक्षविशेषाः) येषु तैः ।

L. 17. उन्मद......कोलाहलिभिः । उन्मदानि (उन्मत्तानि) कोकिलकुलानि (पिककुलानि), तेषां कलापः (समूहः), तस्य कोलाहलः (कलकलध्वनिः) येषु तैः ।

उत्फुल्ल......पिञ्जरैः । उत्फुल्लाः ( विकसिताः ) केतक्यः ( मालत्यः ), तासां रजःपुञ्जः (परागसमूहः), तेन पिञ्जरैः ( पीतरक्तैः ) ।

L. 18. पूगी......देवतैः । पूगीलताः (क्रमुकलताः known as सुपारी in Hindi) एव दोलाः (प्रेंखाः, swings), तास्वधिरूढाः वनदेवताः येषु तैः ।

तारकावर्षम् । उल्कापातम् । falling of meteors. This is an ill omen.

पिशुनम् । सूचकम् ।

L. 19. संसक्तपादपैः । संसक्ताः (अन्योन्यं मिलिताः) पादपाः ( वृक्षाः ) येषु तैः ।

L. 20. उपगूढम् । व्याप्तम् ।

The second epithet of the आश्रम is दण्डकारण्यस्थलीभिरुपशोभित-प्रान्तम् । in l. 22.

अचकित......शबलाभिः । अचकिताः ( निर्भयाः ) प्रचलिताः ( गच्छन्तः ) कृष्णसाराः ( कृष्णमृगाः ) तेषां शतानि, तैः शबलाभिः (किर्मीराभिः, varied, spotted). This and the other adjectives qualify स्थलीभिः ।

L. 21. मारीच......दलाभिः । मारीच एव मायामृगः, तेन अवलूनानि (छिन्नानि) रूढानां (सञ्जातानां) वीरुधां (वल्लीनां) दलानि यासु ताभिः ।

दाशरथि......तलाभिः । दशरथस्य अपत्यं पुमान् दाशरथिः ( दशरथ+ इञ् (इ) under the aphorism अत इञ् ), तस्य चापस्य कोट्यः, ताभिः

क्षताः (उत्खाताः) कन्दाः (मूलानि), तेभ्यो गर्ताः (holes) तैः, विषमितं (उच्च-नीचतां प्राप्तं, made uneven) तलं यासु ताभिः ।

L. 22. The next epithet is मुनिभिः अशून्योपकण्ठम् ।

आगृहीत......मृद्भिः । आगृहीताः समिधः (एधांसि, fuel for the sacred fire), कुशाः, कुसुमानि, मृदः (मृत्तिकाः) च यैः तैः ।

L. 23. अध्ययन......अनुगतैः । अध्ययनेन (वेदपाठेन) मुखराः शिष्याः, तैः अनुगतैः ।

मुनिभिः । करणे तृतीया ।

L. 24. अशून्योपकण्ठम् । अशून्यं उपकण्ठं यस्य तम् । qualifies आश्रमम् ।

उत्कण्ठित......ध्वानम् । उत्कण्ठितेन (longing) शिखण्डिमण्डलेन श्रूय-माणः जलेषु कलशपूरणध्वानः (ध्वनिः) यस्मिन् तम् ।

अनवरत......उपलक्ष्यमाणम् । अनवरतं (सततं) आज्येन (घृतेन) आहुतिः (हवनं) तया प्रीतैः चित्रभानुभिः (वह्निभिः), सशरीरमेव मुनिजनं (मुनिवर्गं) अमर-लोकं (स्वर्गलोकं) निनीषुभिः (qualifies चित्रभानुभिः), उद्धूयमाना (कम्पमाना) या धूमलेखा, तस्याः छलेन (मिषेण) आबध्यमानः (विरच्यमानः) स्वर्गस्य यो मार्गः, तत्र गमनं, तदर्थं सोपानसेतुः (stair case) इव उपलक्ष्यमाणं व्यज्यमानम् । It seemed as if the sacred fires, pleased with the constant offerings of ghee and desiring to take the sages in bodily form to heaven, were making with their wavy columns of smoke flights of stairs through which to go on the way to heaven.

P. 35, L. 1. The next epithet of the आश्रम runs up to दीर्घिकाभिः परिवृतम् in l. 4. Siddhachandra seems to take आसन्नवर्तिनीभिः as qualifying तपोधनैः ।

L. 2. तरङ्ग...पङ्क्तिभिः । तरङ्गाणां परम्परासु (वीथीषु, rows) संक्रान्ताः (प्रतिबिम्बिताः) रविबिम्बस्य पङ्क्तयः यासु ताभिः ।

तापस......विगाह्यमानाभिरिव । It seemed as if the many images of the sun reflected in the many waves gave the ponds the appearance of being bathed in by the Seven Rishis (the Great Bear) having come to see the hermits (living in the hermitage).

अतिविकच...उद्वहन्तीभिः । the bed of full-blown white water-lilies at night seemed as if it were the planets themselves come down to worship the sages ( of the hermitage ).

दीर्घिकाभिः । वापीभिः । ponds.

L. 6. उटज......श्यामाकम् । उटजानां (पर्णशालानां) अजिरेषु (अङ्गणेषु) प्रकीर्णाः (विक्षिप्ताः) शुष्यन्तः श्यामाकाः (धान्यविशेषाः) यस्मिन् तम् । qualifies आश्रमम् ।

L. 7. उपसंगृहीत......फलम् । उपसंगृहीतानि ( आत्तानि ), आमलकं, लवली, कर्कन्धू (बदरी), कदली, लकुचः, चूतः (आम्रः), पनसः, ताली च, एतेषां (फलवृक्षविशेषाणां) फलानि यस्मिन् तम् ।

L. 8. अनवरत......कुलम् । अनवरतं श्रवणेन ( श्रुतिमात्रेण ) गृहीताः (शिक्षिताः) वषट्काराः (the exclamation of वषट् which is generally used in making an oblation to a deity), तैः वाचालं शुककुलं यस्मिन् तम् ।

L. 9. अनेक......सुब्रह्मण्यम् । अनेकाभिः सारिकाभिः (पक्षिविशेषाभिः) उद्घुष्यमाणं ( उच्चैःपठ्यमानं ) सुब्रह्मण्यं यस्मिन् तत् । Siddhachandra renders सुब्रह्मण्यम् by वेदः । Prof. Peterson refers to an " article in B. R., where the सुब्रह्मण्या is said to be the invitation to drink the soma, addressed to the gods by the priests of the name and beginning with the words "इन्द्रागच्छ हरिव आगच्छ ।"

L. 11. अग्निकार्य......कुसुमम् । अग्निकार्ये (होमे) अर्धं दग्धानि (half burnt) अत एव सिमसिमायमानानि ( सिमसिमेति शब्दं क्रियमाणानि ) समित्कुशकुसुमानि यस्मिन् तम् ।

उपल । stone.

L. 12. अचिर......भूतलम् । अचिरक्षुण्णानि ( तत्कालमर्दितानि, crushed not long ago) वल्कलानि, तेषां रसेन पाटलं ( श्वेतरक्तं ) भूतलं यस्मिन् तम् ।

रक्त......कुसुमम् । रक्तचन्दनेन उपलिप्तं ( आलिखितं ) आदित्यमण्डलमेव आदित्यमण्डलकं, तस्मिन् निहितानि करवीरकुसुमानि यस्मिन् तम् ।

L. 13. इतस्ततः......परिहारम् । इतस्ततः विक्षिप्तं भस्म, तस्य लेखा, तया कृतः मुनिजनानां भोजनभूमेः परिहारः ( निषेधः मार्जनं वा ) यस्मिन् । This allows of two explanations according to the sense in which we take परिहार । If we take परिहार to mean निषेध the

clause would mean, in the words of Prof. Peterson, " In which here and there the eating places of the sages were guarded from profanation by lines of ashes thrown round them." In this connection it is to be noted that even now the पञ्चद्राविड Brahmans observe a similar custom by drawing lines of flour (generally of rice) round the eating-place of each Brahmana (*i.e.*, the space occupied by him and his dish). If, however, we take परिहार to mean मार्जन the clause would mean ' In which here and there, the eating place of the sages is cleaned (परिहार) by rubbing (लेखा) ashes over them'. Here also is to be noted the custom of cleaning the eating-places ( after the eating ) by first rubbing cow-dung over them. As Siddhachandra says, perhaps the custom was first to throw ashes and then to rub cow-dung over the eating places.

L. 14. परिचित......तापसम् । परिचिताः शाखामृगाः ( monkeys and apes), तेषां कराकृष्ट्या ( हस्तावलम्बेन ) निष्काश्यमानाः प्रवेश्यमानाः च जरन्तः च अन्धाश्च तापसाः यस्मिन् । In which the old and blind ascetics were led in and out by the hand by the tamed (lit. familiar) moneys and apes.

L. 16. शंखवलयैः । Siddhachandra explains it as त्रिरेख-कटकैः where कटक means a 'string.'

कल्माषितम् । strewn with (lit. soiled by).

L. 17. अम्बु......पुटैः । अम्बुपूर्णानि पुष्करपुटानि । ( शुण्डाग्राणि ) येषां तैः । qualifies वनकरिभिः ।

L. 19. शालूकानि । उत्पलानां कन्दाः ।

L. 20. संधुक्ष्यमाणः । प्रज्वाल्यमानः । fanned.

आरब्ध......गन्धम् । Siddhachandra explains it as आरब्धो येऽऽ मृते चरुः यज्ञे ओदनः तस्य चारु मनोहरः गन्धो यस्मिन् स तम् । अमृत means यज्ञ; and चरु means ओदन used for sacrifices and is defined as "अनवस्रावी निरुष्मपक्व ओदनश्चरुः"—याज्ञिकाः ।

पुरोडाशः । The above described चरुः ।

L. 21. आमोदितम् । वासितम् । made fragrant. Siddhachandra, however, adopts the other meaning of the word, *viz.*, delighted.

अविच्छिन्न……मुखरितम् । अविच्छिन्ना आज्यस्य ( घृतस्य ) धारा, तया हुतिः (हवनं), तेन ( हुतं भुङ्क्ते इति हुतभुक् ( अग्निः ) तस्य झङ्कारः ) हुतभुग्झङ्काकरः, तेन मुखरितम् ।

L. 22. अर्च्यमान……पितामहम् । अर्च्यमानाः हरिः च हरः च पितामहः (ब्रह्मा, lit. grandfather) च यस्मिन् स तम् । Prof. Peterson suggests that the word may mean 'Harihara who is Pitamaha' and refers to his note on v. 4 of the introductory stanzas.

उद्दिश्यमान……कल्पम् । Siddhachandra explains it as उद्दिश्यमानः (उद्देशपूर्वकं क्रियमाणः) श्राद्धकल्पः (श्राद्धाचारः ) यस्मिन्स तम् ।

L. 25. अजिराणि । अङ्गणानि ।

उपमृज्यमानानि । being washed.

L. 26. उपह्रियमाणः । another reading is उपहूयमानः ।

निर्वर्त्यमाना । निष्पाद्यमाना ।

P. 36, L. 2. गवेधुका । It is a kind of grass eaten by cattle. Siddhachandra says that it is " धान्यविशेषः कन्दो वा " ।

पुष्करबीजानि । कमलफलानि ।

L. 3. संस्क्रियमाण । another reading is सत्क्रियमाण ।

L. 4. अश्रुतपूर्वमनङ्गस्य । This is because of the absence of passions in the sages living in it.

L. 5. वन्दितम् (*a*) bowed down by, (*b*) श्रेष्ठम् ।

असुरारिम् । विष्णुम् ।

प्रकटितनारसिंहरूपम् । Siddhachandra adopts the reading प्रकटितनरहरिवराहरूपम् and explains it as "प्रकटितानि नरो नारायणो हरिश्च नृहरिः । अथवा नरहरिर्नृसिंहो वराहश्च । तेषां रूपाणि येन स तम । पक्षे । प्रकटितानि नरेभ्यो हरिवराहरूपाणि येन स तम् ।

कपिलाधिष्ठितम् । (*a*) किपिलमुनिना आश्रितं, because कपिल was the propounder of the Sankhya system of philosophy, (*b*) कपिलगोभिरधिष्ठितम् ।

L. 6. मथुरा । The town of the name, also spelt as मथुरा ।

बलावलीढदर्पितधेनुकम् । बलावलीढः (बलवान्) दर्पितः (गर्वयुक्तः) धेनुकः (तन्नामकराक्षसः) यस्मिन् । पक्षे बलावलीढाः (बलयुक्ताः) दर्पिताः धेनुकाः (गावः) यस्मिन् ।

उदयन was the king of the Vatsas. Siddhachandra says that वत्स was a king of the Pandava family. In the case of the आश्रम, वत्स means a 'calf'.

L. 7. अधिराज्यम् । प्रभुत्वम् ।

L. 8. द्रुम । (*a*) tree, (*b*) a king of the name.

निदाघसमय । summer season.

प्रत्यासन्नः । समीपस्थः ।

जलप्रपातः । (*a*) प्रवर्षं । (*b*) निर्झरः ।

L. 10. वनगहन......हरिम् । (*a*) वनस्य (जलस्य) यत् गहनं (गम्भीरं) मध्यं (अभ्यन्तरं), तत्र सुखेन सुप्तो हरिः (विष्णुः) यस्मिन् । It is well known that विष्णु sleeps in the ocean in the rainy season ; (*b*) वनस्य (अरण्यस्य) गहनानि (गह्वराणि), तेषां मध्ये सुखेन सुप्ताः हरयः (सिंहाः) यस्मिन् ।'

शिला......सञ्चयम् । (*a*) शिलाशकलप्रहारेण संचूर्णितः अक्षस्य (तन्नाम्नो रावणसुतस्य) अस्थिसञ्चयः येन तम् । (*b*) शिलाशकलप्रहारेण संचूर्णितानां अक्षाणां (विभीतकफलानां) अस्थिसञ्चयः (मध्यप्रदेशसमूहः) यस्मिन् ।

L. 11. सुरभि......धरमपि । (*a*) सुरभि (सुगन्धि) विलेपनं (अङ्ग-रागः), तद्धरम् (*b*) सुरभेः (गोः) विलिप्यते अनेन इति वलेपनं (गोमयं) यस्यां एतादृशी धरा (भूमिः) यस्मिन् ।

मातङ्गकुल । (*a*) barbarians, (*b*) herds of elephants.

L. 12. उल्लसित । shining, brilliant.

धूमकेतु । (*a*) a meteor, (*b*) columns of smoke.

L. 15. परिपूर्णद्विजपतिमण्डलम् । (*a*) पूर्णचन्द्रमण्डलम् । (*b*) ज्ञानभृत-ब्राह्मणसमूहम् ।

The whole paragraph contains examples of the figure of speech known as Parisamkhya which is already explained.

मुखरागः । (*a*) मुखे रक्तिमा । (*b*) मुखे वैरूप्यम् ।

L. 17. चक्षूरागः । (*a*) नेत्रयोरारुण्यम् । (*b*) अभिलाषः ।

L. 18. मेखलाबन्धनम् । (*a*) मौञ्जीबन्धनम् । (*b*) शृङ्खलाबन्धनम् ।

L. 19. पक्षपातः । (*a*) falling of wings, (*b*) partisanship, partiality.

कृकवाकुषु । कुक्कुटेषु । fowls.

भ्रान्तिः । (*a*) परिवृत्तिः । (*b*) मिथ्याज्ञानम् ।

L. 20. वसुसङ्कीर्तनम् । (*a*) वसूनां ( गणदेवानां ) सङ्कीर्तनं (सम्यक्-थनम् )। (*b*) वसु ( द्रव्यं ), तस्य सङ्कीर्तनं (प्रशंसनम्) ।

गणना । (*a*) संख्या । (*b*) आदरः ।

L. 21. बाल । (*a*) hair, (*b*) youth.

रामानुरागः । (*a*) रामे अनुरागः । (*b*) रामासु (स्त्रीषु) अनुरागः ।

L. 22. मुखभङ्गविकारः । (*a*) मुखे त्रिवलीविकृतिः । (*b*) आस्यमोटना-दिविकारः ।

L. 23. शकुनिः । (*a*) the maternal uncle of Duryodhana, (*b*) bird.

वायुप्रलपितम् । (*a*) वायोः ( वायुदेवतायाः ) प्रलपितं ( जल्पितं ), (*b*) वायुना (वायुविकारेण उन्मादादिना) प्रलपितम् ।

L. 24. द्विजपतनम् । (*a*) दन्तपातः । (*b*) ब्राह्मणानामाचारभ्रंशः ।

जाड्यम् । (*a*) शैत्यम् । (*b*) प्रज्ञाहीनत्वम् ।

भूतिः । (*a*) भस्म । (*b*) सम्पत् ।

L. 25. नृत्यपक्षपातम् (*a*) नृत्ये पक्षाणां पातः ( पतनं ), (*b*) नृत्ये (नृत्य-विषये ) पक्षपातः ( अङ्गीकारः ) ।

भोगः । (*a*) body, (*b*) enjoyments (sensual).

L. 26. श्रीफलाभिलाषः । (*a*) श्रीफलेषु अभिलाषः । (*b*) श्रीः (लक्ष्मीः), तस्याः फलानि ( गृहादीनि ), तेषु अभिलाषः ।

अधोगतिः । (*a*) अधस्संयोगः, (*b*) नरकपातः ।

P. 37. The construction of the sentence in this paragraph is तस्य मध्यभागमण्डलमलंकुर्वाणस्य (L. 1.) रक्ताशोकतरोरधश्छा-यायामुपविष्टं (L. 6-7) भगवन्तं जाबालिमपश्यम् (P. 38, L. 18-19).

L. 1. Some editions omit मण्डलम् ।

आलक्तक...पल्लवस्य । आलक्तकवत् लोहिताः पल्लवाः यस्य तस्य। This and the other adjectival clauses ending in षष्ठी qualify रक्ता-शोकतरोः ।

L. 2. मुनिजन...शाखस्य । मुनिजनैः आलम्बिताः ( स्थापिताः, hung) कृष्णाजिनानि जलकरकाः ( पात्रविशेषाः ) च, तैः सनाथाः शाखाः यस्य तस्य । some editions read जलकलशाः for जलकरकाः ।

तापस...अङ्गुलस्य । तापसानां कुमारिकाभिः मूलभागे ( आलवाले ) दत्ताः पीतपिष्टस्य ( हरिद्राचूर्णस्य, lit. yellow powder) पञ्चाङ्गुलयः ( हस्तबिम्बाः ) यस्मिन् तस्य ।

L. 4. हरित...तलस्य । हरितेन ( अशुष्केण ) गोमयेन उपलेपनं, तेन विविक्तं ( पूतं ) तलं ( अधोभागः ) यस्य तस्य ।

L. 5. कुसुमोपहारः । पुष्पढौकनम् ।

L. 6. परिमण्डलतया । परिमण्डलं ( समन्तात्परिमाणं ), तस्य भावः तत्ता, तया ।

विस्तीर्णावकाशस्य । विस्तीर्णः अवकाशः ( अभ्यन्तरप्रदेशः ) यस्य तस्य ।

L. 7. अत्युग्रतपोभिः । अत्युग्रं ( अतितीक्ष्णं ) तपः येषां तेषां । The construction is अत्युग्रतपोभिः महर्षिभिः परिवृतम् qualifying (as do the following adjectival clauses ending in द्वितीया) भगवन्तं जाबालिम् ।

कुलपर्वतैः । the principal one of a class of seven mountains which are supposed to exist in each division of the continent. The कुलपर्वताः are seven in number. Thus :— महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ।

L. 8. वैतानवह्निभिः । दक्षिणाग्निगार्हपत्याहवनीयैः ।

कल्प is a day of Brahma (consisting of 1000 yugas, or 432 million years of mortals) at the end of which the universe is destroyed.

L. 9. उग्रशापभिया । etc. The next clause is जरया (l. 11.) धवलीकृतविग्रहम् । (l. 12).

L. 10. विहितकेशग्रहया । प्रणयिन्यपि रतिकलहे केशग्रहं करोति, तथा जरापि केशेषु लग्नेत्यर्थः ।

L. 11. प्रसाधितया । भूषितया ।

प्रकटिततिलकया । प्रकटितं आविष्कृतं तिलकं यया: तया । जरायां तिलकाः प्रजायन्त इति प्रसिद्धिः ।

L. 12. आयामिनीभिः etc. The next clause is अयमिवशोभमानम् in l. 15.

आयामिनीभिः । विस्तारवतीभिः ।

पलित । grey.

L. 13. उच्छ्रिताभिः । ऊर्ध्वीकृताभिः ।

L. 15. उपशोभमानम् । another reading is उपशोभितम् ।
The next clause is ललाटफलकेनोपेतम् ।

तिर्यक्......स्त्रयेण । त्रीन् पथः गच्छति इयं इति त्रिपथगा । It is said that the celestial river Ganges has three streams one going upward, one oblique( तिर्यक् ) and the third downward. तिर्यक् प्रवृत्तं त्रिपथगायाः स्रोतसां त्रयं यस्मिन् तेन qulifies हिमगिरिशिला-तलेन । The idea is that it seemed as if all the three streams of the Ganges were flowing obliquely, or rather horizontally.

L. 17. The next clause is भ्रूलताभ्यां अवष्टभ्यमानदृष्टिम् ।
अवलम्बित...शिथिलाभ्याम् । अवलम्बिताः वार्धक्येन ( आश्रिताः ) वलयः ( त्रिवल्यः ), ताभिः शिथिलाभ्याम् ।

L. 18. अवष्टभ्यमानदृष्टिम् । अवष्टभ्यमाना ( अवलम्ब्यमाना) दृष्टिः यस्य तम् ।

The next clause is आननमादधानम् in l. 24-25.

विवृतः । विदीर्णः ।

L. 19. सत्यप्ररोहैः । सत्याङ्कुरैः ।

L. 21. अविरत...अवकृष्टैः । अविरतं (or अनवरतं according to some editions) यः सोमस्य उद्गारः तेन सुगन्धी यो निश्वासः (निश्वास-पवनः), तेन अवकृष्टैः ( आकर्षितैः) । qualifies अलिभिः in the next line.

L. 22. मुखभागः । मुखस्याग्रिमप्रदेशः ।

L. 23. निम्नतर...गर्तम् । निम्नतरः ( गम्भीरतरः ) गण्डगर्तः यस्य तत् । qualifies आननम् ।

उन्नततरहनुघोणम् । उन्नततरे (अत्युच्चे) हनु (चिबुकं, chin) घोणा (नासिका) च यस्मिंस्तत् ।

आकरालतारकम् । आकराला ( ईषद्रक्ता ) तारका यस्य तत् ।

L. 24. आनाभि...कलापम् । आनाभि ( नाभिपर्यन्तं) लम्बः ( प्रलम्बः ) कूर्चकलापः (beard) यस्मिंस्तत् ।

L. 25. अतिचपल etc. The next clause is अङ्गमुद्वहन्तम् । Construe this and the intervening accusatives with अङ्गम् ।

आततामिः । विस्तीर्णाभिः ।

P. 38, L. 1. तनुतरङ्गभङ्गम् । तनवः ( सूक्ष्माः ) तरङ्गभङ्गाः ( कल्लोलविघटितानि ) यस्मिन् this corresponds to the ribs of the sage and qualifies प्रवाहम् ।

उत्प्लवमानमृणालम् । उत् ( प्राबल्येन ) प्लवमानानि ( वहमानानि ) मृणालानि यस्मिन् । this corresponds to the यज्ञोपवीतम् of the sage and qualifies प्रवाहम् ।

L. 2. The next clause is अक्षवलयं आवर्तयन्तम् (L. 4.)

उज्वल...ग्रथितम् qualifies सरस्वतीहारम् ।

L. 3. सरस्वतीहारम् । सरस्वत्याः हारम् ।

चलदङ्गुलिविवरगतम् । चलन्त्यः अङ्गुलयः, तासां विवरं, तत्र गतम् ।

L. 4. आवर्तयन्तम् । परिवर्तयन्तम् ।

अनवरत ··चक्रम् । अनवरतं भ्रमितं तारकाचक्रं ( नक्षत्रसमूहः ) यस्मिन् । qualifies ध्रुवम् ।

ध्रुवम् । The story of ध्रुव is thus given in Apte's Sanskrit Dictionary. " Dhruva is the Polar star, but is personified in mythology as the son of Uttanapada. The account of the elevation of an ordinary mortal to the position of the polar star runs thus. Uttanapada had two wives, Suruchi and Suniti, but the later was disliked by him. Suruchi had a son named Uttama, and Sumti gave birth to Dhruva. One day the boy tried, like his elder brother, to take a seat in his father's lap, but he was contemptuously treated both by the king and his favourite wife. The poor child went sobbing to its mother who told him in consolatory terms that fortune and favour were not attainable without hard exertions. At these words, the youth left the paternal roof, retired to the woods, and, though quite a lad, performed such rigorous austerities that he was at last raised by Vishnu to the position of the polar star."

उन्नमता । उपरिस्फुरता । qualifies शिराजालकेन ।

शिराजालकेन । शिराः (धमनयः, veins, bloodvessels) तासां जालकेन । construe this with निरन्तरनिचितं ( अत्यन्तव्याप्तम् ) ।

L. 6. The next clause is दुकूलवल्कलेन संछादितम् ।

गुण...तन्तुभिः । गुणानां ( विद्यातपश्चारणादीनां ) सन्तानाः ( समूहाः ), त एव तन्तवः ( सूत्राणि ), तैः ।

L. 7. मानस...शुचिना। मानससरोजलवज्जलं, तेन क्षालितं, अत एव शुचिना।

दुकूलवल्कलेन। दुकूलसदृशं वल्कलं, तेन।

The next clause is स्फटिककमण्डलुना उपशोभमानम्।

L. 9. त्रिदण्डोपविष्टेन। Siddhachandra explains it as त्रिदण्ड-त्रिपादिका, तत्रोपविष्टेन ( स्थापितेन )।

L. 11. संविभागमिव कुर्वाणम्। Siddhachandra explains it as स्वकीयवस्तुनः परेभ्यः किंचिद्विभज्य प्रदानमिव कुर्वाणं विदधानम्। अचला-दीनां स्थैर्यादयो गुणाः अनेनैव संविभागीकृताः सन्तीति भावः।

L. 12. स्वप्रभाव...आधिपत्यम्। स्वप्रभावेन ( स्वमहात्म्येन ) उपात्तं ( लब्धं ) द्विजेषु ( ब्राह्मणेषु, पक्षे पक्षिषु ) प्रभुत्वं ( आधिपत्यं, पक्षे मुख्यत्वं ) येन स तम्।

आश्रमगुरुम्। (*a*) आश्रमः (मुनिस्थानं), तत्र गुरुं (श्रेष्ठम्)। (*b*) आश्रमाः ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–सन्यासरूपाः ) तेषां गुरुं ( प्रवर्तकम् )। वर्णाश्रमाः ब्रह्मणैव प्रवर्तिता इति प्रसिद्धम्।

जरच्चन्दनतरुम्। Siddhachandra says पुरातने परिमलविशेषाधिक्या-जरद्विशिष्टचन्दनतरुग्रहणम्। तत्रैव भुजङ्गबाहुल्यम्।

L. 13. भुजङ्ग...जटाकुलम्। (*a*) भुजङ्गस्य निर्मोकः, तद्वद्धवला या जटा तया आकुलं व्याप्तम्। (*b*) भुजङ्गनिर्मोका एव धवलाः जटाः ताभिः आकुलं ( व्याप्तम् )।

प्रलम्बकर्णबालम् (*a*) प्रलम्बाः कर्णयोः बालाः ( केशाः ) यस्य। (*b*) प्रलम्बौ कर्णौ च बालश्च (tail) यस्मिन्।

L. 14. कच। (*a*) hair, (*b*) name of a son of Brihaspati.

L. 15. मुख। (*a*) face, (*b*) beginning.

क्षीणवर्षम् (*a*) क्षीणानि ( गतानि ) वर्षाणि (years) यस्य तम्। (*b*) क्षीणं स्वल्पत्वं प्राप्तं ) वर्षं ( वृष्टिः ) यस्मिन्।

शन्तनुम्। भीष्मपितरं। Siddhachandra adopts the reading शान्तनुः and says शान्तनुः भीष्मपिता which is evidently wrong, for, Bhishma is called शान्तनवः being the son of शन्तनुः।

प्रियसत्यव्रतम्। (*a*) प्रियं सत्यमेव व्रतं यस्य स तम्। (*b*) प्रियः सत्यव्रतः ( भीष्मः ) यस्य। Prof. Peterson says "Satyavrata is the name of Bhisma's father." Siddhachandra, however, means भीष्म by सत्यव्रत and seems to be right; for it is Bhishma that

took the terrible vow that he would never take the throne of his father, get himself married and beget children, and kept his vow to the very last. This is why he received the name Bhishma also. On the other hand Bhishma's father does not appear to have taken any vow to receive the epithet सत्यव्रत ।

L. 16. कृतोत्तरासङ्गम् । (*a*) कृतः विहितः उत्तरासङ्गः ( बृहतिका ) an upper garment) येन स तम् । (*b*) कृतः उत्तरस्याः दिशः सङ्गः ( संश्लेषः ) येन स तम् ।

L. 17. पयः । (*a*) milk, (*b*) water.

दीनानाथविपन्नशरणम् । (*a*) दीनानि (अशोभावन्ति), अनाथानि (अप्रभूणि) विपन्नानि ( अविद्यमानभावानि ) शरणानि ( गृहाणि ) यस्मिन् in the case of the नगर ।( *b*) दीनाः (दुःखाभिभूताः ) अनाथाः ( स्वामिरहिताः ) विपन्नाः (व्याध्यादिपरिभूताः ), तेषां शरणं ( परित्राणहेतुम् ) ।

L. 18. भस्म......शरीरम् । Siddhachandra explains it as भस्मवत्पाण्डुराणि ( अतिवार्धक्यात् श्वेतानि ) रोमाणि, तैः आश्लिष्टं शरीरं यस्य स तम् । पक्षे भस्मवत्पाण्डुरमु (रो) मा गौरी तया चाश्लिष्टमर्धाङ्गीकृतं शरीरं यस्येति विग्रहः ।

L. 21. अवदाता । निर्मला ।

परिस्फुरन्ती । देदीप्यमाना ।

चक्षुषः प्रतिहन्ति तेजांसि । । Siddhachandra explains it as चक्षुषः नेत्रस्य तेजांसि महांसि प्रतिहन्ति प्रतिघातं कुर्वन्ति (which is probably a mistake for करोति ) । आभिमुख्येन गच्छन्तीनां नयनरश्मीनां बलवद्वेग-सौदामिनीतेजसा प्रतिनिवृत्तिरनुभवसिद्धैवेति भावः । इदं स्वभाववर्णनम् । विरोधोऽपि शान्तस्योत्तप्तकनकावदाततेति विरोधः" ।

L. 23. शुष्क...वृत्ति । शुष्कानि नलकाशकुसुमानि, तेषु निपतितः अनलः ( वह्निः ), तद्वच्चटुला ( त्वरिता ) वृत्तिः यस्य तत् ।

L. 24. तनुतपसाम् । अल्पतपसाम् ।

L. 26. दिव्येन चक्षुषा । ज्ञानलोचनेन ।

P. 39, L. 3. अवनितलकमलयोनिना । प्रत्यक्षोपलभ्यमानेन भूतल-ब्रह्मणा । the (visible) Brahma of this lower earth.

रुचरद्विजपरिवारा । Siddhachandra takes it as qualifying सरस्वती only and explains it as रुचिराः मनोज्ञा ये द्विजा दन्तास्त एव

परिवारः परिच्छदो यस्याः सेति सरस्वतीविशेषणम् । Prof. Peterson, however, thinks that it "is fitted by the double meaning of द्विज—(*a*) 'teeth', (*b*) 'birds,' —to go both with सरस्वती and हंसी ।"

L. 10. प्रसादम् । नैर्मल्यम् ।

L. 11. सर्वात्मना । सर्वप्रकारेण ।

L. 12. विलसितम् । चेष्टितम् ।

L. 14. महासत्वा । महाधैर्या ।

L. 15. प्रलय...दुर्निरीक्ष्ये । प्रलये ( कल्पान्ते ) यो रविः (he is brighter than our sun), तस्य रश्मिनिकरः, तद्वत् दुर्निरीक्ष्यः (विलोकयितुमशक्यः ।

L. 17. विभावसोः । वह्नेः ।

L. 19. पवन···कलापाः । पवनेन लोलः ( चपलः ) पुञ्जीकृतः (समूहीकृतः ) शिखाकलापः (ज्वालासमूहः ) येषां ते ।

L. 20. आशुशुक्षणयः । वह्नयः ।

L. 21. तरलित······वल्कलः । तरलितानि कम्पितानि, दुकूलवल्कलानि येन सः ।

L. 22. गन्धवाहः । वायुः ।

महाभूतानि । The five elements पृथिव्यप्तेजोवाय्वाकाशानि ।

प्रायः···तेजांसि । Prof. Peterson renders it as "The elements themselves find it hard to resist." Siddhachandra, however, takes it differently as he explains it as महाभूतानामपि पृथिव्यादीनामपि तेजांसि महांसि दुरभिभवानि दुःखेन अभिभवितुं (to excel or surpass) शक्यानि भवन्ति । Some editions read अस्य before तेजांसि and thus support the rendering of Prof. Peterson.

L. 25. अवष्टम्भात् । आलम्बात् ।

सन्तरणसेतुः । सन्तरणे सेतुः ।

P. 40, L. 1. सिद्धिमार्गस्य । मोक्षमार्गस्य ।

अस्तगिरिरसद्ग्रहस्य । the end of all tricks or prejudices.

L. 2. नाभिः । मध्यप्रदेशः

स्थितिवंशः । अवस्थानवेणुः ।

तीर्थम् । घट्टः ।

अवतारणम् । प्रवेशनम् ।

L. 3. निकषोपलः। touch-stone.

L. 5. कुलभवनम्। मूलगृहम्।

L. 6. नेमिः। the ring or felly of a wheel.

L. 9. अरातिः। शत्रुः।

L. 10. अनायत्तः। अनाधीनः।

L. 13. तिर्यञ्चः। पशवः।

L. 14. हरिण...शबलम्। हरिणस्य लोचनद्युतिः (नेत्रकान्तिः) तद्वत् शबलम् (कर्बुरं, variegated, spotted).

L. 15. शाद्वलम्। शादाः, (शष्पाणि grass) सन्ति अत्र इति शाद्वलः (हरितप्रदेशः), तम्।

अहिः। सर्पः।

L. 17. मृणालकलापाशङ्किभिः। मृणालकलापं आशङ्कत इत्येवं शीलास्तैः। taking it (the mane) for a clump of lotuses.

L. 18. बहुमन्यते। Siddhachandra explains it as "सुखेन जानाति" Prof. Peterson translates it as "It is pleased to have,' 'thinks it much that he has.'"

L. 22-25. तापस...प्राणिनः। Siddhachandra explains it as follows:—"उत्सर्पन्तीभिरूर्ध्वं व्रजन्तीभिस्तापसानां यदग्निहोत्रं तस्य या धूमलेखा दहनकेतनराजयस्ताभिरनिशं निरन्तरम्। उपेति। उपपादिता विहिता कृष्णं श्यामं यदजिनं चर्म तस्योत्तरासङ्गो वैकक्षं (upper garment) तस्य शोभा येषां ते तथा फलमूलभृतो वल्कलिनो निश्चेतना ज्ञानरहिता अस्य भगवतस्तरवोऽपि वृक्षा अपि सनियमा इव व्रतिन इव लक्ष्यन्तेऽवलोक्यन्ते। सचेतना ये प्राणिनो मनुजादयस्तेषां (किं पुनः) किं भण्यते किं कथ्यते। तेत्वेतादृशा भवन्त्येवेति भावः"।

P. 41, L. 1. पादावुपगृह्य। पादयोः पतित्वा।

L. 5. दूर...तनुः। दूरात् निपतनं (fall from a height), तेन विह्वलं (व्याकुलं) तनुः (देहः) यस्य सः।

L. 6. तपस्वि...वनस्पतेः। and as a hermit could hardly climb the tree. दुरारोहतया। दुःखेनरोढुं शक्यतया।

L. 9. कणनिकरेण। Siddhachandra translates it as सस्यसमूहेन। कण means 'grain' or 'seed.'

L. 14. आवलिता । नमिता ।

L. 15. प्रत्यभिज्ञानम् । recollection. Siddhachandra explains it as 'सोऽयं देवदत्तः' इत्याकारकं ज्ञानम् ।

L. 18. अतीतानि । past.

अर्थः । object, thing.

ईक्षण...गतानाम् । दृष्टानामित्यर्थः ।

L. 19. यतः । wherefore. It refers to the whole paragraph from स हि (L. 16.) to आवेदयति (L. 19.)

L. 22. उपनाथितवती । याचितवती । The word is derived from the root नाथ् 'to beg', 'to solicit' conjugated as नाथति etc., in the परस्मैपद । The root is sometimes used in the आत्मनेपद ।

L. 24. किमभिधानः । किंनामा ।

L. 25. आश्चर्याणां...प्रभवः । Siddhachandra explains it as अपूर्वार्थज्ञापक इत्यर्थः ।

P. 42, L. 1. प्रत्यासीदति । विलम्बितो भवति ।

L. 4. विश्रब्धोपविष्टानाम् । विश्रब्धं सावधानं यथा तथा उपविष्टानाम् । विश्रब्ध is also spelt as विस्रब्ध ।

L. 7. उदन्तम् । वृत्तान्तम् ।

L. 13. उष्मर्पैः । वह्निज्वालाभिः ।

विरलातपः । विरलः ( स्वल्पः ) आतपः यस्य सः ।

तनिमानम् । तनोः भावः तनिमा, तम् ।

L. 14. उद्यत्सप्तर्षि...जिहीर्षया । उद्यन् उदयं प्राप्नुवन्यः सप्तर्षिसार्थः ( सप्तर्षिसमूहः ), तेन स्पर्शः, तस्य परिजिहीर्षा ( परिहर्तुमिच्छा ) तया ।

संहृतपादः । संहृताः ( संकोचिताः ) पादाः ( किरणाः ) यस्य, येन वा ।

Note the pun on the word पाद which means both 'feet' and 'rays.' The sinking sun withdrawing his rays ( पाद ) in the evening is represented as withdrawing his feet ( पाद ) as if to avoid their touching the rising constellation (called the Ursa Major or the Great Bear) of the seven stars said to be the seven sages मरीचि etc.

L. 16. मधुभिदः । विष्णोः । Vishnu is so called because he killed the demon named Madhu.

विगलन्मधुधारम् । विगलन्ती (स्रवन्ती) मधुधारा यस्मात् तत् ।
प्रतिमागतम् । स्वमूर्तिरूपेणागतम् । reflected.

L. 17. अपरार्णवे । पश्चिमसमुद्रे ।

L. 18. शकुनयः । पक्षिणः ।

L. 19. आलग्नरक्तातपच्छेदाः । आलग्नाः (ईषल्लग्नाः) रक्तातपस्य मध्ये मध्ये छेदाः रचनाविशेषाः (sections, patches, fragments, bits) येषां ते । with the red sun falling over them here and there.

मुनिभिः..... वल्कलाः । मुनिभिः आलम्बितानि लोहितानि वल्कलानि येषु ते । The trees looked as if the ascetics had hung their red bark-dresses on them. Siddhachandra, however, explains it as मुनिभिः तपस्विभिः आलम्बिताः आश्रिताः अतएव लोहितवल्कला, *i.e.*, 'the trees looked redbarked on account of their being resorted to by the ascetics.' But, as Prof. Peterson points out, this seems to be wrong.

L. 21. सहस्रदीधितिः । सूर्यः ।

L. 22. यस्याम् । refers to the सन्ध्या ।

एकदेश......मनोहरम् । एकस्मिन् देशे दुह्यमानाः होमधेनवः, तासां दुग्धधारा, तत्र ध्वनितं, तेन धन्यतरं सत् अतिमनोहरम् । Some editions read ध्वनिमनोहरम् ।

L. 24. बलिसिक्थम् । बलिसम्बन्धि सिद्धान्नानि यस्मिंस्तत् । सिक्थः means 'boiled rice'.

L. 25. विहृत्य । पर्यटनं कृत्वा । having wandered.
तारका । (*a*) star, (*b*) pupil of the eye.
लोहिततारका । qualifies both the तपोवनधेनुः and the सन्ध्या । Note that the stars look red when they rise in the evening.

L. 26. प्रोषिते । गते । gone abroad.

P. 43, L. 1. विधुरा । विह्वला ।
हंस......परिधाना । हंसा एव सितदुकूलानि परिधानं ( अधोंऽशुकं ) यस्याः सा ।

In this line the कमलिनी is depicted as a woman observing the vow of a woman whose husband had gone abroad (प्रोषितभर्तृका or विरहिणी ).

L. 5. तारकितम् । सञ्जाततारकोदयम् । तारका+इतच् under the aphorism तारकादिभ्य इतच् ।

L. 8. विभावरी । रात्रिः ।

L. 9. तिमिरोद्गमम् । अन्धकारोदयम् ।

अपहाय । excepting.

L. 10-14. क्रमेण......अध्यतिष्ठत् । Siddhachandra explains it as follows :—"क्रमेण परिपाट्या रविः सूर्योऽस्तं गतोऽदृश्यतां प्राप्त इत्युदन्तमिति वृत्तान्तमुपलभ्य प्राप्तोऽमृतदीधितिश्चन्द्रः । अमरेति । अमरा वशिष्ठादयो मुनयस्तेषां लोकः समुदायस्तस्याश्रमो मुनिस्थानं तमिव गगनतलमम्बरतलमध्यतिष्ठदधितस्थौ । कीदृक्सूर्यः । जातेति जातं समुत्पन्नं वैराग्यं विरक्तता यस्मिन्स तथा तम् । पक्षे विशिष्टो रागस्तस्य भावस्तत्वम् । धौतेति । धौतं क्षालितं दुकूलवल्कलवस्त्रमेव धवलं शुभ्रमम्बरं यस्मिन् । पक्षे दुकूलवल्कलवत् (धवलं) शुभ्रमम्बरमाकाशं यस्मिन् । सतारेति । तारा शक्तिविशेषः प्रणवो ब्रह्म च । तदुक्तमन्यत्र—'इदं ताराश्रयं प्रोक्तमगम्यागमनादृते' । एतद्वृत्तौ ' तारत्रयं प्रणवशतत्रयम् ' इत्याह विज्ञानेश्वरः । तया सह्वर्तमानं यदन्तःपुरमिति पुरस्य शरीरस्यान्तर्मध्यं कुण्डलिनी नाडीविशेषः । क्वचित् 'अमाद्यन्तस्य परत्वम्' इति पुरस्य परनिपातः । तस्याः पर्यन्तः सहस्रारं कमलं तत्र योगसामर्थ्यास्थितं लैङ्गिकं तनुर्यस्य स तया । पक्षे तारा अश्विन्यादयस्ताभिः सहवर्तमानं यदन्तःपुरमवरोधस्तस्य पर्यन्तः सन्निधिस्तत्र स्थिता तनुः शरीरं यस्य स तथा । अथाश्रमसाम्येन गगनतलं विशेषयन्नाह—तिमिरेति । श्यामत्वसाम्यात्तिमिरवत् श्यामा ये तमालवृक्षास्तेषां लेखा पङ्क्तिर्यस्मिन् । पक्षे तिमिराण्येव तमालवृक्षा इति विग्रहः । शेषं पूर्ववत् । सप्तर्षीति । सप्तर्षिसदृशा ये ऋषयो नारदाद्यास्तेषां मण्डलं समूहः । 'मण्डलं श्वासमूहयोः' । इति धरणिः । तेनाध्युषितमाश्रितम् । पक्षे सप्तर्षयः सप्ततारकाः । शेषं प्रावत् । अरुन्धतीति । अरुन्धती वशिष्टपत्नी तस्याः सञ्चरणं परिभ्रमणं तेन पूतं पवित्रं । पक्षेऽरुन्धती ताराविशेषः । शेषं प्राग्वत् । उपहितेति । उपहितः सन्निहितः आषाढः पलाशदण्डो यस्मिन् । 'पालाशो दण्ड आषाढः' इत्यभिधानचिन्तामणिः । पक्ष आषाढा पूर्वाषाढानक्षत्रम् । आलक्ष्येति । आसमन्ताल्लक्ष्यमाणानि विलोक्यमानानि मूलानि वसुधान्तर्गतवृक्षप्रदेशा यस्मिन् । पक्षे मूलं मूलनक्षत्रम् । शेषं प्राग्वत् । एकान्तेति । एकान्ते विजने स्थिताश्चारवो मनोहराकृतयस्ताराकामृगाः श्वेतमृगाः यस्मिन् । पक्षे तारका रूपं मृगो नक्षत्रम् " । On this Prof. Peterson remarks, "Siddhachandra then takes सतारान्तः पुरपर्यन्तस्थिततनुः, as he reads, with सूर्यः, and explains the word accordingly. My reading is from C, D and Edd. The

Nakshatras (or Tara, wife of Brihaspati, carried off by the moon) are the wives who are accompanying the moon on his pilgrimage and the lighter streaks of darkness round about him stand for a Tamala wood."

L. 14. चन्द्र etc. Siddhachandra has the following note of introduction on this sentence :—"तस्यामेव विभावर्यां चन्द्रे जातत्रैराग्योपमानमम्बरमण्डले चाश्रमरूपके मुक्त्वा ज्योत्स्नायां गङ्गारूपकोपयोगिगगनतले त्र्यम्बकोत्तमाङ्गोपमानामाह—चन्द्रेति ।"

चन्द्राभरणभृतः । चन्द्र एव आभरणं बिभर्ति इति चन्द्राभरणभृत्, तस्मात् ।

L. 15. तारका......अलंकृतात् । ताराका एव कपालशकलानि, तैः अलंकृतं, तस्मात् ।

त्र्यम्बकोत्तमाङ्गात् । त्र्यम्बकस्य (शिवस्य, lit. of the three-eyed god) उत्तमाङ्गात् (शिरसः) ।

L. 16. हिमकरसरसि । हिमकरः (चन्द्रः) एव सरः, तस्मिन् ।

L. 17. विकच..... सिते । विकचपुण्डरीकवत् सिते ( शुभ्रे ) । Note that the lakes are generally white with the white lotuses in them.

चन्द्रिका......लोभात् । चन्द्रिका ( ज्योत्स्ना), सैव जलं, तस्य पानं, तस्यलोभः, तस्मात् ।

अमृतपङ्कलग्नः । Siddhachandra explains it as "कृष्णत्वसाम्यात्कलङ्क एवामृतपङ्कस्तत्र लग्नः । But if the कलङ्क (the spot in the moon) is the पङ्क (mud) in which the हरिणः (deer) is entangled what then is the हरिणः itself ? As every body knows it is the spot (कलङ्क) in the moon that is taken to be a deer ( हरिणः ). So it is better to explain the समास as अमृतमेव पङ्कं, तस्मिन् लग्नः । It is well known that the moon is full of nectar (अमृत). The idea expressed in the sentence is that the spot in the moon appeared as if it is a deer that went to drink the water, moonlight, in the lake, moon, white as a full-blown white otus and was there entangled in the mud, the nectar.

L. 18-20. तिमिर......चन्द्रपादैः । Siddhachandra explains it as follows :—कृष्णत्वसाम्यात्तिमिरमेव जलधरसमयस्तस्यापगमानन्तरं निवृत्त्यनन्तरम् । अभीति । अभिनवानि प्रत्यग्राणि सितानि शुभ्राणि यानि सिन्दुवारस्य निर्गुण्ड्याः कुसुमानि [illegible] पाण्डुरैः शुभ्रैरभ्रैः समुद्रस्तत्रागतैः प्राप्तैश्चन्द्रपादैः

शशिकिरणैर्हंसैरिव मरालैरिव कुमुदसरांसि कैरवोपलक्षिततटाकान्यवगाह्यन्तालोड्यन्त । अतः श्वेतत्वसाम्याद्धंसचन्द्रपादयोरुपमानोपमेयभावः ।

L. 20. विगलितसकलोदयरागम् । विगलितः ( melted away ) सकलः उदयसम्बन्धी रागः (रक्तिमा) यस्मिंस्तत् ।

रजनिकरबिम्बम् । रजनिकरस्य (चन्द्रस्य) बिम्बम् ।

L. 21. अम्बर......सिन्दूरम् । अम्बरस्य ( आकाशस्य ) आपगा (नदी), तस्यां अवगाहः (आलोडनं, bath), तेन धौतं (क्षालितं) सिन्दूरं (नागजं, a kind of red paint made of red lead) यस्य ।

The comparison between the moon and the temples of of the Iravata is due to their roundness.

L. 22. दूरोदिते । दूरं गते ।

हिमततिस्रुति । हिमस्य (प्रालेयस्य) ततिः (वीथी) तस्याः स्रुतिं (स्राविणि) । this is an epithet of the moon.

L. 23. अवश्याय......गतिषु । आवश्यायस्य (हिमस्य) जलबिन्दवः, तेषां पतनेन मन्दा गतिः येषां तेषु । this and the intervening locatives qualify निशामुखसमीरेषु in line 26 below.

L. 24. विघट...परिमलेषु । विघटमानानां ( विकाशं प्राप्यमाणानां कुमुदवनानां कषायः (तुवरः, fragrant) परिमलः येषु तेषु ।

समुपोढ......तारकैः । समुपोढा ( well brought near or begun ) निद्रा, तस्याः भरः ( excess, lit. weight ) तेन आळसा तारका कनीनिका येषां तैः ।

अन्योन्य......पुटैः । अन्योन्यं ग्रथितानि (मिलितानि) पक्ष्मणां (नेत्ररोमाणां) पुटानि येषां तैः ।

L. 25. आरब्ध......मुखैः । आरब्धेन रोमन्थेन ( चर्वितचर्वणेन ) मन्थराणि (आलसानि) मुखानि येषां तैः ।

सुखासीनैः । सुखेन आसीनैः ।

अभिनन्दितागमनेषु । welcomed.

L. 26. निशामुखसमीरेषु । निशामुखः ( प्रदोषः, evening ) तस्मिन् भवाः समीराः (वायवः) तेषु ।

समीरेषु । प्रवहत्सु । the breezes blowing.

अर्ध……अवखण्डितायाम् । अर्धयाममात्रं ( अर्धप्रहरमात्रं ) अवखण्डितं (खण्डनां प्राप्तं) यस्याः, तस्यां । when only half of a याम was past. A याम consists of about three hours.

P. 44, L. 1. उपसृत्य । आगत्य ।

L. 2. चन्द्रातपोद्भासिनि । चन्द्रातपेन ( by moon-light ) उत् (प्राबल्येन) भासते (शोभते) इत्येवंशीलः, तस्मिन् ।

L. 3. दर्भ……पाणिना । दर्भः ( कुशः ), तद्वत् पवित्रं धवित्रं ( मृग-चर्मनिर्मितं व्यजनं, a fan made of deer's skin) पाणौ (हस्ते) यस्य तेन ।

उपवीज्यमानम् । fanned.

L. 4. आश्चर्य……हृदया । आश्चर्यस्य श्रवणं, तत्र कुतूहलं, तेन आकलितं (व्याप्तं) हृदयं यस्याः सा । qualifies परिषत् ।

L. 6. पतत्रिपोतः । पक्षिशिशुः *i.e.*, the little parrot.

L. 8. एकाग्रान् । closely attentive.

FINIS.

Printed by Ramzan Ali Shah at the National Press, Allahabad.

